ममचित्तानांमतिर्लोकोपकारिणी ॥ ६ ॥ ममापिपरितोषोस्तिक
थानांकथनेद्विजाः ॥ अतोहंसाधुवृत्तेभ्यः कथयिष्येविशेषतः
७ अन्यान्युपपुराणानिवर्ततेष्टादशैवतु ॥ गणेशंनारदीयंच
नृसिंहादीन्यथापिच ॥ ८ ॥ गणेशस्यपुराणंयत्तत्रादौकथयाम्य
हं ॥ दुर्लभंश्रवणंयस्यमर्त्यलोकेविशेषतः ॥ ९ ॥ यस्यश्रवणमा
त्रेणकृतकृत्योभवेन्नरः ॥ प्रभावमस्यगदितुंनेशःशेषश्चतुर्मु
खः ॥ १० ॥ संक्षेपतोब्रवीमेतत्तथापिभवदाज्ञया ॥ बहुजन्मार्जितैः
पुण्यैरस्यतुश्रवणंभवेत् ॥ ११ ॥ पाखंडिनांनास्तिकानांनभवेत्पा
पकर्मणां ॥ नित्यत्वान्निर्गुणत्वाद्यदनादित्वाच्चतत्त्वतः ॥ १२ ॥ ग

णेशस्यस्वरूपंतुवक्तुंकेनापिनेष्यते॥तथाप्युपासनासक्तैः स
गुणंतन्निरूप्यते॥२३॥ॐकाररूपीभगवान्योवेदादौप्रति
ग० ष्ठितः॥यंसदामुनयोदेवाःस्मरंतींद्रादयोहृदि॥२४॥यंप्रज
पु० यंतिसततंब्रह्मेशानलविश्रवः॥योहेतुःसर्वजगतांसर्वका
२ रणकारणं॥२५॥यदाज्ञयाकःसृजतेयविश्वंयदाज्ञयापाल
यतेथविष्णुः॥यदाज्ञयासंहरतेहरोपियदाज्ञयासंभ्रमतेदि
नेशः॥२६॥यदाज्ञयावातिसमीरणोपियदाज्ञयापःप्रवहंति
दिक्षु॥यदाज्ञयाभानपतंतिभूमौयदाज्ञयाग्निर्ज्वलतित्रिलो
के॥२७॥तस्ययच्चरितंगुप्तंकस्यापिननिवेदितं॥तदहंवःप्रव २

स्याभिसादरं श्रूयतां द्विजाः ॥ १८ ॥ ब्रह्मणा कथितं पूर्वं व्यासायामि
ततेजसे ॥ भृगवे कथितं तेन सोमकांताय तेन च ॥ १९ ॥ व्रतैर्यज्ञैस्त
पोभिश्च दानैस्तीर्थैश्च कोटयः ॥ भवंति येषां पुण्यानां तेषां बुद्धिः
प्रजायते ॥ २० ॥ गणेशाख्यपुराणस्य श्रवणे द्विजसत्तमाः ॥ मनो
येषां न संसारे न दारापत्यभूमिषु ॥ २१ ॥ मयूरेशकथायां ते साद
रा मुनिसत्तमा ॥ श्रूयतामस्य महिमा सोमकांतप्रसंगतः ॥ २२
सौराष्ट्रे देवनगरे सोमकांतो भवन्नृपः ॥ नीतिमान्मतिमान्प्राज्ञः
वेदशास्त्रार्थतत्परः ॥ २३ ॥ दशनागसहस्राणि हयानां द्विगुणानि
च ॥ रथानां षट्सहस्राणि यं यांतमनुयांति च ॥ २४ ॥ पदातयोप्य

ष्यामिसादरंश्रूयतांद्विजाः॥१८॥ब्रह्मणाकथितंसर्वंव्यासायमि
ततेजसे॥भृगवेकथितंतेनसोमकांतायतेनच॥१९॥व्रतैर्यज्ञैस्त
पोभिश्चदानैस्तीर्थैश्चकोटयः॥भवंतियेषांपुण्यानांतेषांबुद्धिः
प्रजायते॥२०॥गणेशाख्यपुराणस्यश्रवणेद्विजसत्तमाः॥मनो
येषांनसंसारेनदारापत्यभूमिषु॥२१॥मयूरेशकथायांतेसाद
रामुनिसत्तमा॥श्रूयतामस्यमहिमासोमकांतप्रसंगतः॥२२
सौराष्ट्रेदेवनगरेसोमकांतोभवन्नृपः॥नीतिमान्मतिमान्प्राज्ञः
वेदशास्त्रार्थतत्परः॥२३॥दशनागसहस्राणिहयानांद्विगुणानि
च॥रथानांषट्सहस्राणियंयांतमनुयांतिच॥२४॥पदातयोप्य

ह्नः प्रियतमा भृशं तस्य राज्ञोभवद्भार्या सुधर्मा गुणशालिनी य
द्रूपमवलोक्यैव रतिरंभातिलोत्तमाः लज्जितानसुखं क्वापि
लेभिरे न च मेनिरे २२ अनेकरत्नखचिते ताटंके कांचने शुभे
बिभ्रती कर्णयोः कंठे निष्कं मुक्ताफलानि च २३ कंठे रत्नमयीं
कांचीं तादृशे नूपुरे अंघ्रिगे अंगुलीयान्युत्तमानि करपादांगुलीषु
च २४ वासांस्यनेकवर्णानि महार्हाणि सहस्रशः भगवद्भ
जने दाने सक्ता चातिथिपूजने २५ सेवने हर्निशं भर्त्तुर्वचने च
रता सदा हेमकंठ इति ख्यातः पुत्रो भूदनयोः शुभः २६ नागा
युतबलो धीमान्विक्रमी शत्रुतापनः एवमासीत्सोमकांतः २७

ग॰
पु॰
४

थिव्यांराजसत्तमः॥२७॥सर्वान्राज्ञोवशेकृत्वाचक्रेराज्यंधरात
ले॥नित्यंधर्मरतोयज्वादातात्यागीद्विजोत्तमाः॥२८॥इतिश्री
गणेशपुराणेउपासनाखंडेसोमकांतवर्णनंनामप्रथमोध्यायः
१॥सूतउवाच॥श्रूयतामृषयःसर्वेसोमकांतस्यउत्कृतं॥अकस्मा
दभवत्तस्यगलत्कुष्टोतिदुःखदः॥१॥धर्मशीलस्यराज्ञोथपूर्व
कर्मविपाकतः॥शुभंवाप्यशुभंकर्मनमुंचतिकश्चिन्नरं॥२॥
यस्यांयस्यामवस्थायांकृतंभवतिकर्मयत्॥तस्यांतस्यामव
स्थायांभुज्यतेप्राणिभिर्ध्रुवं॥३॥दुःखसागरमग्नोभूद्दह्यवो
जलधौयथा॥वेदनामलभेद्बह्वींभुजंगेनेवदंशितः॥४॥नानाद्र ४

तस्समाकीर्णः श्वदंककस्ततस्ततः। पूयशोणितवान्राजाकृमि
भिर्विह्वलीकृतः॥५॥ अस्थिशेषोभवद्राजायक्ष्मणैवसमाहृ
तः चिंतयाव्याकुलीभूतः सर्वेंद्रियरुजान्वितः॥६॥ ततोमा
त्पानृजगौराजामनःसंरुध्ययत्नतः॥ राजोवाच॥ धिङ्गोराज्यं
चरूपंचधिग्बलंजीवितंधनं॥७॥ केनेदंकर्मबीजेनव्यसनंस
मुपस्थितं॥ कांत्यासोमोजितोयेनसोमकांतस्ततोभवं॥८॥ ये
नमेनिर्जितावाणैःशत्रवोघोररूपिणः॥ येनमेसकलापृथ्वी
कृतास्ववशवर्तिनी॥१०॥ सम्यगाराधितोदेवः परमात्मासदा
शिवः॥ दुष्टसंगविहीनेनचित्तविग्रहकारिणा॥११॥ येनमेवपु

ग० पु० ५

षापूर्वमिष्टगंधानिषेविता:॥ तदिदानींपूतिगंधमतोमेजीवितंदृ
ष्या॥२२॥अतोहंकाननंयास्येसर्वैषामभ्यनुज्ञया॥हेमकंठंसुतंस
र्वैबुद्धिविक्रमसंयुतं॥२३॥सिंचंतुराज्यहेतोर्मेपालयंतुपराक्र
मैः॥इदानींनद्रदर्शिष्येमुखंलोकेकथंचन॥२४॥नमेराज्येनदा
रैर्वाजीवितेनश्रियापिवा॥प्रयोजनंमहामात्याकरिष्येस्वहितंव
ने॥२५॥सूतउवाच॥इत्युक्त्वानिपपातोर्व्यांतरुर्वातहतोयथा॥पूय
शोणितघर्मौघैर्व्याप्तोसौद्विजसत्तमाः॥कोलाहलोमहानासी
दमात्यानांचयोषितां॥हाहाकारश्चलोकानांक्षणमासीत्सुदारु
णः॥२६॥वस्त्रप्रांतकृतवाताद्यैरौषधैःक्षिप्रकारिभिः॥मंत्रिमंत्र ५

प्रयोगेस्तंसचेतनमकारयन् ॥१८॥ स्वस्थेजातेनृपेतस्मिन्नमात्याः
प्राब्रुवन्निदं ॥ अमात्याऊचुः ॥ तवप्रसादादमरेंद्रतुल्यंप्रभुक्तंसुखं
सर्वजनेष्वसिद्धं ॥ कथंत्विदानीत्वदृतेवसामः कथंचजीवेमपशु
घ्नतुल्याः ॥१९॥ करोतुराज्यंतवसूनुरेकःप्रभुतकोशोबलवान्‌रि
पुघ्नः ॥ विहायसर्वंसुखमद्यराजन्सहैवयामस्तुवनायगंतुं ॥२०
सूतउवाच ततःसुधर्मावचनंजगादवनेनृपंसेचित्तमेकवीरा ॥
व्रंजेवनांतेपिनवोस्तिमादृक्‌प्रशिष्टराज्यंसहमेस्तुतेन ॥२१॥ कःस्व
स्यभोक्तानपरोस्तिनैवसुखस्यवापूर्वकृतस्यजंतोः ॥ यथायथा
कर्मफलंप्रसक्तंतदेवभोग्यंस्वयमेवतादृक् ॥२२॥ मयापिनानावि

धभोगवत्यासुखेनराज्यंपरिभुक्तमस्य॥स्त्रीणांहिभर्त्रागमनेस
हैवपरत्रलोकेमुनिभिःप्रदिष्टं॥२३॥ततःपुत्रोहेमकंगेविनीतः
ग° शोकसंकुलः॥उवाचतस्मिन्समयेसोमकांतमिदंवचः॥२४
पु° ननुराज्येनदारैश्चप्राणैर्धनचयैरपि॥त्वांविनानृपशार्दूलकृ
६ त्यंनैवास्तिमेक्वचित्॥२५॥विनास्नेहंयथादीपोविनाप्राणं
यथातनुः॥तथाराज्यंतथाराजंस्त्वांविनाधर्मपालक॥२६॥सू
तउवाच॥अमात्यानांसुधर्मीयाःपुत्रस्यचवचोमृतं॥पीत्वाहृष्ट
मनाराजापुत्रंप्रोवाचधर्मवित्॥२७॥राजोवाच पितुर्वाक्यरतोनि
त्यंश्रद्धयाश्राद्धकृत्तथा॥पिंडदोयोगयायांतुसपुत्रःपुत्रउच्यते॥ ६

२८ धर्मशास्त्रार्थतत्वज्ञोनीतिज्ञोखिलतोषकृत ॥ पितृनुद्धरतेयस्तु
पुत्रवान्पुत्रउच्यते ॥ २९ ॥ अतोनीत्वासमायुक्तःकुरुराज्यंसमाज्ञ
या ॥ अमात्ययुक्ताशाधित्वंपुत्रानीवाखिलाःप्रजाः ॥ ३० अहंव
नंगमिष्यामिगत्वकुष्टेतिगर्हितः ॥ पत्न्यासुधर्मयासार्द्धमनु
जानीहिसुव्रतः ॥ ३१ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेद्वितियो
ध्यायः ॥ २ ॥ सूतउवाच ॥ ततउत्यायराजासंगृहीत्वादक्षिणेकरे ॥ पु
त्रंविवेशहर्म्यंग्निंयत्रमंत्रयतेसदा ॥ १ ॥ यत्रसिंहासनंदिव्यंकांच
नंबज्ररत्नयुक् ॥ मुक्ताप्रवालखचितंभातिशक्रपदंयथा ॥ २ ॥ त
त्रासतुःपितापुत्रौभातेद्वावप्यनेकधा ॥ प्रतिरत्नंगतौयस्मात्समु-

ग० पु० ॥१॥ २

दायहृत्ताचिव ॥३॥ आचारं प्रथमे प्राह नीतिं नानाविधां नृपः ॥ पुत्रा
यकरुणायुक्तो यशसे स्वकुलस्य च ॥४॥ सोमकांत उवाच ॥ याम
मात्रावशिष्टायां निशायां जाग्रतः पुमान् ॥ त्यक्त्वा शय्यां शुचिस्था
न उपविश्य गुरुं स्मरेत् ॥५॥ देवतां चिंतयित्वेष्टां प्रणमेत्स्तुतिपू
र्वकं ॥ प्रार्थ्य पृथ्वीं क्षमस्वेति पादस्पर्शं जगन्मये ॥६॥ प्रातर्नमा
मि गणनाथमशेषहेतुं ब्रह्मादिदेववरदं सकलागमाढ्यं ॥
धर्मार्थकामफलदं जनमोक्षहेतुं वाचामगोचरमनादिमनं
तरूपं ॥७॥ प्रातर्नमामि गिरिजापतिमिंदुमौलिं व्याघ्राजिनावृत
मुदस्तदयं मनोजे ॥ नारायणेंद्रवरदं सुरसिद्धजुष्टं सर्पास्त्रिपुर ॥१॥ २

लडमरुदधतं पुरारिं ॥ ८ ॥ प्रातर्नमामि कमलापतिमुग्रवीर्यं नाना
वतारनिरतं निजरक्षणाय ॥ क्षीराब्धिवासममराधिपबंधुमी
शं पापापहं रिपुहरं भवमुक्तिहेतुं ॥ ९ ॥ प्रातर्नमामि दिननाथम
घापहारं गाढांधकारहरमुक्तमलोकवंद्यं ॥ वेदत्रयात्मकमुद
स्तसुरारिमायं ज्ञानैकहेतुमुरुशांतिमुदारभावं ॥ १० ॥ प्रातर्न
मामि गिरिजां भवमुक्तिहेतुं संसारसिंधुरपपारकरीं त्रिनेत्रां ॥
तत्वादिकारणमदस्तसुरारिमायां मायामयीं सुरमुनींद्रनुतां
सुरेशीं ॥ ११ ॥ एवमन्यांश्च संस्मृत्य देवान्मुनिगणांस्तथा ॥ मानसै
रुपचारैश्च पूजयित्वा समापयेत् ॥ १२ ॥ ततो गच्छेत्सोदपात्रो या

मात्स्वंनैऋतीदिशं॥मृदंगृहीत्वासुश्वेतांब्राह्मणःक्षत्रियोरुणं॥४३
वैश्यश्चैततथाशूपामांननदीतीरतःखनेत्॥नोर्वेराथ्यानवल्मीका
द्ब्राह्मणागारतःक्वचित्॥४४॥तृणादिनाछादयित्वाधरांमूत्रपुरी
षयोः॥कृत्वोत्सर्गंदिवारात्रावुदग्दक्षिणादिङ्मुखः॥४५॥आदौगु
दंप्रमृज्यैवतृणकाष्ठादिनानरः॥पंचवारंमृदाविश्वक्षालयेत्त
दनंतरं॥४६॥दशवारंवामहस्तंसप्तवारमुभौकरौ॥लिंगंतथैक
वारंतुवामहस्तंत्रिवारतः॥४७॥मूत्रोत्सर्गेक्षालयीतद्वौकरौचद्वि
वारतः॥पादौसदैकवारंतुगृहस्थस्यैवमीरितं॥४८॥ब्रतवान्द्विगुणं
कुर्यात्त्रिगुणंवनगोचरः॥यतीचतुर्गुणंकुर्याद्रात्रावर्द्धंतुमौनवा

न् १९ अर्धपादंदिवारात्रौशौचंस्त्रीशूद्रएवच ततश्चाचम्यकाष्टेन
क्षीरकंटकवृक्षयोः २० गृहीत्वाप्रार्थनापूर्वंदंतजिह्वांविशोधयेत्
बलमोजोयशस्तेजःपशुबुद्धिधनानिच २१ मेधांब्रह्मधियंचैव
त्वंमेदेहिवनस्पते ततःपूतजलैःस्नानंकृत्वामलहरंपुरा २२
ततोमंत्रैश्चगृह्योक्तैःसंध्योपास्तिंततश्चरेत् जपंहोमंचस्वाध्यायं
तर्पणंदेवपूजनं २३ आतिथ्यंवैश्वदेवंचभोजनंद्विजसान्नि
कं पुराणश्रवणंदानंपरनिंदादिवर्जनं २४ परोपकारंकुर्याच्च
द्रव्यप्राणवचोमतैः परोपतापंनकुर्यादात्मास्तवनमेवच २५
गुरुद्रोहंवेदनिंदांनास्तिकंपापसेवनं अभक्ष्यभक्षणंचैवपरस्त्री

ग० पु० ९

रनिषेवनैणं ॥ २६ ॥ स्वदारवार्जनंनैवकुर्यादनुगतिंचरेत् ॥ मातृपितृ
गुरूणांचगवांशुश्रूषणंसदा ॥ २७ ॥ दीनांधकृपणेभ्यश्चदद्यादन्नंस
वस्त्रकं ॥ प्राणात्ययेपिसत्यस्यत्यागंनैवसमाचरेत् ॥ २८ ॥ ईश्वरानु
ग्रहोयेषांसाधूनांचप्रपालनं ॥ अपराधानुसारेणधर्मशास्त्रंविलोक्य
च ॥ दृष्ट्वावापंडितान्दंडंकुर्यादितिविशारदः ॥ विश्वासोयस्यनैवस्या
त्तत्रनोविश्वसेत्क्वचित् ॥ ३० ॥ विश्वस्तेत्यंतविश्वासोनकर्त्तव्योबुभूषता
कृतवैरेष्वविश्वस्तेकदापिनचविश्वसेत् ॥ ३१ ॥ षड्गुणानांप्रयोगे
नवर्द्धयेद्राष्ट्रमात्मनः ॥ यानंस्वशक्त्याकुर्वीतक्षीणतामन्यथाव्रजे
त् ॥ ३२ ॥ परेव्याकुलितेयानमथमंपरिचक्षते ॥ चारदृष्टिर्हृतवक्रोउद्यदं

९

डोनृपोभवेत्॥३३॥दंडस्यैवभयाद्धेत्राकाःस्वेस्वेधर्मेव्यवस्थिताः॥अ
न्यथानियमोनस्यात्पारक्यंस्वीयमत्पदः॥३४॥अधमोयदिनिंदेत
स्तुवीतयदिवाक्कचित्॥नक्रुध्येन्नचतुष्येच्चकिंतयाकिंतयापि
च॥३५॥शर्वापकारीयदिचपुनर्वाशरणंव्रजेत्॥पूर्वंचधनिकोयस्या
दरिःपाल्यःसदैवहि॥३६॥मंत्रगुप्तिःसदाकार्यातन्मूलंराज्यमु
च्यते॥कामादिषट्रिपून्जित्वाततोन्यान्विजयीतिच॥३७॥हत्पुच्छे
दंप्रजोच्छेदंदेवतोच्छेदमेवच॥आरामचैत्ययोःछेदंनकुर्यान्नृपस
त्तम॥३८॥पर्वकालेददेद्दानंयशसेत्यागमेवच॥नमित्रैर्वचनं
कुर्यात्स्त्रीषुगोप्यंवदेन्नच॥३९॥रणतोब्राह्मणंचैवपंकतोगां

समुद्धरेत् ॥ अनन्तंनवदेत्क्वापिसत्यंक्वापिनहापयेत् ॥ ४० ॥ अमात्या
नांप्रजानांचभृत्यानांचित्तहृद्भवेत् ॥ ब्राह्मणेभ्योनमस्कुर्याद्देव
ग० ताभ्यःसदैवच ॥ ४१ ॥ इतिपित्र्यद-पिशिक्षाप्यहेमकंगसुतंनृपः
पु० आचारंसहधर्मेणनीतिशास्त्रंयथाश्रुतं ॥ ४२ ॥ क्षेमंकरंस्वपर्वतंवि
१० द्याधीशंतथैवच ॥ आह्वयमाससमासचामात्यान्सुमुहूर्त्तेविलोक्य
च ॥ ४३ ॥ संभारानुपकल्प्यैवनानास्थानगतान्नृपः ॥ ब्राह्मणान्वेद
विदुषोयज्ञकर्मसुनिष्ठितान् ॥ ४४ ॥ राज्ञोत्यमहतोराजपत्नीश्च
सुहृदःस्वकान् ॥ आह्वयमासनृपतिःश्रेणीमुख्यांश्चनागरान्
४५ ॥ अभिषेकाचलोकायपुत्रस्यरिपुघातिनः ॥ गणेशंपूजयि १०

त्वष्टदेवतांचयथाविधिः ॥४६॥ वाचयित्वास्वस्त्ययनंमातृपूजनपूर्वकं
कृत्वाभ्युदयिकंश्राद्धंब्राह्मणांस्तर्प्यचाथसः ॥४७॥ कारयित्वामंत्रघोषैर
भिषेकंसुतस्यसः ॥ उवाचसोमकांतस्तान्मंत्रिमुख्यानिदंवचः ॥४८॥ रा
जोवाच ॥ ममायंसुतइत्येवममात्याबुद्धिरस्तुवः ॥ भवतामेवहस्तेषु
सुतएषनिरूपितः ॥४९॥ ममानुशासनंयद्वत्कृतंनीतिविशारदैः
तथास्यशासनंकार्यंश्रेणीमुख्यसमन्वितैः ॥५०॥ इतिश्रीगणेश
पुराणेउपासनाखंडेआचारादिनिरूपणंनामतृतीयोध्यायः ॥३॥
सूतउवाच ॥ जातेभिषेकेराजासौचकारद्विजपूजनं ॥ मणिमुक्ताप्रवा
लानिददौसांगंगवायुतं ॥५१॥ तोषयामाससर्वांस्तान्गजोश्वथ

ग० पु० ११

नांमुके: । नानादेश्यानिवासांसिसुवर्णंतरित्तानिच ॥ २ ॥ नानाव
र्णानिकाश्मीरदेशजानिमहांतिच ॥ राजेभ्योराजपत्नीभ्योग्राम
मुखेभ्यएवच ॥ ३ ॥ तद्भृत्येभ्योगुणिभ्यश्चददौराजायथार्हतः । अमा
त्यानांददौअन्यान्ग्रामान्बहूधनान्यपि ॥ ४ ॥ ततोवनंययौराजा
दुःखशोकसमन्वितः ॥ पूर्वजन्मार्जितैर्दोषैरत्यंतमलिनोशुचिः
५ ॥ तस्मिन्प्रयातेलोकानांहाहाकारोमहानभूत् ॥ स्वंस्वंकार्यं
विहायैवप्रतिजग्मुर्जनाधिपं ॥ ६ ॥ अमात्याराजभार्याचहेम
कंठःसुहृद्वृतः । उत्तिष्ठन्नातपन्यातःस्खलन्धावनुदन्नपि ॥ ७ ॥ अ
मात्यानागरास्तंतुदुःखिताअप्यवारयन् ॥ गव्यूतिद्वितीयंगत्वात ११

स्थोराजाश्रमान्वितः॥८॥ दृष्ट्वावापीशीतजलांनानावृक्षसमन्वितां॥
उवाचनागरान्सर्वानमात्यान्स्वजनानपि॥९॥ अपराधंमयायद्वश्चि
रंराज्यंप्रकुर्वता॥ तत्क्षंतव्यंनमाम्प्रेषवद्धांजलिपुटंजनाः॥१०॥ कृ
पांनिधेयापुत्रेमेमयिदेवात्समागते॥ विज्ञापयामिवः सर्वान्मयि
स्नेहोनहीयतां॥११॥ गच्छंतुनगरंसर्वेसस्त्रीदृष्टाः समागताः॥ पुत्रे
णपाल्यमानामेतिष्टंतुविगतज्वराः॥१२॥ अनुजानंतुमांसर्वेसूचि
तोयाम्यहंवने॥ युष्मासुतुप्रयातेषुमनोमेनिश्चलंभवेत्॥१३॥ उ
पकारंमहांतंमेकुर्वंतुकृपयाखिलाः॥ दुःखितोनिष्ठुरंवक्तुंमत्तुका
मोपिनोत्सहे॥१४॥ महत्पापंममैवैतज्जन्मजन्मांतरार्जितं॥ यद्धि

योग्योहिराज्यस्यलोकानांहितकारिणं॥१५॥परंतुकिंनरोम्येषय
क्ष्मत्कुष्टवानहं॥सर्वोपिस्वकृतंभुंक्तेसुकृतंदुष्कृतंतथा॥१६॥सूत
ग० उवाच॥इतिश्रुत्वावचोराज्ञोमूर्छिताःसुहृदस्तदा॥घ्नंतःकेचित्पा
पु० णितलैःशिरांसिभृशदुःखिताः॥१७॥केचित्परस्परंचक्रुरभिज्ञाःपंडि
॥१२॥ ताश्चये॥सांत्वनंपूर्वजातानांनृपाणांचरितैर्नृपे॥१८॥ज्ञानिर्वाच्य
मवस्थांतत्समयेद्युरथापरे॥यथास्वरूपेविज्ञातेयोगिनोज्ञाननि
र्वृताः॥१९॥दुःखितंसोमकांतंतंवनंगंतुंसमुत्सुकं॥नियम्यदुःखधै
र्येणधीराःकेचिदथाब्रुवन्॥२०॥प्रजाकर्तुःपोषयित्वापालयि
त्वाननस्त्वंत्यक्तुमर्हसि॥यथानत्यजतेस्रोत्यंजलमौष्ण्यंतनूनपा १२

त ॥२१॥ मर्यादां जलधिर्वापि सूर्यः प्राकाश्यमेव च ॥ कथं वा नग
रं यामस्त्वां विना जनवत्सल ॥२२॥ यथोडुपतिना हीनं व्योमतता
रान्वितं नृप ॥ पुरं तद्वन्न शोभेत त्वां विना शत्रुकर्षण ॥२३॥ सहैव
यामस्तीर्थानि द्वित्राणि वयमप्युत ॥ रूपं ते कांतिमत्कांत भवि
ता तीर्थसेवनात् ॥२४॥ ततः सहैव यास्यामो नगरं ध्वजसंकुलं
हर्षेण महता युक्ता वाद्यवंदिपुराः सराः ॥२५॥ सूत उवाच ॥ इति तद्व
चनं श्रुत्वा कोपदुःखसमन्वितः ॥ उवाच राजा तानत्वा मेवं मैवं
पुनः पुनः ॥२६॥ ततोऽब्रवीद्धेमकंठः सामात्यो वत्सलं नृपं ॥ स्नेह
कारुण्यभावेन विनयेन समन्वितः ॥२७॥ पुत्र उवाच ॥ विना तां नोत्स

हेगंतुंकर्त्तुंराज्यंचजीवितुं ॥ नमयादृष्टपूर्वस्तेविरहस्तेसमहेकथं ।
ग० २८ राजोवाच ॥ एतदर्थंमयापूर्वंधर्मशास्त्रेसुनीतिमत् ॥ उपदि
पु० ष्टंतवशुभंदृष्टानकर्त्तुमर्हसि ॥ २९ ॥ श्रूयतेजामदग्न्येनजन
१३ नीनिहतापुरा ॥ पितृवाक्यानुरोधेननीतिज्ञेनसुधीमता ॥ ३०
रामस्तुराज्यंत्यक्त्वैववनंयातःसहानुजः ॥ अदृष्ट्वाकारणंसी
तांत्याजलक्ष्मणोवने ॥ ३१ ॥ हेमकंठपुरंशीघ्रंममात्यैःस्त्रि
भिरन्वितः ॥ अतोममाज्ञयागच्छकुरुराज्यंमयार्पितं ॥ वित्ते
यथाकार्यसक्तेचित्तंतस्यपरात्मनि ॥ यथावास्थापितेचित्तं
लोकस्यमयिवर्तते ॥ ३३ ॥ यथामायिचनंयातेस्त्वांतंमत्वेयव १३

र्त्ते ॥ दैवयोगेन सुभगे जातो यास्ये पुनर्गृहं ॥ ३४ ॥ भविष्यति यथा ध
र्मो महाकायकारिणस्तव ॥ नत्तथा सहयातेन तस्मात्कुरु व्रजामि च
सूत उवाच ॥ अमात्या नागराः पुत्रः प्रयातुं कृतमानसाः ॥ कष्टेन म
हता युक्ता नमश्चक्रुर्नृपं तदा ॥ ३६ ॥ अनुज्ञातास्तथा तेन आशीर्भि
रभिनंद्य च ॥ प्रदक्षिणीकृत्य नृपं निवृत्ता नगरं प्रति ॥ ३७ ॥ अग्रे कृत्वा
महासेनां गजाश्वरथपत्तिनीं ॥ छत्रध्वजयुतो मानी हेमकं वेगगम
त्पुरीं ॥ ३८ ॥ इति श्रीगणेशपुराणे उपासनाखंडे पुरप्रवेशनं नाम च
तुर्थोध्यायः ॥ ४ ॥ सूत उवाच ॥ ततो मातरमभ्येत्य स्नेहकातरया धि
या ॥ तां जगाद कथं मातस्त्यजसे न पराधिनं ॥ १ ॥ पुत्र उवाच ॥ सहैव या

नुपुत्रोयमितिवाच्यस्त्वयापिता॥नववाक्यानुरोधेनयदिमांसहने
ष्यति॥२॥तदावांसेवनंकुर्योनमेराज्येमतिस्त्वथा॥किंतद्राज्यंसु
खंदद्यात्नवद्भ्यांरहितस्यमे॥३॥सुधर्मोवाच॥एतावृतद्दुःखशो
ग॰ काभ्यांयुतोराजानमेवचः॥करिष्यतिमहाबाहोतस्मात्कृच्छ्रमसमा
पु॰ श्रया॥४॥पातिव्रतेनधर्मेणपरवत्यस्मिन्बालकः॥भर्त्तुरस्योनदे
॥२४॥ वोस्तियेषितांमान्यएवच॥५॥सूतउवाच॥इत्याकर्ण्यमनश्चक्रेमा
तरंसुहृज्ञात्सुतः॥प्रदक्षिणीकृत्यतदानुज्ञांप्राप्ययथौपुरं॥६॥अलं
कृतंनागरिकैःपताकाध्वजपल्लवैः॥सिक्तमार्गंसुगंधाद्भिर्ययौ
द्रनगरंतथा॥७॥दत्त्वातांबूलवासांसिविसृज्यस्वजनान्नृपः॥प्र ॥१४॥

विवेशगृहंश्रीमद्धर्षशोकसमन्वितः ॥ ८ ॥ चकारराज्यंधर्मेणसुत
वत्पालयन्प्रजाः ॥ धर्मार्थकाममोक्षेषुपृथक्शिक्षांमनोदधे ॥ ९ ॥ ऋ
षयःऊचुः ॥ कथंराजासोमकांतःकिंवनंसमुपागतः ॥ किंसहाय
श्चकिंचक्रेकर्मनोवदविस्तरात् ॥ १० ॥ सूतउवाच ॥ हंतवःकथयिष्या
मिसोमकांतोयथावनं गत्वाचकारयत्कार्यंस्मारंशृणुतानघाः
११ ॥ सुबलज्ञानगम्याभ्याममात्याभ्यांसुधर्मया ॥ धर्मपत्न्यासुतोर
ण्यंप्रविवेशदुरासदं ॥ १२ ॥ अग्रतःप्रकृतीयातेमध्येराज्याथसंस्थितः
धर्मपत्नीसुधर्मागात्मीत्तेवरावरामसंस्थितः ॥ १३ ॥ एकाशनाश्चचत्वा
रएकचित्तास्नानाल्पयाः । समंतःखसुखाश्चापिवनादनमुपाययुः ॥

ग०
पु०
१४

१४ ॥ क्षुधातृषाश्रमैर्वापिनिम्नोन्नतगतादिभिः ॥ अत्यंतकर्षिता
छायामाश्रित्योपाविशन्क्वचित् ॥ १५ ॥ पुनर्वनांतरंगत्वाददृशुस्ते
सरोमहत् ॥ यत्रमातंगसदृशानक्राभांतिसकच्छपाः ॥ १६ ॥ ताला
स्तमालाबकुलाः सरलाः प्रियालाबकुलाःशुभाः ॥ रसालाःपन
साजंबुनिंबाश्वत्थवटादयः ॥ १७ ॥ वृक्षानानालताजालैर्वेष्टिताःप
रितोबभुः ॥ यत्रास्तेतिमिरंगाढंगिरिदर्युदरेयथा ॥ १८ ॥ यत्रवायुः
सुखःस्पर्शःकुमुत्कादंबगंधवान् ॥ यस्मान्नयतिमुनयोविसा
निचफलानिच ॥ १९ ॥ यत्रहंसाबकाःश्येनाःशुकाःकाकाश्चको
किलाः ॥ सारिकाश्चकंकाकाश्चनानारावान्विकुर्वते ॥ २० ॥ न १४

यत्रशीतोत्पलकरांभुसंधिर्नानालतापुष्पकुजाश्रितानां॥क्षुत्तृट्भ
यंयत्रनचैवमृत्युःस्वर्गेयथाप्राणएवतांद्विजेंद्रा॥२१॥तत्रगत्वाजलं
सर्वेपपुःशीतंश्रमापहं॥स्नात्वानित्यक्रियांकृत्वाफलानिबुभुजु
श्चते॥२२॥सुष्वापचक्षणंराजाकच्छेकोमलवालुके॥धर्मपत्नीसु
धर्मासापादसंवाहनेस्थिता॥२३॥तस्यानुमतमाज्ञायद्यावमात्मा
वगच्छतां॥प्रारात्तुकंदमूलानिफलानिचविसानिच॥२४॥दद
र्शतत्राद्भुतरूपमुग्रंबालंसुधर्माप्रभयाज्वलंतं॥उत्कृष्टरूपस्यसु
तंस्मरंतंजातंपुराबालमितिस्ममेने॥२५॥दृष्ट्वैवतंसाजहर्षेसुध
र्मामेनेचतंसाहितकारिणंच॥वृत्तंप्रसन्नंहृदयंयमीक्ष्यापका

शिरणं चोपकरं हि वक्ति ॥२६॥ पप्रच्छ तं कष्टकृतः प्रयातः कस्यासि
ग० पुत्रो जननी च का ते ॥ वरस्व ग्राम्रधामृत धारया मे सखे वकर्णौ परि
पु० तोषयाशु ॥२७॥ रक्तउवाच ॥ इति स्म स्पष्टः सज्जगाद वा तस्तां रा
२५ जपुत्रीं सुधया गिरा मे ॥ पिता मन्मथ भौमिनि मे पुरो मा माता ज
लार्थे स्वगृहादिहागां ॥२८॥ च्यावनः खलु नाम्नाहं पितु राज्ञाकरः
शुभे ॥ त्वं च का कतमोयं ते कथं वनमिदं गतः ॥२९॥ स्त्रवंतिकथ
मंगानि वर्षकाले गिरेरिव ॥ प्रतिदुर्गंधिताचास्य केन वा वदक
र्मणा ॥३०॥ कृमिभारसमाकीर्णमंगं वा से वसे कथं ॥ स्वयं चारु तत
रां त्वा सुकुमारी सुलोचना ॥३१॥ चारुप्रसन्नवदना चारुसं २५

वांगशोभनी॥ कच्चित्पूर्वेनपित्रातेसुहृद्भिर्भ्रातृभिर्द्विजैः॥२२॥ किंवा
तोयंनरःकुष्ठीकृमिभाराकुलोपिच॥ कथमेनंब्रतवतीदुर्गमंचाग
तावनं॥२३॥ सूतउ०॥ इतिपृष्टासुधर्मासामुनिपुत्रेणधीमता॥ प्राच
ष्टेसकलंतस्मैशोकहर्षसमन्विता॥२४॥ सुधर्मोवा०॥ सौराष्ट्रदेशे
विख्यातेदेवताख्यंपुरंमहत्॥ तत्रायंसोमकांतोमेभर्ताराज्यंचका
रह॥२५॥ अतिमानीवदान्यश्चशूरोदृढपराक्रमः॥ असंख्यातबलो
पेतोरिपुराष्ट्रविमर्द्दनः॥२६॥ यज्वातिसुंदरःश्रीमान्सुहृदानंदकार
कः॥ विवेकीसर्वकार्याणांनीतिशास्त्रविशारदः॥२७॥ राज्यंस्वंबुभु
जेराजाबहुकालंद्विजोत्तम॥ इमामवस्थांसंप्राप्तःपूर्वकर्मविपाक

ग॰
पु॰
॥२६॥

तः॥३८॥अस्मात्पद्वयसंयुक्तौवनमेतत्समागतौ॥अत्रमंत्रीष्टलग्नास्यपुत्रे
राज्यंप्रयत्नतः॥३९॥सुवलक्ष्णानगम्याभ्यांप्रकृतिभ्यामिहागतौ॥रा
ज्ञोनुज्ञांसमादायफलार्थंतौगतौवने॥४०॥इहास्मान्राक्षसाप्रेता
भूतानिमृगमृगपक्षिणः॥नानाविधाभीषयंतिकथंनोभक्षयंति
न॥४१॥नजानेदुःखभोगायस्यापयांपिअतोपिच॥दुःखस्यांतंनपश्या
मिकर्मणोदुष्कृतस्यच॥४२॥कटुतिक्ताम्ललवणमधुरस्निग्धभोजने
नतथास्तुचिरस्यानुत्परितस्यद्विजातिभिः॥४३॥अथेदानींकंदमूल
कषायाम्लफलादिषु॥दरिद्राणांमहाहारोपाकोपिनभक्षितस्यच॥
नतथाश्रीमताशक्तिरशनपाकएवच॥४४॥यःशेतेकोमलेदिव्येश ॥२६॥

यनेस्मिन्मनोरमे इदानीं यत्र कुत्रापि पिपशपकालस्य पर्ययं ४५ यस्य दिग्व्या
पिन श्वासस्तन्नानाः परिमलाः शुभाः पूयशोणितदिग्धस्य स्तूतिगंधो
पि सांप्रतं ४६ यश्चानंदमये सिंधौ मग्नो मे भूत्त्वं डितैर्हतः स इदानीं दुःख
मये कृमिभिः परिवारितः ४७ कथं तरेम दुःखाब्धिं न जाने भृगुनंदन
मेव पोतस्त्वगाधे मज्जतां नौरिवार्णवे ४८ इतिश्रीगणेशपुराणे उ
पासनाखंडे सुधर्माच्यवनसंवादो नाम पंचमोध्यायः ५ सूत उवाच
इति तद्वचनं श्रुत्वा च्यवनो भृगुनंदनः त्वरया स्वमुपादाय कलशं ज
लसंभृतं १ दुःखितः परदुःखेन तूष्णीमेवाव दद्गृहं तं गुरुः परिपप्र
च्छ विलंबकारिणं सुतं २ भृगुरु० किमपूर्वं त्वया दृष्टं लब्ध्वं सेचकिं

ग॰
पु॰
१७

तोयथा॥बिल्वंबक्ष्यकथंजातोवदपुत्रममाग्रतः॥२॥पुत्रउवाच॥सौराष्ट्र
देशेविख्यातेदेवतेनगरेमुने॥सोमकांतइतिख्यातोराजाराजीवलो॰
चनः॥४॥चक्रेराज्यंबहुतिथंधर्मेणपालयन्प्रजाः॥दुर्भगत्वंगतोदैवा
त्पुत्रेराज्यंनिवेश्यसः॥५॥अल्पासुधर्मयायुक्तोमत्तमत्तोपितासुतः
सुवलज्ञानगम्याभ्यांप्रकृतिभ्यामिहागतः॥६॥गलत्कुष्टीकृमियुतो
विधमन्दुर्गमंसरः॥सहस्रभगतांप्राप्तोइंद्रोनुगौतमान्मुने॥७॥क्रू॰
रासुधर्माचार्वंगीकगलत्कुष्टवान्पतिः॥इतिमेपृच्छतोवृत्तंतदीयंग
तवान्क्षणः॥८॥तदीयैकस्तणवाकैर्मनोमेकलिलंत्वभूत्॥ततोहंक
लशंशूर्णंकृत्वाशीघ्रमुपागतः॥९॥सूतउवाच॥सर्वंचाकथयन्तस्मैत

थायत्कथितंवचः॥श्रुत्वातच्चपुनःपुत्रंच्यवनंभृगुरब्रवीत्॥१०॥भृगुरुह०
सर्वानानयतान्शीघ्रंपुत्रगच्छममाज्ञया॥द्रक्ष्यामिकौतुकंतेषांस्त्वीयं
चदर्शयामितान्॥११॥सूतउवाच॥इत्थंसनोदितःपित्राच्यवनःकरु
णानिधिः॥जगामससरसोरूपंसुधर्मांद्रष्टुमुत्सुकः॥१२॥तस्मिन्नेवक्ष
णेमात्यौफलकंदभरान्वितौ॥सुवलज्ञानगम्यौतावागतौराजसन्नि
धिं॥१३॥ततऊचेसमुनिःसुधर्मांचारुलोचनां॥पितामेस्वाश्रमंसर्वा
नाकारयितिसुव्रते॥१४॥इतितद्वचनंश्रुत्वासुधर्माशोकविकला॥
तदैवसावधानाभूत्तन्वःप्राणइवागते॥१५॥सुशीलाराजपत्नीसापी
त्वातद्वचनामृतं॥आगमत्सासुचार्वंगीप्रकृतिद्वयसंयुता॥१६॥सोम

कांतेन पतिना मुनिपुत्रपुरःसरा ॥ गणेशस्कंदसहिता शिवेव शिवसं
युता ॥ १७ ॥ शुश्रुमार्गस्य मध्ये सा वाचस्पतिपुरःसरा ॥ मंत्रघोषयुतं प्रा
ग० पन्नगेराश्रममंडले ॥ १८ ॥ नानापुष्पलताकीर्णं नानापक्षिविनोदितं
पु० मार्जारानकुलाश्येनागजागावय्यामृषकाः ॥ १९ ॥ भुजंगाः पक्षिणः सिं
॥१८॥ हाद्याप्राक्रीडंति यत्र च ॥ न च वायुर्भृशं वाति न सूर्यस्तपते भृशं ॥ २०
न वर्षति भृशं मेघो वर्षते च नदी लया ॥ विविशुस्ते हर्षयुता मुनिपुत्रपु
रःसरा ॥ २१ ॥ तत्राद्भुतं व्याघ्रमृगाजिनस्थं ददर्श सूर्यप्रतिमं नृगुं तं ॥ राजा
थ पत्नीप्रकृतिद्वयं च ननाम बद्धांजलिरब्रवीच्च ॥ २२ ॥ राजोवाच ॥ अ
द्याशिषो मे सफला द्विजेंद्र द्विजेरिता धर्मचयास्तपोधि आजन्मतो हं १८

परिश्रत एष पितुर्जनन्याश्च सुजीवितं मे ॥ २३ ॥ भवद्दृशिः संप्रति हंत्वपथेनः श्र
वोर्जितैः पुण्यचयैः कृतापि ॥ आगामिकल्याणकरी मुनींद्र कालत्रये ज
न्म करोति शं ते ॥ २४ ॥ सौराष्ट्रदेशे खलु दैवताख्ये पुरे कृतं राज्यममोघदृष्टे ॥
भीतेन पापाद्विजदेवतादिश्रजा कृतानीति मता मुनींद्र ॥ २५ ॥ आकस्मिकं
मेऽद्य रितं किमेतत्साद्य बभूवाग्रतरं दुरंतं ॥ येनाहमीदृक्कुदशं प्रणीतो ज्ञा
नेन कं चित्स्मति कार मत्र ॥ २६ ॥ अपायतां यांति कृता उपाया युष्मत्स्वरूपो
पायमुपायमीहे ॥ निर्वैरतां यांति हि जातिवैरास्त्वदाश्रमे वांछ शरणं
प्रपन्ना ॥ २७ ॥ सूत उवाच ॥ श्रुत्वेति वचनं तस्य भृगुस्तु करुणायुतः ॥ उ
वाच सोमकांतं तं ध्यानेनालोक्य सुव्रतं ॥ २८ ॥ भृगुरुवाच ॥ उपायं वच्मि

ग० पु०
२९

नृपतेनचिंतांकर्तुमर्हसि॥ममाश्रमगतादुःखंनहिविंदंतिजन्मिनः
२९॥जन्मांतरकृतंचैवदुरितंतेनृपोत्तम॥येनेमांगमितोवस्थांकथ
यिष्येतदप्यहं॥३०॥कुर्वंतुभोजनंसर्वेचिरंकालंबुभुक्षिता॥वनाद्वनां
तरंयाताःश्रांताक्लांताननाभृशं॥३१॥सूतउवाच॥इत्युक्त्वास्नापया
माससुतैलाभ्यंगपूर्वकं॥भोजयामासचान्नानिषड्रसानिचनैक
शः॥३२॥बुभुजुस्तेपिविश्रांताभृगोरमिततेजसः॥आज्ञयामुनिवर्यस्य
सुस्नातामुष्टस्नेहकृता॥३३॥सुषुपुर्मृदुशय्यायांहित्वाचिंतांदुरत्ययां॥
मुनिनाकल्पितायांतेस्वराज्यंगमिताइव॥३४॥इतिश्रीगणेशपुराणे २९
उपासनाखंडेभृगोराश्रमगमनंनामषष्ठोध्यायः॥६॥ऋषयःऋचुः॥

तत्रगत्वाकिमकरोत्सोमकांतोनृपस्तदा उपायःकथितःकोवाभृगुणा
सर्ववेदिना॥१॥कथयस्वकथामेतांशृण्वतांनोद्विजोत्तमा।नतृप्तिमधि
गच्छामःपीत्वातद्वचनामृतं॥२॥सूतउवाच॥सम्यक्पृष्टंमहाभागायू
यंतुज्ञानसागराः।यःकथांतेनप्रयातिश्रोतावक्ताथवाद्विजाः॥३॥लि
ख्यमानंवाचयतिपुस्तकंहरतेपिवा॥नष्टंच्छतिचयःशिष्यागुरुःदृष्टोन
वक्तिचेत्॥४॥उभौतौमूकबधिरौलोकेदृष्टौद्विजोत्तमाः॥शृण्वंतुकथ
यिष्यामिसोमकांतकथामतः॥५॥तस्यांरात्र्यांव्यतीतायांदिननाथेत
थोदिते॥स्नानंसंध्यांजपंहोमंकृत्वासनृपसत्तमः॥६॥स्नातायप्रकृत
जाप्यायपत्नीप्रकृतिसंयुजे॥पूर्वजन्मकथांतस्मैराज्ञेकथितमार

म॰ पु॰ २०

भूत ॥ ७ ॥ नृपरुवाच ॥ कोल्हारनगरेरम्ये विंध्याचलसमीपतः ॥ चि
द्रूपइतिविख्यातोवैश्योबहुधनोभवत् ॥ ८ ॥ तस्यभार्यातिसुभंगा
नाम्नाख्यातासुलोचना ॥ सुशीलादानशीलाचपतिवाक्यपरास
ती ॥ ९ ॥ तस्यास्त्वंपुत्रतांयाताभवेपूर्वेनृपोत्तम ॥ कामंदइतितेना
मचक्रतुस्तौद्विजेरितौ ॥ १० ॥ अतिस्नेहंदिवारात्रावतिलालनभर्म
के ॥ वार्धिक्यकालजेतौतुपितरौत्वयिचक्रतुः ॥ ११ ॥ विवाहंचक्रतु
स्तौतुधनकौतुकमंगलैः ॥ मृगाक्षीसुकुमारांगीनाम्नाख्याताकु
टुंबिनी ॥ १२ ॥ अन्वरक्तात्वयिसदाद्विजदेवातिथिप्रिया ॥ बभूवयो
षिद्योषित्सुरत्नभूतातिसुंदरी ॥ १३ ॥ कुटुंबिनीतिसानामसार्थं

२०

कंविदधेतुसा ॥ सप्तपुत्रापंचकंन्यापंचबाणाप्रियातुकिं ॥ २४ ॥ ततोब
कुतिथेकालेपंचत्वमगमत्पिता ॥ मातातवसतातेनसहदाधादिवंग
ता ॥ २५ ॥ ततस्त्वंसहस्विंगैस्तद्द्रव्यंनाशितवान्बहु ॥ नीतेनष्टेभक्तितं
चविनाशमगमद्धने ॥ २६ ॥ चिंतयाधर्मपत्नीत्वांनिराकृतवतीभृशं ॥
नगृहीतंतुतद्वाक्यंततोविक्रीतवान्गृहं ॥ २७ ॥ गतासाबालकैःसार्द्धं
मनुज्ञातापितुर्गृहे ॥ अपत्यपोषणकृतेकृतेत्वांवेशकंटकं ॥ २८ ॥ ततउ
हृत्तोयातःउन्मत्तइवमद्यपः ॥ अन्योन्यकारीनगरेजातोमत्तइवद्वि
पः ॥ २९ ॥ परस्वहारोवनितासुजारोग्रामेषुचोरोजनतापकारः ॥ द्यू
तेषुवीरोथजिनैघसारोहिंसाविहारोवलहीनसूरः ॥ ३० ॥ येयेज



गा०
पु०
॥२९॥
नास्ते सुखसंगत्य तास्तेभ्यो गृहीत्वा वकू वित्तमादः॥ निक्षेपतः पितृ
कृतात्सुहृद्भ्यो मिषात्कुतश्चिन्नगरस्थितेभ्यः॥२१॥ पापथानन्त
तांश्च कार्थं सर्वाननन्ततानां त्वमदाज्जनेषु॥ सोऽल्पं इति सर्वजनाः सुभी
तिमापुः कुरगात्स्य अगतादिवोग्रवीर्यात्॥२२॥ असह्यतां तेन जनस्य
यातो गोऽत्र रक्तः पायसंगोयथैव॥ राज्ञोगृहीत्वानुपतिं जनास्ते नि
र्वासयामासुरतोऽपुरस्त्वा॥२३॥ वने स्थितस्त्वेवकू जंतुघाती स्त्रीवाल
वृद्धाहिद्विनिहंशिनित्यं महाजनानीत्यपलायसे च॥ सिंहं निरीक्ष्येव
वृगो मृगो वा॥२४॥ मत्स्यान् बकान् सारस कुक्कुटांश्च हंसकान् गान्
वानरकोकिलांश्च हत्वा त्रिखड्गान् शशकांश्च गोधा मुधा स्वदेहं हृष्ट ॥२९॥

जिनादपोष ॥ २५ ॥ सिंहान् व्याघ्रांश्च जंबूकान् हिंसार्यगिरिगह्वरा
त् ॥ नानास्थानगताश्चौरास्मे लयित्वा सुदुर्द्धरान् ॥ २६ ॥ काष्टैर्लोष्टैश्च
पाषाणैश्च कर्थं गृहमुत्तमं विशालं क्रोशविस्तारं नानाकौतुकमंडि
तं ॥ २७ ॥ पित्राभीतेन पत्नी सा प्रापिता बालकैः सह ॥ गुहागते ते सस्नेरा
जतो जननतो पि च ॥ २८ ॥ नानालंकारवसना बालका प्रापिते च सा दे
वांगनेव शुभे त्वं च चोरसमन्वितः ॥ २९ ॥ त्वं च मार्गे जनान् दीनान् हत्वा
हत्वा गुहागतः ॥ चौरैः स बालयोषद्भिर्मासि राजेव तत्र ततः ॥ ३० ॥ कदाचि
द्ब्राह्मणो विद्वान् विख्यातो गुणवर्द्धनः ॥ मध्यान्हे मार्गमध्ये तु त्वयाहं दृष्टः
स एककः ॥ गृहीत्वा दक्षिणं पाणिं तं विप्रं धृतवानसि सवेपमानस्त्वद्बुद्धिं जान

ग॰ पु॰ २२

त्वदर्शनयातया॥२२॥ऊचेत्वांस्वांतकंमत्वामूर्छितोजीवितेछया।अत्वं
तेकरुणवाक्यैर्बोधयंस्त्वामहेतुकैः॥२३॥गुणवर्द्धनोवाच॥धनवान्
सुभगोमृत्वाकथंमांहंतुमिच्छसि॥द्विजंनवोढाभर्त्ताररक्षणंतंचानप
राधिनं॥२४॥कुबुद्धिवासनोत्पत्त्यामधर्मेषुमतिंकुरु।प्रथमामेगता।
कांताप्राप्ताकांततरापरा॥२५॥साचारापरमोदारासाध्वीसर्वगुणाक
रा॥पितृणामनृणार्थायधर्मसंतानहृद्ये॥२६॥कृतासानिप्रयत्ने
नग्राहस्त्वंधर्ममिच्छता॥मद्विनातद्विनावाहिजन्मनीभवतोह्यथा
२७॥पितामेहिभवत्वंचमातापुत्रोपिहंतव॥जीवदानाद्यत्राता।
पिताप्राणस्यैनिगद्यते॥२८॥रस्यवोपिहरत्त्वेतिद्विजंवाशरणागतं २२

द्विजेयोग्यंप्रशरणंप्रमामतस्त्वंमोक्तुमर्हसि ।३९। नोचेत्कल्पसहस्रं
वैनिरयान्प्रतिपद्यसे । मोक्तारः सर्वएवैतेस्त्रीपुत्राः सुहृदोजनाः ४०
नपापभागिनस्त्वेतेमुक्तिनस्त्वत्प्रकाशिकाः ।। कियद्भिर्जन्मभिः पापं
भोक्ष्यसेनविनर्तसे ।।४१।। इतिश्रीमद्गणेशपुराणेउपासनाखंडेसोम
कांतपूर्वजन्मनिरूपणंनामसप्तमोध्यायः ।।७।। भृगुरुवाच । इतितेनो
दितंवाक्यंमुद्गलोनिप्रकुर्वता । कर्णाच्युतमाकर्ण्यनाभिन्नेहृद
येतव ।१। वज्रात्सारतरंकिंतुब्रह्मणात्वयिनिर्मितं ।। हिंसनाबहू
जंतूनांमनुष्याणांसहस्रशः ।२। अतिनिष्ठुरतांप्राप्तेकृतघ्नेस्यपु
मानसे । अवोचस्त्वंततस्तंतुकृतांतइवनिष्ठुरः ।३। चोरउवाच । किंते

वाक्यचयैर्दुष्टैर्वृथामयिनियोजितैः॥ अश्मोतरीवपांडित्यंपन्तुञ्जेकुं
मेयथाजलं॥४॥ केयंमममतिर्मूढा क्वोपदेशस्तवाप्ययं॥ तत्व
गु० चिंतेवमधुपेस्यांप्रतंमेनरोचते॥५॥ अर्थाशक्तस्यनक्वापिपितृबं
पु० धुविचारणा॥ यथाकामातुरस्यार्षेनभयंह्रीश्चविद्यते॥६॥ क्षु
२३ द्भिःकाकेद्यूतकृतिसत्यंधैर्यंनपुंसके॥ कामशांतिःस्त्रियांसर्षे
त्तमाहृष्टात्वयानुकं॥७॥ अतिकेत्वंनिसृष्टोसिव्यापाररहित
स्यमे॥ विधात्रादैवयोगेनत्वंमेचामिकर्हिचित्॥८॥ मयुरुवाच
श्रुत्वानिश्चितंएवंतेब्रह्महत्यानांसंख्याकर्तुंनशक्यते॥ स्त्रीबा
लवृद्धजंतूनांहत्यानांचविशेषतः॥ संख्यानापरपापानांभाविनी २३

जायते॥ ततोवृद्धतिथेकालेगतेकामंदत्तेजरा॥२१॥आगताथक
फोत्मानिस्वेदोहिक्काथवेपथुः॥आभूतंतंद्रीचोपविष्टप्रसुसेन
चसाभवत॥२२॥अनादरंचचक्रुस्तेपुत्रादारास्तथासेवकाः॥सुहृद
श्चसुताश्चापिनस्मारोथापिमित्रकाः॥२३॥एकएवाभवत्तत्रदृ
ष्ट्वामोरहस्यकृत॥अनिवार्यगतिर्विप्रः सपातिप्रेषितस्त्वया
२४॥आकारयपितुंसर्वोस्तान्मुनीन्काननवासिनः॥तेचापित्वन्म
यारेवद्विजवाक्यात्समागताः॥२५॥अब्रवीत्तान्नमस्कृत्यम
तोदानानिग्रह्यतां॥तेब्रुवन्नचगृण्हीमोदानानिपतितस्यते
२६॥याजनाध्यापनात्संबंधाज्ज्ञापणरपि॥परंसंचरतेपापंसहया

ग० पु० २४

नासनाशनात् ॥१७॥ इति भाषयमाणस्त्वां गत्वा च निजमाश्रमं ॥ स
स्नुः सचैलं सर्वे पि पावमानीस्ततो जपन् ॥१८॥ ततो नुतापो मनसि जा
कामं दत्ते भृशं ॥ ग्रामपात्स्वजनत्यागाद्ब्राह्मणैः परिवर्जनात् ॥१९॥
जीर्णदेवालयोद्धारे भवत्ते मतिरूर्जिता ॥ धनं स्वं विपुलं वीक्ष्य कु
प्परत्नादिसंयुतं ॥२०॥ ततो नारीः परामूर्त्तिर्गणेशस्य वने प्रभा
जीर्णदेवालये त्त्वं दे स्थिता साकथिता द्विजैः ॥२१॥ ततो ति विस्तृतं
दीर्घं चव स्तोरणसंयुतं ॥ चतुर्द्वारं सुरुचिरं चतुःशिखरशोभितं ॥
२२॥ नानास्तंभचितं नानावेदिभिः परिवारितं ॥ मुक्ताप्रवालरत्ना
द्यैः खचितं रुचिरांगणं ॥२३॥ नानापुष्पद्रुमैर्युतं नानाफलसु २४

निश्रितं ॥ चतुर्दिक्षु चारु वारिमय वापी विराजिते ॥ २४ ॥ प्रसादं निर्मि
तं वतस्तद्द्रव्यं च व्ययं गतं ॥ किंचित्स्त्रिया च पुत्रैश्च सुहृद्भिर्बंधुभिर्हृतं
२५ ॥ ततो नातिचिरे काले पंचत्वं च गतो भवान् ॥ यमदूतैः कशाघातै
र्बद्धः संताडितो भृशं ॥ २६ ॥ कंटकैर्विद्धसर्वांगः शिलायां पोथितोपि
च ॥ मज्जितो नरके घोरे पूयशोणितकर्दमे ॥ २७ ॥ एवं नीतस्तु तैर्दूतै।
श्चित्रगुप्तयमांतिके ॥ यमेन दृष्टः किं पुण्यमुत भोक्ष्यसि पातकं ॥ २८
त्वमवोचः पुण्यमहं पूर्वं भोक्ष्यामि सूर्यज ॥ ततः सौराष्ट्रदेशे त्वं
राजत्वेन हि निर्मितः ॥ २९ ॥ इति ते कथितं पूर्वजन्म पापकरं मया
शरणागतकारुण्यात्तपोबलसमाश्रयात् ॥ ३० ॥ कांतप्रासादकर

ग० णात्सोमकांतोभवान्नृपः ॥ कांतयाकांततनयांभासिकांत्याप्र
पु० शीयया ॥ २१ ॥ सूत उवाच ॥ भृगुणाभिहितंश्रुत्वासोमकांतोनृपा
२५ धमः ॥ तदाकेसंशयापन्नश्चासीदश्पेवनिःक्रियाः ॥ २२ ॥ विदशा
स्त्रार्थविदुषोभूतभाविभवद्विदः ॥ तपस्विनोन्नगोर्वाकेयतःस
संशयंदधौ ॥ २३ ॥ निरगन्नत्क्षणमात्रेणतस्यांगात्पक्षिणोभृशं
नानावर्णाकृतिधराबभूवुर्नृपतिंतदा ॥ २४ ॥ उड्डीयोड्डीयचंच्वग्रैः
दंसुन्नृपमुंदृढैः ॥ उत्कृत्योत्कृत्यमांसानिजग्मुस्तेमुनिसन्निधौ
२५ ॥ ततोतिदुःखिततनुःशरणंपुनरागतः ॥ अब्रवद्दीनयावाचा
भृगुंज्ञानतपोनिधिं ॥ २६ ॥ राजोवाच ॥ तद्वनेजातिवैराणांपरस्पर २५

भयं न हि ॥ त्वत्समस्तं कथमिमे मृतं मां मारयंति वै ॥ ३७ ॥ त्वत्पादस्रवणे
दीनेस्मकुष्टे शरणागते ॥ इदानीं मोचय मुने सर्वे सत्वाभयंकरः ॥ ३८
सूत उवाच ॥ इत्युक्तः पुनरप्याह भृगुस्तं दीनवत्सलः । मद्वाक्यसंशया
दित्थमनुभूतं ते नृप त्वया ॥ ३९ ॥ प्रतीकारं वदिष्यामि स्वस्थो भव रा
जन् नृपः ॥ मम हुंकारमात्रेण गमिष्यंति द्विजा इमे ॥ ४० ॥ सूत उवाच
द्विजास्ते हुंकृतिं श्रुत्वा द्विजाश्चांतर्हितास्तदा ॥ ततो धनपतिश्चा
पि पत्न्यमात्यसमन्वितः ॥ ४१ ॥ इति श्रीमद्गणेशपुराणे उपासनाखं
डे नानापत्तिनिवारणं नामाष्टमोध्यायः ॥ ८ ॥ सूत उवाच ततो भृगुं
स्मरणं ध्यात्वा पुनस्तं प्राह भूपतिः ॥ अत्यंतविकलो दुःखं वीक्ष्य तत्र वै

कर्मजं ॥१॥ भृगुरुवाच ॥ कृपापनिकरास्ते तु क्लेशोपाया कथिता मया । त
च्छ्रापकं ब्रवीमि त्वामुपायमघनाशनं ॥२॥ गणेशस्य पुराणं त्वं ।
ग० श्रोष्यसे यदि सत्वरः ॥ तदैव मोक्ष्यसेऽदुःखसागरान्नात्र संशयः ॥
पु० ३ ॥ इत्युक्त्वा तं गणेशस्य नामाष्टशतमुत्तमं ॥ जप्त्वा जलं मंत्रयि
२६ त्वाशिषेच नृपतिं तदा ॥४॥ सिक्तमात्रे जले तेन तन्नासारंध्रतो ल
घुः ॥ कृष्णो नाम्यतमतक्रूमोवद्दधेतिक्षणादसौ ॥५॥ सप्ततालप्र
माणोऽभूद्व्याधितापो भयंकरः ॥ करालजिह्वो रक्ताक्षः स्पोदरो दीर्घ
ऊर्जे राधरः ॥ मुखाद्रूक्षमनलान्निःक्षिपन्नश्च शयपूर्णेणिते ॥ नेत्राणा
मंधतां कुर्वन्नंधकारस्तथापरः ॥७॥ स्पृष्टंतनं नृपालोकयदद्भुतं स २६

वैतदाश्रमनिवासिनः ॥ दंष्ट्रारावेर्दशदिशः पूरयंतंतमद्भुतं ॥ अरण्यस्त
द्विजवरस्तत्समस्तंतुरुषं ॥ विद्वानपीतिकोसित्वंनामनेकिंवदस्वमे
ष्टं ॥ प्रत्युवाचमुनिंतंतुपरिष्टष्टोद्विजेनसः ॥ प्राणिमात्रशरीरस्थोना
न्याहंपापपूरुषः ॥ २० ॥ त्वन्मंत्रजलपातेननिःसृतोराजदेहतः ॥ क्षु
धातुराभक्ष्यमीहदेहिभक्ष्यंनचेदहं ॥ २१ ॥ भक्षयिष्येमुनेलोकान्
सोमकांतंतवाग्रतः ॥ वदमेवसतिंरम्यामितोनिःसारितस्यच ॥ २२
ततस्तुवहिरभ्येत्यतमुवाचमुनिपुंगवः ॥ अस्मिन्नरसाले[illegible]रसे वि
रसेवसकोटरे ॥ २३ ॥ गलितानिचपत्राणिभक्षयस्वममाज्ञया नोचे
त्तोभस्मसात्कुर्यांनान्यंतमेवचोधम ॥ २४ ॥ सूतोवाच इतितन्मुनिवा

क्यांतेषु षंडस्त्वन्मस्तघातः॥ भस्मसादभवद्दृष्टो द्विजास्तत्स्प
र्शमात्रतः॥ २५॥ मुनेः संदर्शनाद्राजा तस्मिन् भस्मन्यलीयत ॥
ग॰ पु॰ २७ तस्मिन्विलीने स मुनिः सोमकांतं पुनर्जगौ ॥ २६ ॥ भृगुरुवाच ॥ पु
राणश्रवणाद्यत्ते जातं पुण्यं नृपोत्तम ॥ अर्पयं यावच्चूततरुरत्र
चोत्तिष्ठते पुनः ॥ २७ ॥ तावत्संपादयास्मिंस्तद्भस्मन्येव दिने दिने ॥ विरू
ढेऽस्मिंस्तरौ राजन् निःपापस्त्वं भविष्यसि ॥ २८ ॥ राजोवाच ॥ गणेश
स्य पुराणं यन्न दृष्टं न च वै श्रुतं ॥ कुत्र तत्तन्मते ब्रह्मन् व्याकर्त्तस्तस
वा मुने ॥ २९ ॥ मुनिरुवाच ॥ ब्रह्मणा कथितं पूर्वं वेदव्यासाय धीम
ते ॥ व्यासाच्चाविदितं महत्पुराणं पापनाशनं ॥ ३० ॥ अहं च तेन प्रव २७

त्स्पामितीर्थेस्नानंसमाचर ॥ श्रोष्येपुराणमितिचसंकल्पंकुरुसु
व्रत ॥ २१ ॥ सूतउवाच ॥ भृगुणानोदितःस्नात्वाभृगुतीर्थेतिविश्रुते सो
मकांतोमुदायुक्तो ततःसंकल्पमाचरत ॥ २२ ॥ गणेशस्यपुराणंय
तच्छ्रोष्येद्यप्रभृत्यहं ॥ संकल्पमात्रेणकृतेबभौराजानिरामयः ॥
२३ भृगुप्रसादान्नीरक्तः कृमिक्षतविवर्जितः ॥ गृहीत्वातंभृगुरग्रा
द्विस्मितंहर्षितंनृपं ॥ २४ ॥ उपविश्यासनेस्वीयेदापयत्तस्यचासने
उपविष्टोबभाषेतंदिव्यकांतिर्नृपोत्तमः ॥ २५ ॥ नृपउवाच ॥ तवप्रसा
दात्सकलागरिष्टाःसंकल्पमात्रेणगताव्यथामे ॥ आश्चर्यभूतंस
कलेवरस्यपुराणमेतद्धिरदाननस्य ॥ २६ ॥ भृगुरुवाच ॥ शृणुष्वाव

हितो भूत्वा नमस्य राणां वदाम्यहं ॥ अनंतगुणपनिचयैरस्य श्रवणगोचरा
२७ स्मृतिस्तस्य ध्येतपुंसो नान्यथा पापकारिणः ॥ यस्याकर्णनमात्रेण
गं० सप्तजन्मार्जितान्यपि ॥ २८ लघुस्थूलार्दशुष्कानि पापानि च महां
पु० त्यपि ॥ तत्क्षणाद्विलयं यांति गणेशस्य प्रसादतः ॥ २९ अव्ययस्या
२८ प्रमेयस्य निर्गुणस्य निराकृतेः ॥ मनोवागनिरूप्यस्य केवलानंद
रूपिणः ॥ ३० यस्य स्वरूपं न विदुर्ब्रह्मेशानादयः सुराः ॥ सहस्रव
दनोप्यस्य महिमानं न च क्षमः ॥ ३१ ॥ यावद्विशेषविदपि प्रवक्तुं राज
सत्तम ॥ मया यथा श्रुतं वाक्यात्तत्पुराणं स्तु गणपदं ॥ ३२ ॥ अतींद्रिय
ज्ञानवतो व्यासस्यामिततेजसः ॥ मत्तविघ्नेसशोकानां दद्मः कथा २८

वमुजलात॥३३॥यस्यभक्तिईढाराजनगणेशेसर्वसिद्धिदे॥सएवभ्रष्ट
एउयान्वितंनवाच्यंताहृशेतरे॥३४॥यदिसर्वेपिकुर्वीरनविघ्नराज
स्यसेवनं॥कृतदाविघ्ननिचयाविचरेयुर्यथासुखं॥३५॥उःखान्यनु
भवेयुःकेनानाविरहजान्युत॥चकारेदंपराव्यासोभूतभव्यभवि
ष्यवित्॥३६॥वेदार्थज्ञानरहितानवेदाध्ययनवर्जितान्॥वर्णाश्र
माचारभ्रष्टान्जातिसंकरकारिणः॥३७॥कलौविलोक्यतुज
नात्कुटिलान्पापकारिणः॥अष्टादशपुराणानिकृतवान्धर्मगुप्त
ये॥३८॥तावंतुपपुराणानिततोर्थान्बुबुधुर्जनाः॥ततएवगणेश
स्परूपंजानंत्यमीजनाः॥३९॥इतिश्रीगणेशपुराणेउपासनाखंडेरा

ज्ञोपदेशकथनेनामनवमोध्यायः॥९॥नयरुवाच॥नारायणांशसंभूतः
ग० पारशर्योमहामुनिः॥अतीतानागतज्ञानंवेदशास्त्रार्थतत्त्ववित्॥१॥
पु० कृत्वावेदंचतुर्भागंतदर्थज्ञानसिद्धये॥स्वविद्यामदगर्वेणपुराणंकर्तु
२९ मारभत्॥२॥समाप्तिसाधनंनैवकृतवान्मंगलंपुरा॥गणेशस्यनतिं
वापिस्तुतिंवान्यस्यवाक्वचित् ३॥ततोविघ्नाभिभूतःसन्नर्थंकिंचि
न्नचास्मरत्॥भ्रांतिरेवाभवत्तस्यलौकिकेलौकिकेपथि॥४॥नित्ये
नैमित्तीकेकाम्येश्रौतेस्मार्त्तेचकर्मणि॥व्याप्ताव्याप्तातुवेदशास्त्राण्यस
र्वज्ञस्यसतोपिच॥५॥औषधीभिश्चमंत्रैश्चभग्नवीर्यइवाहिराट्॥त ॥ २९
स्तंभेस्वात्मनिभ्रांतहेतुंनाध्यगच्छत॥६॥ततोगच्छत्सत्यलोकंधाता

रं प्रष्टुमादरात् ॥ विस्मयाक्रांतहृदयो ह्रीणः पाराशरो मुनिः ॥ ७ ॥ नमस्कृ
त्वा देवगणान्देवर्षीन्कमलासनं ॥ इजितो ब्रह्मणा दत्ते नियसादासने
शुभे ॥ ८ ॥ पाणिना चास्पृशत्पादौ पाराशर्यो महामुनिः ॥ प्रणयावनतो
भूत्वा ब्रह्माणं प्रष्टुमारभत् ॥ ९ ॥ व्यास उवाच ब्रह्मन्नद्भुतमेतद्धि किं
मे दैवादुपस्थितं ॥ वेदार्थान्निपुराणानि कर्तुं मे बुद्धिरागता ॥ १० ॥ अवे
क्षतोखिलान्लोकान्ज्ञानाचारविवर्जितान् ॥ कलौकर्मजडं
स्तब्धान्नास्तिकान्वेदनिंदकान् ॥ ११ ॥ विधिं चैव निषेधं च ज्ञास्यंति
मम वाक्यतः ॥ ममैव तु गतं ज्ञानं भ्रांतः क्लीव इवाभवं ॥ १२ ॥ न हेतुं तत्र पश्या
मि स्फूर्तिः कापि न जायते ॥ तद्धेतुं स्फूर्तिहेतुं च प्रष्टुं त्वामहमागतः ॥

ग० पु० ३०

२३ अन्यं कं शरणं यामि विना त्वां चतुराननं ॥ सर्वज्ञः सर्वकर्त्ता त्वं मम
भ्रांतिं निवारय ॥ २४ वद हेतुं मम भ्रांते नारायणस्वरूपिणः ॥ नित्याचा
रवतो ब्रह्मन् सर्वज्ञस्य सतोपि च ॥ २५ ॥ सूत उवाच ॥ एवमाकर्ण्य तद्वाक्यं
विचार्य कमलासनः ॥ प्रणतं मुनिमभ्याह प्रहसन् विस्मयन्निव ॥ २६ ॥ ब्र
ह्मोवाच ॥ अहं ते कथयिष्यामि गतिं सूक्ष्मां हि कर्मणां ॥ विचार्य सम्यक्
कर्त्तव्यं कर्म साधितरश्च यत् ॥ २७ ॥ अन्यथा कुर्वतः पुंसः कृतं न भवति चान्य
था ॥ बुद्ध्यायुक्त्याजवेनापि गुरूणि च लघूनि च ॥ २८ ॥ कार्याणि साध
येद्धीमान्न गर्वान्न च मत्सरात् ॥ वाहनत्वं समापन्नो गर्वेण तु क
पीश्वरः ॥ २९ ॥ मत्सरान्नाशितं सर्वं मांबिकेयस्तुते न च ॥ मत्सराद्देवरा ३०

मेएम्द्वत्रमुत्सादितंपुरा ॥२०॥ योनादिनिधनोदेवोजगत्कर्त्ताजगन्मयः॥
जगद्धाताजगद्धर्त्तासदसद्व्यक्तमव्ययं ॥२१॥ योग्रंकर्त्तुमन्यथाकर्त्तुंशक्तः
कर्त्तुंचसर्वदा ॥ यस्याज्ञावशगानित्यंदेवाइंद्रपुरोगमाः ॥२२॥ अहंविष्णु
श्चरुद्रश्चसूर्याग्निवरुणादयः ॥ योविघ्नकर्त्ताभक्तानांविघ्नकर्त्तातर
स्यच ॥२३॥ तस्मिंस्त्वंकृतवान्गर्वंस्वविद्याबलसंश्रयात् ॥ सर्वज्ञता
भिमानेननस्मृतंशुजनेत्वया ॥२४॥ स्मरणंवागणेशस्यप्रारंभेन्यस्य
वात्वया ॥ आरंभेसर्वकार्याणांप्रवेशेवाथनिर्गमे ॥२५॥ श्रौतेस्मार्ते
लौकिकेयःस्मृतोविघ्नंकरोतिच ॥ यमाहुःपरमानंदंयमाहुःपर
मांगतिं ॥२६॥ यमाहुःपरमंब्रह्मवेदशास्त्रार्थदर्शिनः ॥ तेगच्छशरणंव

त्मद्विरादाननमादरात् ॥ २७ ॥ सचेत्प्रसन्नो भगवान् वांछितं मे करिष्य
ति ॥ नो चेद्वर्षसहस्रेण न स्ववांछामवाप्स्यसि ॥ २८ ॥ व्यास उवाच ॥ का
ग० सौ गणेशः किंचास्य रूपं वेद्यं कथं च तत् ॥ कस्य वायं प्रसन्नोभूत्त्व
पु० ं ब्रूहि चतुरानन ॥ २९ ॥ कति वा ह्यवताराश्च किं किं कार्यं च वै कृतं ॥
३१ पूर्वं च पूजितः केन कस्मिन्कार्ये स्मृतोपि च ॥ ३० ॥ मम विस्मितचि
त्तस्य पृच्छतः प्रपितामह ॥ एतत्सर्वं सुविस्तार्य ब्रूहि मे करुणानिधे ॥ ३१ ॥
इति श्री गणेशपुराणे उपासनाखंडे व्यासप्रश्नवर्णनं नाम दशमो
ध्यायः ॥ १० ॥ भृगुरुवाच ॥ जगाद भूप चतुराननस्तमेवं कृतप्रश्नवि
वस्तयाथ ॥ क्रमेण सर्वं कथयामि तेहं गणेशमंत्रान्बहुधा विचार्य ॥ १ ॥ ३१

ब्रह्मोवाच ॥ अनंताहि मुने मंत्रा गणेशस्य महात्मनः ॥ उपासनां वदिष्या
मि शीघ्रसिद्धिकरस्य ते ॥ २ ॥ सप्तकोटि महामंत्रा गणेशस्यागमे स्थिताः
तदहस्यं पि शिवो वेद किंचित्किंचिदहं मुने ॥ ३ ॥ षडक्षरैकाक्षरयोः श्रेष्ठ
त्वं तेषु विद्यते ॥ ययोः स्मरणमात्रेण सर्वसिद्धिःकरे भवेत् ॥ ४ ॥ जीवन्मु
क्ता भवंत्येव यदुपासनया मुने ॥ तएव धन्यास्ते पूज्यास्ते नमस्याः सुरैर
पि ॥ ५ ॥ यदुपासनया दास्यं येषां कुर्वंति सिद्धयः ॥ इच्छाविहाराः सर्वज्ञाः
नानारूपा भवंतिते ॥ ६ ॥ ये कुर्वंति गणेशस्य भक्तिं भावसमन्विताः ॥
न येषां भक्तिलेशोपि तेषां जन्म निरर्थकं ॥ ७ ॥ नालोकयेन्मुखं तेषां वि
मुखा ये गजानने ॥ तेषां दर्शनमात्रेण विघ्नानि स्युः पदे पदे ॥ ८ ॥ विघ्ना

त्युपशमं यांति तदुपासकदर्शनात् ॥ तन्नमस्यंति भूतानि स्थावरा-
णि चराणि च ॥ ९ ॥ अतस्तेहं प्रवक्ष्यामि मंत्रमेकाक्षरं शुभं ॥ तदनु
ग० ष्ठानमात्रेण वांछितं समवाप्स्यसि ॥ १० ॥ अनुष्ठानं प्रवक्ष्यामि यथो
पु० क्तं शंभुना मम ॥ स्नानं कृत्वा धौतवस्त्रे परिधाय शुचिर्नरः ॥ ११ ॥ चै
३२ लाजिनकुशैः कृत्वास्वासनं साधकः सुधीः ॥ तस्मिनस्थित्वा भूत
शुद्धिं प्राणानां स्थापनं तथा ॥ १२ ॥ अंतर्वहिमातृकाणां न्यासं कु
र्यादतंद्रितः ॥ प्राणायामं ततः कुर्यान्मूलमंत्रं जपेन्हृदा ॥ १३ ॥ मं
त्रसंध्यामुपासीत आगमोक्तां यथाविधि ॥ आपादमस्तकं देवं ध्या
त्वा निश्चलचेतसा ॥ १४ ॥ मानसैरुपचारैस्तं पूजयेत्तु समाहितः त ३२

तोजपेद्यथाशक्तिपुरश्चरणकारकः॥१५॥अनुकूलोभवेद्यावद्वरंसा
तुंगजाननः॥स्वरूपेदर्शयेयावत्तावज्जपपरोभवेत्॥१६॥मुद्गलउवाच
एवमुक्त्वामुनिंब्रह्माविघ्नलोकायभवाम्यहं॥एकांतरंमंत्रराजंए
कार्णंगणपस्यसः॥१७॥अशिक्षयत्तदासर्वंसंभ्रांतंमुनिसत्तमं॥क
उवाच॥सूर्यकोटिप्रतीकाशंवरंदातुंसमागतं॥१८॥यदातद्दृश्यसितेदे
वंतावच्चित्तंस्थिरीकुरु॥ममैवहृदयेनित्यंस्थिरोभवगजानन॥१९॥या
चस्वेतिवरंतस्मात्ततदास्वपत्यसंशयं॥हृदिस्थितंत्रदेवेशोदिव्यंज्ञान
मवाप्स्यसि॥२०॥मृतंतस्माविमवच्चैवंज्ञास्यसित्वमशेषतः॥हित्वाभ्रांतिं
हृदावत्सनानाग्रंथान्करिष्यसि॥२१॥[illegible]उवाच॥गताभ्रांतिर्ममपि

तरुपदेशे कृते त्वया अनुष्ठानं करिष्यामि पितामह तवाज्ञया ॥
ग० २२ ॥ ब्रह्मोवाच ॥ एकांते निर्जने देशे व्यग्रता हेतुवर्जिते ॥ अनुष्ठा
१० नं कुरु सविभोगजाननमनुस्मरन् ॥ २३ ॥ नास्तिके निंदके क्रूरे ना
३३ चारे चखले षठे न वक्तव्यो मंत्रराजस्त्वादृशे शरणागते ॥ २४ ॥ दृ
ढभक्ते श्रद्दधाने विनीते वेदवेदिनि ॥ साकांते निरनुक्रोशे शा
स्त्रज्ञे च प्रकाशय ॥ २५ ॥ प्रापयत्येव नरकान् दश पूर्वान् दशापरान्
मंत्रराजस्य वक्तारमप्रकाश्ये प्रकाशितः ॥ २६ ॥ योजयेऽक्तिपू
र्वं तु स लभेदीप्सितं फलं ॥ पुत्रपौत्रसमायुक्तो धनधान्यसमन्वितः
२७ ॥ एकरंतप्रभावेन लब्ध्वा ज्ञानं सुनिर्मलं ॥ इहभुक्त्वाखिलान् ३३

भोगानंतेमोक्षमवाप्नुयात्‌ ॥२८॥ इतिश्रीगणेशपुराणेउपासनाखंडेमंत्र
कथनंनामैकादशोध्यायः ॥११॥ सूत उवाच ॥ इतिश्रुत्वातुवचनंनिर्गतं
ब्रह्मणोमुखात्‌ ॥ हर्षेणमहताविष्टो मुनिः पप्रच्छतत्पुनः ॥१॥ व्यास उ०
श्रवणाद्यनेमयाप्राप्तंपीत्वावागमृतंतव ॥ इदानींश्रोतुमिच्छामि मंत्ररा
जमिमंप्रति ॥२॥ कोजजापकथंसिद्धिमवापचगजाननात्‌ ॥ एतन्मेसंश
यंछिंधित्वत्तोन्योनास्तिमेगुरुः ॥३॥ ब्रह्मोवाच ॥ इत्येवंमुनिहृष्टोसौ
जगादवदतांवरः ॥ कृपयावनतंब्रह्मातंव्यासंराजसत्तम ॥४॥ ब्र
ह्मोवाच ॥ साधुसाधुत्वयापृष्टंपुण्यवानसिसांप्रतं ॥ नह्यपुण्यवतां
ब्रह्मन्कथायाःश्रवणेरतिः ॥५॥ उपासनामार्गमिमंसम्यक्कृत्वाबो

धयाम्यहं ॥ स्निग्धेप्रज्ञाधिकेशिष्येयतोगोप्यंनकिंचन ॥ ६ ॥ ॐका
ग० ररूपीभगवानुक्तस्तेगणनायकः ॥ यथासर्वेषुकार्येषुपूज्यते
पु० सौविनायकः ॥ ७ निर्विघ्नकामनावद्भिर्नोचेद्विघ्नंकरोतिसः
३४ तथोंकारबीजयुक्ताॐकारपल्लवान्विताः ॥ ८ ॥ मंत्राःसर्वेग
मेप्रोक्ताअन्येयेनिष्फलाश्चते ॥ सरसद्यत्कमव्यक्तेसर्वेहि
गणनायकः ॥ ९ ॥ एवंसर्वेदेवसिद्धमुनिराक्षसकिन्नराः ॥ गंध
र्वाश्चारणानागायक्षगुह्यकमानवाः ॥ १० ॥ उपासकागणेशस्य
सर्वेलोकाश्चराचराः ॥ अतएवगणेशाद्धिपरंकिंचिन्नविद्यते ॥ ११ ॥
इदानींकथयिष्येहंकथामेकांपुरातनीं ॥ मंत्रराजजपेनायंय ३४

थात्तुष्टोगजानननः ॥२२॥ कदाचिद्दैवयोगेन प्रलये समुपस्थिते वा

युभिः पर्वतास्भिन्नाः पतंति परितो दिशं ॥२३॥ तपंति द्वादशादि

त्याः शोषयित्वा जलं महत् ॥ ज्वालामाली महावन्हिरदविले जल

यत्यपि ॥२४॥ संवर्त्तकामहामेघावर्षंति परितो जलं ॥ हस्तिहस्तो

पमाभिस्तु धाराभिर्द्विजसत्तम ॥२५॥ उल्लंघयंति मर्यादां सागा

राः सरितोपि च ॥ एवं सर्वे विनश्यंति आब्रह्मस्थावरादयः ॥२६

एवं मायामये नष्टे विकारे सोगजाननः ॥ अणुभ्योणुतरं रूपं

कृत्वा क्वापि च अवस्थितः ॥२७॥ ततः कालेव कुत्र गते धतमसा

हते ॥ एकाक्षरंभुवनं ब्रह्मनादयुक्तमजायत ॥२८॥ वैकारिकं पुनारू

पंयदानंदमयंस्थितं॥मायाविकारमासाद्यतदेवाभूत्कजान
नः॥१९॥ततएकचसंभूतागुणाःसत्वरजस्तमः॥ततस्त्रियःसमु
ग० त्पन्नाविष्णुर्ब्रह्माहरोपिच॥२०॥माययारचितंसर्वंत्रैलोक्यंस
पु० चराचरं॥ततस्तन्माययाभ्रांताबभ्रमुस्तेसुरास्त्रियः॥२१॥तमेव
३५ जनकंस्वस्यद्रष्टुंप्रष्टुंसमुत्सुकाः॥किमस्माभिःकर्मकार्यमि
तिजिज्ञासयामुने॥२२॥एकविंशतिस्वर्गाणिपूर्वमूर्द्धंविलो
क्यते॥अंतरिक्षंतथातिर्यक्पश्चात्पातालमाययुः॥२३॥अग्रह
ष्टापरमात्मानंतपश्चेरुस्ततोभृशं॥निराहाराजप्यपरादिव्य ३५
वर्षसहस्रकं॥२४॥श्रांताःखेदमनुप्राप्तास्ततस्तेष्टघिवीगुनः॥

विचिन्वंतोययुर्द्दृष्टुं वनान्युपवनानिच २५ सरितः सागरान्शैला
न्शिखराणिगुहाम्यपि ॥ ततोजलाशयंतेतुमहांतंददृशुःपुरः ॥ २६
नानाजलचरैर्द्दृष्टैः पक्षिभिर्विविधैर्युतं ॥ बलाकाभिश्चचक्रवाकैः
हंसैःकारंडवैरपि ॥ नादितंनलिनीजालबिसखंडाशनैरतैः ॥ स्ना
त्वाविश्रम्यतत्तीरे समुत्तीर्यपुरोययुः ॥ नानावीचिसमायुक्तं म
हांतंतेजलाशयं ॥ शुद्धस्वरतरंगांभो झषनक्रसमाकुलं ॥ २९ ई
क्षांचक्रुःशुद्धदेशं प्रलयानलसन्निभं ॥ कोटिसूर्यप्रतीकाशंतेजोरा
शिंपुरोमुने ॥ ३० ॥ चिंतामापुःपरांतेतुतेजसाहतदृष्टयः ॥ ततोगगनमा
र्गेणतेजोमध्याद्विनिर्गतः ॥ ३१ ॥ क्षुधात्तृषापरिश्रांतानिश्वसंतोमुहु

ग० पु० ३६

मुकुं:॥ निंदंतश्च शपंतस्ते स्वात्मानं ज्ञातसाध्वसाः॥३२॥ नत्वेतिकरु
णाविष्टो लोकाध्यक्षोऽखिलार्थवित्॥ दर्शयामास तान् रूपं मनोन
यननंदनं॥३३॥ पादांगुलीनखश्रीभिर्जितरक्ताब्जकेसरं॥ रक्तांबर
प्रभाव्रातजितसंध्यार्कमंडलं॥३४॥ कटिसूत्रप्रभाजालैर्जितहेमा
द्रिशेखरं॥ खड्गखेटधनुःशक्तिशोभिचारुचतुर्भुजं॥३५॥ सुनसं
पूर्णिमाचंद्रजितकांतिमुखांबुजं॥ अहर्निशप्रभायुक्तपद्मजिच्चारु
लोचनं॥३६॥ अनेकसूर्यप्रभाजिन्मुकुटभ्राजिमस्तकं॥ नानारं
कितव्योमकांजिदुत्तरीयकं॥३७॥ वराहदंष्ट्राशोभाजिद्देकदंतवि
राजितं॥ ऐरावतादिदिक्पालभयकारिशुभ्रपुष्करं॥३८॥ दृष्ट्वैवं स ३६

हसादेवंप्रणेमुस्तेमुदाम्मुने ॥ इतिश्रीगणेशपुराणेउपासनाखंडे गजा
ननेदर्शनंनामद्वादशोध्यायः ॥१२॥ व्यासउवाच पंचास्यश्चतुरास्यश्च
सहस्रमस्तकोपिच ॥ गजास्यंवरदंदेवंकथमेतेप्रतुष्टुवुः ॥१॥ ब्रह्मोवा
प्रमादेशान्मुखविघ्नेशकृपापांगनिरीक्षणात् ॥ प्राप्तबुद्धिप्रसादास्ते
केशणस्तेतुष्टुवुस्तदा ॥२॥ वयऊचुः ॥ अजंनिर्विकल्पंनिराकारमेकं
निरालंबमद्वैतमानंदपूर्णं ॥ परंनिर्गुणंनिर्विशेषंनिरीहं परब्रह्म
रूपंगणेशंभजेम ॥३॥ गुणातीतमाद्यंचिदानंदरूपं चिदाभासकं
सर्वगंज्ञानगम्यं ॥ मुनिध्येयमाकाशरूपंपरेशंपरब्रह्मरूपंगण
णेशंभजेम ॥४॥ जगत्कारणंकारणज्ञानहीनंसुरादिंसुखादिंयु

गादिं गणेशं ॥ जगद्व्यापिनं विश्ववंद्यं सुरेशं परब्रह्मरूपं गणेशं
भजेम ॥ ५ ॥ रजोयोगतो ब्रह्मरूपं श्रुतिज्ञं सदा कार्यसक्तं हृदाचिंत्य
ग० रूपं ॥ जगत्कारकं सर्वविद्यानिधानं परंब्रह्मरूपं गणेशं नताः स्मः ॥ ६
पु० सदा सत्वयोगं मुदा क्रीडमानं सुरारीन्हरंतं जगत्पालयंतं अने
३१ कावतारं निजाज्ञानहारं सदा विष्णुरूपं गणेशं नमामः ॥ ७ ॥ तमोयो
गिनं रुद्ररूपं त्रिनेत्रं जगद्धारकं तारकं ज्ञानहेतुं ॥ अनेकागमैः स्वं
जनं बोधयंतं सदा शर्वरूपं गणेशं न० ॥ ८ ॥ तमस्तोमहारं जनाज्ञान
हारं त्रयीवेदसारं परंब्रह्मपारं ॥ मुनिज्ञानकारं विदूरे विकारं
सदा ब्रह्मरूपं ग० ॥ ९ ॥ निजैरोषधीस्तर्पयंतं करोघैः सुरौघान्क ३१

त्वामिह सुधास्त्राविणीभिः॥ दिनेशांशुसंतापहारं द्विजेशं शशांकस्व
रूपेण॰ ॥१०॥ प्रकाशस्वरूपेन नभोवायुरूपं विकारादिहेतुं कलाका
लभूतं ॥ अनेकक्रियानेकशक्तिस्वरूपं सदा शक्तिरूपेण गणेशं न॰
११ ॥ प्रधानस्वरूपं महत्तत्त्वरूपं धरावारिरूपं दिगीशादिरूपं असत्
सत्स्वरूपं जगद्धेतुभूतं सदा विश्वरूपेण गणेशं नताः स्मः॰ ॥१२॥ त्वदी
ये मनः स्थापयेदंघ्रियुग्मे जनो विघ्नसंघान्न पीडां लभेत लसत्
सूर्यबिंबे विशाले स्थितेयं जनो ध्यातपीडां कथं वा लभेत ॥१३॥ व
यं भ्रामिताः सर्वथाज्ञानयोगादलब्धास्तवांघ्रिं बहून्वर्षपूगान् ॥
इदानीमवाप्तास्तवैव प्रसादात्प्रपन्नान्सदा पाहि विश्वंभराद्य ॥१४

एवंस्तुतोगणेशस्तुसंतुष्टोभून्महामुने॥कृपयापरयोपेतो
भिधातुंतान्प्रचक्रमे॥२५॥गणेशउवाच॥यदर्थंक्लेशितायूयंय
ग° दर्थमिहचागताः॥प्रीतोहमनयास्तुत्यावरंमत्तोवृणीततं॥
पु° २६॥कृतंचममयत्स्तोत्रंभवद्भिःभावितात्मभिः॥स्तोत्रराजमि
३८ तिख्यातंभविष्यतिममाज्ञया॥२७॥इदंयःपठेत्प्रातरुत्थाय
धीमान्त्रिसंध्यंसदाभक्तियुक्तोविशुद्धः॥सपुत्राञ्छ्रियंसर्व
कामान्लभेतपरब्रह्मरूपोभवेदंतकाले॥२८॥इतितद्वचनं
श्रुत्वासंतुष्टास्तेतमब्रुवन्॥तदिच्छयारजःसततमायुगणसमु ३८
द्भवाः॥२९॥त्रयऊचुः॥यदितुष्टोसिदेवेशसृष्टिसंहारकार

क॥ तवांघ्रिकमलेनोस्तुभक्तिरव्यभिचारिणी॥२०॥ किंचास्माभि
श्चकर्तव्यमाज्ञापयतुनोभवान्॥ अयमेववरोस्माकंवांछितोद्वि
रदाननः॥२१॥ इतिश्रुत्वावचस्तेषांपुनःप्राहगजाननः॥ भविष्य
तिमहाभागामयिभक्तिरीदृशीहवः॥२२॥ संकष्टानियथायूयंतरि
ष्यथमहोत्स्वपि॥ भवतस्मात्पैप्रवक्ष्यामिकार्याणिचपृथक्पृ
थक्॥२३॥ सृष्टिकर्ताभवब्रह्मन्त्वंरजोगुणसमुद्भवः॥ पालनेकु
रुविष्णोत्वंव्यापकःसत्वसंश्रयः॥२४॥ हरसंहरसर्वंत्वंतमोगु
णसमुद्भव॥ वेदशास्त्रपुराणानिसृष्टिसामर्थ्यमेवच॥२५॥ ददौ
गणेशोन्योविधात्रेब्रह्मणेपरमात्मने॥ विष्णवेभगवान्प्रादाद्योगा

ग० नस्तत्वंदस्तपतो ॥२६॥ एकादशरंषडर्णंचमंत्रंसर्वागमांस्तथा ॥ हराय
पु० भगवान्प्रादाच्छक्तिंसंहरणेपिच ॥२७॥ ततोब्रह्मादीनमनास्त्रै
३९ लोक्येशंजगद्गुरुं ॥ उवाचप्रांजलिर्भूत्वावरदंतमिभाननं ॥२८॥
ब्रह्मोवाच ॥ यथागृहीतशक्तिस्तुवाच्यावाच्यंविवक्तिन ॥ तथा
नेकविधांसृष्टिमहंस्रष्टाकापिकिंचन ॥२९॥ कर्तुंवापिविभोराज्ञां
विनेरकथमुत्सहे ॥ इतःरूपद्भूतोवापीत्येवंप्राह्यंमयाकथं ॥३०॥ त
तोगजाननःप्राहहरिश्चचतुःश्रवायत ॥ ब्रह्माणंचेरशास्त्रंतेतथा
व्याकुलितंप्रभुः ॥३१॥ गजाननउवाच ॥ वहिरंतःशरीरेमेसंख्याती
तानिपश्यज ॥ ब्रह्मांडानित्वमद्येवबभ्रमंतिविलोकय ॥३२॥ ततो ३९

गजाननेनासौस्वोदरे श्वासवायुना। नीतोददर्शधातापिब्रह्मांडान्यनि
त्वनेकशः ॥३३॥ कोटिशोब्रह्माणीवतराणेत्रवामशकानि च ॥ भ्रमयामासत
त्रैकंपरमेणस्वतेजसा ॥३४॥ तदंतःसकलांसृष्टिंददर्शकमलासनः ब्र
ह्माणंचापरंतत्रविष्णुमिंद्रंप्रजापतिं ॥३५॥ शंकरंभास्करंवायुंवनानि
सरितोंबुधीं ॥ सागरान्यक्षगंधर्वानप्सरःकिंनरोरगान् ॥३६॥ ऋषी
न्मुनिगणान्साध्यान्मनुष्यान्पर्वतान्द्रुमान् ॥ उद्भिजान्जारजा
न्जंतून्स्वेदजानंडजानपि ॥३७॥ पृथिवींसप्तपातालान्यप्ययानेक
विंशतिं ॥ ददर्शविश्वंब्रह्मैवंभावाभावंचराचरं ॥३८॥ यद्यद्ब्रह्माभेद
यामासचांडंतस्मिंस्तस्मिन्सर्वमेवंददर्श ॥ दृष्ट्वाश्चर्यातिंशर्ववत्संपे

प्रवेदते वाक्यमंतं सर्वथा नाध्यगच्छत ॥३९॥ न स्थातुं नैव वा गंतुं शशा
क कमलासनः ॥ उपविश्य ततो ब्रह्मा तुष्टाव द्विरदाननं ॥४०॥ ब्र
ग॰ ह्मोवाच ॥ वंदे देवं देवदेवं गणेशं ब्रह्मांडानां नैव संख्या यदंगेत्रे
पु॰ एरूनां सागरेवाकुवाणां कः संख्याता शर्कराणां च तीरे ॥४१॥ लज्जा
४० न मेत्रास्ति सुरेंद्रवंद्यपादारविंदं तव यद्विलोक्य ॥ भ्रांतो भवं ज्ञानवि
धौ प्रपन्नो मोहात्तो पितुष्टः किमुतान्यवार्ता ॥४२॥ दृष्टं च नानार्थयुतं
सुरेश ब्रह्मांडकूटं जठरे त्वदीये ॥ स्थातुं बहिर्गंतुमपीह नेश स्त्वद
न्यदेवं शरणं च नोमि ॥४३॥ ततः प्रसन्नो भगवाननंतमूर्तिर्गजान
नः ॥ बहिर्निःकाशयामास ब्रह्माणं खिन्नमानसं ॥४४॥ नासिकारं ४०

प्रमार्गेण हरिं मदनुयायिनं ॥ तामसं च हरं देवो ब्रह्मणा सह संगतं ॥ ४५
निःसारयामास विभुः स्तुतिरेधाऽजाननः ॥ श्रूयाते स्म तदंगे तावुभौ
हरिहरौ सुखं ॥ ४६ ॥ इति श्रीमद्गणेशपुराणे उपासनाखंडे ब्रह्मास्तुति
वर्णनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ राजोवाच ॥ किमकरोद्ब्रह्मा वीक्ष्यां
डानि सहस्रशः ॥ कथं च सृष्टिमकरोदाज्ञां प्राप्य गजाननात ॥ १ ॥ स्तउ
वाच ॥ अभवत्सर्वसंपन्नः स्वात्मन्येवं व्यचारयत् ॥ वेदशास्त्राणि वेदां
श्च पुराणान्यागमानपि ॥ ज्ञानविज्ञानसंपन्नः स्वपाणौ ग्रहशक्तिमा
न् ॥ २ ॥ ब्रह्माण्डानि च दृष्टानि सृष्टीनां रचनास्तथा ॥ इदानीं सृष्टिकरणे
शक्तं मे नैव किंचन ॥ ३ ॥ इत्येवं गर्वसंपन्ने हृत्पद्मे कमलोद्भवे ॥ विघ्नाना

नाविधान्रूपशाखाउरामम्लहस्तशः ॥४॥ तंवेष्टयित्वाब्रह्माणंस्थिताःप
रमदारुणाः ॥ यथासक्ताः पुष्परसैः सरघामधुजालके ॥५॥ त्रिनेत्राःपंच
ना० हस्ताश्चकूपास्याः सप्तपाणयः ॥ व्यंघ्रयः पंचतुंडाश्चसप्ततुंडाःष
पु० डंघ्रयः ॥६॥ दशास्याःपंचपादश्चतालदंताष्टकोदराः नानारूपाः
४२ महासत्वाः संप्रापुर्नचतेक्षमाः ॥७॥ चकंपेद्रुहिणस्तेषांनानारा
वान्निशाम्यतान् ॥ केचित्तंमुष्टिभिर्जघ्नुर्नैशुष्वनंतंभुः परे ॥८॥ चतुः
ग्रीवामुसंगृह्यदोलयामासुरादरात् ॥ चत्वार्यपिमुखान्यस्यजग्र
हुस्तंतथापरे ॥९॥ निनिंदुश्चपरासाचचक्रुः केशिल्पिशेविरे ॥
मोचयामासुरपरेबवंधुरपरेपुनः ॥१०॥ मोचितंपुनरप्यन्येविचक ४२

र्वैरितस्ततः॥ आलिलिंगुश्चतेकेचित्चुचुंबुःश्मश्रुवत्सरे॥ ११॥ अश्रुश्म
श्रुषुतेधृत्वाननर्नैकोष्टहस्तवान्॥ एवंसपरवान्ब्रह्माचिंताशोक
समन्वितः॥ १२॥ अथवर्वैसृष्टिगर्वंतंतत्याजहृदिसंगतं॥ जगाममहतीं
मूर्छांनिराशस्वस्यजीवने॥ १३॥ मुहूर्तमात्रेतुगतेसस्मारमनसावि
भुं॥ प्रार्थयामासकारुण्याद्दन्तिवगजाननं॥ १४॥ मुहूर्तमात्रे
तुगतेसस्मारमनसाविभुं॥ प्रार्थयामासकारुण्याद्दन्तिवगजा
ननं॥ १४॥ ब्रह्मोवाच नचायुष्यंस्वल्पंविविधजननेसक्तमनसोमे
तत्त्वज्ञानंभवजलधितारंसुविमलं॥ जनुर्भूमौलब्ध्वातवभजनतो
यामिपरमांकदाभक्तिंमुक्तिंनिरूपमसुखंचाखिलगुरो॥ १५॥ तत्क

टाक्षाम्रतेनाक्रोभक्तःसीदतितेविभो॥इयंलज्जातवैवास्तांनमेम्र
त्पुष्टिरायुषः॥२४॥इत्यसौप्रार्थयन्नेवशुश्रावगगनेरितां॥गिरि
ग॰ तपस्त्वेतिततःप्रार्थयामासतोपुनः॥२५॥अंतर्हिताश्चतेविप्राःश्रु
पु॰ तायांनभसोगिरं॥नानारूपामहावीर्यामुत्क्वातंकमलासने॥
५२ २६॥समुत्क्रम्यचिंतयामासपद्मयोनिर्महायशाः॥विनामंत्रंवि
नास्थानंकथंतप्स्येतपोमहत्॥२७॥इतिव्याकुलचित्तोसौब्रह्मा
मजलमध्यगः॥ज्ञानन्यममैनसाध्यायन्गजाननमनामयं२०
मुकुटेनविराजंतंमुक्ताहारलसद्भुजांशुभं॥रक्तचंदनलिप्तांगंसिंदू
रारुणमस्तकं॥२९॥मुक्ताहारामलसत्कंठंसर्पयज्ञोपवीतिनं॥स्त्रे ५२

नर्घ्यरत्नघटितबाहुभूषणभूषितं॥२२॥स्फुरन्मरकतभ्राजदंगुली
यकशोभितं॥महाहिवेष्टितदृढहारकाभिशोभिमहोदरं॥२३॥विचि
त्ररत्नखचितकरिसूत्रविराजितं॥सुवर्णसूत्रविलसद्रक्तवस्त्रस
मावृतं॥२४॥भालचंद्रलसद्दंतशोभिराजत्करंपरं॥एवंध्यायति
तस्मिंस्तुपुनरेवनभोवचः॥२५॥उद्यापयव्रतंपश्यपवरंपश्यपेतिसु
दरं॥श्रुत्वेतिवचनंब्रह्मापुनश्चिंतामवापसः॥२६॥इतिश्रीगणे
शपुराणेउपासनाखंडेब्रह्मणश्चिंतावर्णनंनामचतुर्दशोध्यायः
१४ भृगुरुवाच॥ततब्रह्मामहाखमेंददर्शनृपसत्तम॥भ्रमताभ्रम
तातेनजलेदृष्टोवटोमहान्॥१॥महावातातपाभिस्तुनष्टेस्थावर

जंगमे ॥ अवशिष्ट: कथमयमेक एव महानवट: ॥ २ ॥ एवं संशय
मापन्नस्तत्पत्रे बालकं लघुं ॥ चतुर्भुजं ससुमकरं कुंडलाभ्यां विरा
ग० जितं ॥ ३ ॥ मुनिमुक्तामयं दामविचित्रकं सुशोभनं ॥ अर्धचंद्रं रक्त
पु० वस्त्रं करिसूत्रं तथैव च ॥ दृष्ट्वैवं तर्कयामास बालकं कथमत्र वै ए
४३ क इतं नरवपुं गजास्यं तेजसोज्वलम् ॥ ५ ॥ भक्करेण च तद्वाल
कं तन्मस्तके क्षिपत् ॥ ततो ब्रह्मा जहासोच्चै स्मितानंदसम
न्वित: ॥ ६ ॥ एतस्मिन्नहसति बाल: ॥ प्राउत्ततारवटात्तत: ॥ ब्रह्मणं
के समागत्य मंजु वाक्यं जगाद तं ॥ ७ ॥ बाल उवाच ॥ लघोर्लघुतरो सि
त्वं दृष्ट्वा दृष्ट्वोपि मंदधी: ॥ विघ्नेशमिह तोसित्वं स्वस्थचित्तासमाहृत: ४३

८ ॥ तपश्चिंतापरोनित्यंविघ्नमन्जलमध्यगः ॥ सर्वचिंताहरंचैवसु
पायंचतुराननं ॥ ९ ॥ उपादिशामितेमंत्रमेकाक्षरमयंमम उरश्च
रणमार्गेणदृष्टालक्षंजपस्वतं ॥ १० ॥ ततः प्रत्यक्षतांयास्येदास्ये
सामर्थ्यमुत्तमं ॥ दृष्ट्वैवंस्वप्नमाश्चर्यंप्रतिबुद्धोंबुजासनः ॥ ११ ॥ प्र
योचचकारामेस्यादर्शनेनपरमेशितुः ॥ दृष्ट्वास्वप्नमेवमग्नआनं
दमयसागरे ॥ १२ ॥ ततः स्नात्वापरंमंत्रंजजापबहुवासरं ॥ एक
पादेनकमलेतिष्ठन्ध्यायन्गजाननं ॥ १३ ॥ जितेंद्रियोजिताहा
रः काष्टपाषाणवत्स्थिरः ॥ दिव्यवर्षसहस्रंसतपस्तेपेपरंमह
त् ॥ १४ ॥ ततोस्यमुखतोज्वालाः आडरांसन्डरासदाः ॥ तान्निःस

वीणि भूतानि पीडां मा भुत् सुरारुणां ॥ २५ ॥ ततो गजाननो दृष्ट्वा तानि
ष्टां ब्रह्मणो ध्ववां ॥ तुतोष परया भक्त्या प्रादुरासीत् ततः प्रभुः ॥ २६ ॥ को
ग॰ टिसूर्यसमानश्रीर्ज्वालामालीवृहद्वपुर्मुक दहन्निव त्रिलोकीं
पु॰ स संहरन्निव रोदसि ॥ २७ ॥ परशुं मल्ल धारी दिव्याम्बरी दिव्य मालावि
४४ भूषः सकलदुरितहारी सर्वसौंदर्यकोशः ॥ २८ ॥ करिवरमुख
शोभी भक्तवांछाप्रपोषः ॥ सुरमनुजमुनीनां सर्वविघ्नैकनाशः
२९ ॥ तेजोराशिसहद्दैव चकंपे कमलासनः ॥ चिंतामवापपर
मां व्यथया चितो जपाच्युतः ॥ आच्छादितानीदृक्षाणि स्मृतिर्भ्रं
विलयं गता ॥ ३० ॥ दृष्ट्वा दृशीमवस्थां तां शीघ्रं प्राह हायविघ्नराट् ॥ ३१ ॥ ग ४४

णेशउवाच॥नभयंकुरुलोकेशसएवाहंसमागतः॥येनतेमंत्रप्रा
देशिस्वमग्णकात्तरःप्रभुः॥२१॥तेनसिद्धिरनुप्राप्तामावरंदातुंसमाग
तः॥सौम्यभावंप्रसन्नोस्मिवरंवरयसुव्रत॥२२॥दास्यामितेप्रसन्नो
हंयद्यत्तेहृदिवर्तते॥मयिप्रसन्नेसर्वंतत्भविताऽनात्रसंशयः॥२३॥मु
निरुवाच॥इत्थंनिशम्यगणनाथवचोविशुद्धंब्रह्माजहर्षपरमं
प्रसमीक्षमाणः॥नत्वाचराचरगुरुंसकलैःशिरोभिःप्राहप्रस
न्नहृदयःसकलंजनुर्मे॥२४॥ब्रह्मोवाच॥योवेदानांसहस्रा
णांज्ञातानांयोगिनामपि॥सर्वोपनिषदांचैवगोचरोनकदाच
नसएषप्रत्यक्षयेमेदृष्टिमायातःप्रत्यक्षतोविभुः॥अनादिनिधनो

ग० पु० ४५

योऽनंतोऽप्रमेयोऽनिर्गुणोऽपि च ॥२९॥ यदि प्रसन्नो देवेश विघ्नेश क
रुणाकरः ॥ तव भक्तिं दृढां देहि ययादुःखं न नः स्पृशेत् ॥३०॥
इदानीं देहि सामर्थ्यं नानानिर्माणने मम ॥ विघ्नानि च श
मयां तु त्वयि तुष्टे गजानन ॥३१॥ स्मृतमात्रैस्त्वं सदा मे त्वं स
र्वकार्यं समापय ॥ अंते मुक्तिं स्थिरां देहि ज्ञानं च विमलं म
म ॥३२॥ गजानन उवाच एवमस्तु कुरुष्व त्वं सृष्टिं नानावि
धां बहु ॥ मां स्मृत्वा सर्वविघ्नानि नाशं यास्यंति सर्वतः ॥३३॥
दृढा भक्तिः शुभं ज्ञानं मत्प्रसादाद्भविष्यति ॥ निःशंकं कुरु
कार्याणि सर्वाणि चतुराननः ॥३४॥ मुनिरुवाच ॥ एवं लब्धवरो ४५

ब्रह्मा सृजयामास तं विघ्नं ॥ यद्यच्चित्ते चिंतयत्स तत्तद्देवोपतिष्ठते
२४ ॥ प्रजार्थे देवदेवस्य गणेशस्य प्रसादतः ॥ दक्षिणावसरे हेतु
कन्यके समुपस्थिते ॥ २५ ॥ चारुप्रसन्ननयनवदने सुविराजि
ते अनेकरत्नखचित नानालंकारशोभिते ॥ २६ ॥ दिव्यगंधयु
ते दिव्यवस्त्रमाल्याविभूषिते ॥ ते तस्मै दक्षिणार्थं संकल्पयामा
स पद्मभूः ॥ २७ ॥ र भागर्भेणमी राज्य दिव्यं पुष्पांजलिं ददौ ॥
सहस्रनामभिः स्तुत्वा प्रदक्षिणमथाकरोत् ॥ २८ ॥ नमस्य प्रा
र्थयामास दीनानां शंकरे भव ॥ एवं संसृजितस्तेन ब्रह्मणा परमे
श्रीरतयश्चौषधानिच ॥ मानापमानदानानिप्रकशानिनकारये
पेत् ॥ १२ ॥ इत्थंनिशम्यसमुनिः कोपव्याकुलितेंद्रियः ॥ शशाप
वनितांस्वीयांदुःशीलेत्वंशिलाभव ॥ नास्ताशीमेस्वरूपंतेस्वभा
वेचेष्टितानिच ॥ परेषुंसंनिमग्नंतेयतश्चेतोतिकामुकं ॥ १४ ॥
यदादाशरथीरामोत्रमन्त्राजावनेवने ॥ तस्यांघ्रिस्पर्शनादेव
स्वरूपंप्रतिपत्स्यते ॥ १५ ॥ नारदउवाच तदैवसाशिलाजातात
पोनिधिवचोबलात् ॥ तस्याःशापंसमाकर्ण्यचकंपेपाकशा
सनः ॥ १६ ॥ प्रकंपनस्यसंयोगाद्धिमवत्पर्वतोयथा ॥ तर्कयामा

समनासिकथंकार्यंमयाधुना ॥ १४ ॥ समुद्रमध्येकूपेवानडागे
कमलेथवा ॥ स्त्रीनामूत्वापथास्थास्येतदाज्ञास्यतिमांमु
निः ॥ १५ ॥ अतोविडालरूपेणविचरैश्चारसवञ्चमत ॥ गोत
मस्तमवत्ताणोगृहेद्वारितथाश्रमे ॥ १६ ॥ एकगतोदानवरि
पुर्यांमेभार्याविदूषकः ॥ ध्यानेनवुवुधेतंतत्तपोनमुनिस
त्तमः ॥ १७ ॥ नतेभस्मकरिष्यामिदेवेंद्रोसिपतः खलः ॥ आया
मित्वांशप्चीमत्तः सहस्रभगवान्भव ॥ १८ ॥ श्रुतवान्वच
नंयावद्देधेपामुनिनेरितं ॥ तावद्ददर्शस्वंदेहंसहस्रभ
गचिन्हितं ॥ १९ ॥ ततोऽदुःखार्णवेमग्नः शुशोचवलवृत्रहा

ईश्वरउवाच ॥ अहं शिक्षापितो वृद्धैर्नानाधर्माननेकशः ॥ २३
वृद्धानां वचनं तन्मे नाविचारितमादरात् ॥ स्वबुद्धिर्हि तत्क्ष
तत्सर्वो विनाशाय परेरिता ॥ २४ ॥ गुरोगरीयसी बुद्धिःस्तय
साकामिनी मतिः ॥ कुतो नारदवाक्येन यातोहं तामनिंदि
तां ॥ २५ ॥ देवराज्ञो भवन्त्या स्वं लोकानां दर्शये कथं ॥ दिव्य
देहो गतः क्वाद्य निजभार्यो वदे तु किं ॥ २६ ॥ धिक् मां च धि
क् स्मरं येन प्रापितो गर्हितां दशां ॥ प्राणिभिर्भुज्यते का
मे शुभं वा यदि वा शुभं ॥ २७ ॥ तिर्यग्योनिं समासाद्य दत्तप
यि प्येघमात्मनः ॥ न तिली कुमले तिष्टेरिंद्रगोपकरु

ग०
पु०
६५

पधृक॥२८॥इतिश्रीगणेशपुराणेउपासनाखंडेशक्रशापवर्ण
नेनामएकत्रिंशतितमोध्यायः॥३१॥नारदउवाच॥शक्रेतुनलि
नीयातेतत्सुरंत्वहमागतः॥बृहस्पतिपुरोगांस्तांस्तत्रापश्यं
स्थितान्सुरान्॥१॥तेभ्योह्याकथयंसर्वंसुमयोः — शापकारं॥
अहिल्यायामहेंद्रस्यसंयोगंचविरूपतां॥२॥सहस्रभगतांप्रा
सःशक्रोगौतमशापतः॥अहिल्याधर्षणाद्देवास्तत्संगात्साशि
लाभवत्॥३॥मुनिरुवाच॥श्रुत्वातेनारदोक्तंतत्सर्वेदेवाःसु
चान्विताः॥अतिदुःखाकुलंतस्थोनिःश्वासोच्छ्वासविभ्रमैः॥४
देवाऊचुः॥येनाकरिशतंयज्ञादानवायेननिर्जिताः॥त्रैलोक्यं ६५

पालितं येन शुक्रस्य मैंद्रं पदं शुभं ॥५॥ पूजिता बहवो देवा ब्राह्मणा ब्रह्म
वित्तमाः ॥ भुक्ता नानाविधा भोगा ॥ अन्येषामतिदुर्लभाः ॥६॥ कुत्र
स्यास्य स सौदेवो भोक्तते स्वस्यते कथं ॥ कमद्य शरणं यामः सकृ
तेनत्त्कृते पिवा ॥७॥ पालयिष्यति कोस्मानैपरमैंद्रं शचीतथा ॥
कथं प्रसन्नतां यायाज्जौतमो मुनिसत्तमः ॥८॥ स्त्रीयज्ञार्या विधु
क्ता। संसत्कृतागः स्मरन्नुषा ॥ अन्योपायं न पश्यामो गौतमस्य
प्रसादतः ॥९॥ तस्मान्नारद यास्यामो गौतमं सात्विनं मुनिं ॥ ए
वं ते निर्ययुर्देवा नारदेन समन्विताः ॥१०॥ गौतमं ते समासाद्य बं
द्धांजलिपुटां मुनिं ॥ तुष्टुवुर्विविधैर्वाक्यैस्तमेव शरणं गताः ॥११

तक्रतु॥तवप्रभावंवक्तुंनोमुनेशक्तिर्नविद्यते॥गरिमाणंवहेत्को
ऽपिमेरोर्हिमवतोपिच॥१२॥दृष्टिधारारजोभूमेर्गंगायाःसिक
ताअपि कमंबुधेर्येणान्विलोगेणायेत्कोऽमूढधीः॥१३॥प्रातरेवो
प्तबीजानांमध्यान्हेसस्यसंपदः॥संपादितास्त्वयाशर्वमविताऋ
षिसत्तमाः॥१४॥वालखिल्यैर्येजिंक्रतुलापरइंद्रोविनिर्मितः॥ब्र
ह्मादिभिःप्रार्थितास्तेपक्षिणंतमकल्पयन्॥१५॥कबंपानिधि
रेकेनप्राशितश्चुलकेनतु॥अपरासृष्टिरारब्धागाधिपुत्रेणधी
मता॥१६॥स्तंभितोभुजइंद्रस्यच्यवनेनमहात्मना॥तस्मात्त्वत्वा
त्मनांउसाभवतांसेवनंनतिः॥१७॥दर्शनंभाषणंपूजास्पर्शनं

पापनाशनं ॥ उपकाररतानां वो दीनानुग्रहकारिणे ॥ यातान्कृ
पो इंद्रार्थे शरणं यातान् कृपां कर्तुं त्वमर्हसि ॥ गौतम उवाच भ
वतां दर्शनं चर्मचक्षुषो नैव जायते ॥ २९ ॥ मम पुण्येन जातेन त्वा
मसंपादने नृणां ॥ जन्माश्रमतपोदानं देहस्यात्मा व्रतानि च २०
सार्थकानी क्षणे नैव जातानि भवतां खलु ॥ इदानीं प्रार्थितं
किं वस्तन्निरूप्यं ममाग्रतः ॥ २१ ॥ शक्यं चेत्तत्करिष्येहं भवत्स्मृति
बलेन तु ॥ इति तद्वचनं श्रुत्वा जहृषुस्ते दिवौकसः ॥ २२ ॥ चंद्रोदये य
था हर्षं प्राप्नोति जलधिः स्फुटं ॥ यथा वा बालभाषाभिः पित
रौ मुद्समीपतुः ॥ २३ ॥ प्रार्थयां चक्रिरे सर्वे गौतमं तं महामुनिं देवग

एगऊचुः ॥ ईश्वरस्यापराधेन कामो भस्मत्वमागतः ॥ २४ ॥ आग
ग॰ स्कारी त्वया शक्रो न च प्राणैर्वियोजितः ॥ इदानीं सम्यथास्थाने
पु॰ स्वकीयं प्राप्नुया मुने ॥ २५ ॥ तामित्वा तस्य चाहो हांसि सर्वेषां व
६७ चनाद्विनः ॥ कृते तस्मिन्प्रसारे तु सर्वेषां वांछितं भवेत् ॥ २६
नारद उवाच ॥ श्रुत्वा देवसमूहस्य वचनानि स गौतमः ॥ प्रह
स्य प्रत्युवाचेदं सर्वान्देवगणान्प्रति ॥ २७ ॥ गौतम उवाच ॥ ना
मापि तस्य न ग्राह्यं पतितस्य कृतागसः ॥ कपटस्य शठस्यापि
दुष्टस्यापि प्यविवेकिनः ॥ २८ ॥ अनुतापविहीनस्य निष्कृतिर्नैव ६७
विद्यते ॥ तथापि भवतां वाक्यात्करिष्ये तत्प्रियं सुराः ॥ २९ ॥ भवं

तोपिमरास्पृशस्तस्यशापः पतेन्मयी॥इतोभवतिजंतुर्हिबकुमि
येनुगृह्यते॥२०॥अतएकंवदेमंत्रंतस्मैतंप्रदिशंतुच॥सर्वक
तोसर्वहर्त्तासर्वपातात्कृपानिधिः॥२१॥विनायकोदेवदेवोब्रह्मा
विष्णुशिवात्मकः॥षडक्षरस्तस्यमंत्रोमहासिद्धिप्रदायकः
२२॥उपदेशेकृतेतस्यदिव्यदेहोभवेत्तुसः॥सप्तानितस्ययावंति
तावन्नेत्रंभविष्यति॥२३॥स्वाराज्यंप्राप्स्यतेशक्रः इतिसत्यंवदा
मिवः।अभियायमुरानिस्थित्तत्रस्त्रीमासीत्सगौतमः॥२४॥तं
चतेशजयित्वातुनमस्कृत्यमुदान्विताः॥प्रदक्षिणीकृत्यपुनः
प्राप्यानुज्ञांययुःसुराः॥२५॥प्रशंसंतोमुनितत्रयत्रास्तेबल

वृत्रहा गौतमात्तज्ज्ञानसंपन्नात्सात्विकोन्योनवर्त्तते ३६ इ
तिश्रीगणेशपुराणेउपासनाखंडेमंत्रकथनंनामद्वात्रिंश
ग० त्तमोध्यायः ३२ नारदउवाच उचुर्देवास्तत्रहरणंबहिर्योहि
पु० ष्कृतकृता वयंहिसहितास्तत्रनारदेनसुरर्षिणा १ तंगत्वा
९८ गौतमंमुनिंप्रसाद्यत्वामिहागताः उपायस्तेनकथितोव
रोदत्तस्त्वयापिच २ दोषेजातेस्वयंसंतःख्यापयंतिजनेषु
वै तत्रप्रतिविधिंसम्यक्कुर्वंतितन्निवर्तकं ३ आछादने
दोषवृद्धिःख्यापनेतुलयोभवेत् तस्मात्त्वमपिदेवेंद्रबहिरा
गत्यतंवद ४ देवर्षिपतितंब्रूहिकुरुपायंमुनीरितं येनाय ९८

कंमहामंत्रंगृहाणत्वंषडक्षरं॥ब्रह्माददर्शचांगुष्ठंविवाहेगिरि
जेशयोः॥चस्कंदसतदारेतोलज्जितोवाब्रमुखोगतः॥६॥ज्ञात्वा
महेशःकृतवान्निर्दीपितमुपायतः॥इतिवाणीसमुत्त्वेवदेवर्षि
गणनिर्मिता॥७॥आजग्मामवाहिःशक्रोनलिनीकोशतान्नृप
सर्वैर्यासत्रदेवानांश्रुत्वावाक्यानिसादरं॥८॥पूयशोणित
दिग्धांगोमलिनःपूतिगंधवान्॥दृष्ट्वातथाविधंदेवानेमुः
सर्वैसुरेश्वरं॥९॥आघ्रायघ्राणरंध्राणिवस्त्राद्यैर्नृपसत्तम
मुस्तातंउनराचांतेतमिंद्रंवाक्पतिस्तदा॥१०॥षडक्षरंमहा
मंत्रंगणेशस्योपदिष्टवान्॥उपदेशेकृतेतेनदिव्यदेहोभव

गा० पु० ६९

क्षमः ॥२२॥ सहस्रनयनः श्रीमान्व्योमसूर्य इवापरः ॥ ततो वा
द्यनिनादैश्च जयशब्दैर्दिवौकसां ॥२३॥ गंधर्वाणां गानरवैर्नं
दिता विदिशो दिशः ॥ ससृजुः पुष्पवर्षाणि सर्वे देवा मुदान्वि
ताः ॥२३॥ आशिषो ददुः सर्वे मुनयो नारदादयः ॥ आलिलि
गुर्मुदा देवास्तुष्टुवुश्चापरे च तं ॥२४॥ के पूज्यास्त्वं सुमनसः स्तना
था हि वत्सं त्वया ॥ विना त्वां नैव शोभामो विना चंद्रं नभो यथा
॥२५॥ विना स्वपितरो बाला न सुखं यांति सर्वथा ॥ तथा वयं वि
ना त्वां हि लभामः शर्म न क्वचित् ॥२६॥ मुनिरुवाच ॥ श्रुत्वेत्थं
देववचनं जहर्षेऽजं महाप्रभो ॥ उवाच च प्रसन्नात्मा तथ्यं वाक्यं ६९

सुरान्प्रति॥२७॥इंद्रउवाच॥मयाकृतंकर्महुसुदुष्करंयद्देवर्षि-
वाक्येनविमोहितेन॥लब्धंफलंदुःसहमप्यसर्वैरुद्धारितोहंदु-
रितप्रपंकात्॥२८॥नमामिसर्वानमरप्रवर्हान्ऋषींश्चसर्वा-
न्गुरुप्रभावान्॥उद्धर्तुमात्मानमतोविलासांसंत्रातुम-
र्हाःशरणंप्रपन्नं॥२९॥कथंप्रयत्नोरचितोभवद्भिःप्रसादना-
यास्यहिगौतमस्यकथंनुमंत्रंपरमंमदर्थेसत्र्क्कवांस्तत्क-
थयंतुसर्वे॥३०॥देवाऊचुः॥मुनिंपुरस्कृत्यवयंपुरंदरंचगतामुनिं
तंप्रणिपत्यसम्यक्॥प्रसादितोवाग्भिरतैर्विचित्रैः॥सयाच्य-
मानोथवदत्त्वमंत्रं॥३१॥यस्योपदेशेनसहस्रनेत्राजातो

भवानसर्वसुखायदेव॥प्रयाहिदेवाश्चमरावतींस्वांप्रशाधि
सर्वान्विबुधांश्चलोकान्॥२३॥शक्रउवाच॥नाहंप्रयास्येस्वगु
ग॰ रोप्रसादंविनागणेशस्यसुरर्षिवर्याः॥व्रजंतुयूयंकृतकार्य
पु॰ पूजाधामानिदिव्यानिमुदारमंतः॥२४॥एतावतालंप्रकरोति
१०० तोहंलज्जाविलीनोवकृडुर्गतश्च॥प्रसादितोयन्मुनिरुग्रते
जा भवत्प्रसादाद्धकृनेवतामे॥२५॥इतिश्रीगणेशपुराणेउपा
सनाखंडेबहिरागमनंनामत्रयस्त्रिंशत्तमोध्यायः॥३३॥ना
रदउवाच॥कदंबवृक्षस्यतलेनिधायनासाग्रदृष्टिःपरमासने
सः॥मनोनिरुंध्याथजजापमंत्रंषडक्षरंजंभरिपुर्नरेंद्र॥१॥स १००

हस्रवर्षाणिगतानितस्य॥महत्यतेमोस्तुतमुग्रतपास्य॥वल्मी
कगुल्मानिशरीरदेशेजातानिभूमीधरवत्तुस्थिरस्य॥२॥त
तःप्रसन्नोभगवानणीयःसर्वगःसर्वविदुग्रतेजाःस्वते
जसावन्हिशशीनतेजाःस्याच्छादयन्सर्वविलोचनानि॥३॥च
तुर्भुजोरत्नकिरीटमालीचार्वंगदःकुंडलमंडिगंडः॥मुक्ता
मयंदामचनुरेचबिभ्रन्महार्घकटिसूत्रमुच्चैः॥४॥यःपुष्क
राक्षःपृथुपुष्करोपि॥हृहत्करःपुष्करशालिमालः॥आविर्बभू
वाखिलदेवमूर्त्तिःसिंहूरशालीपुरतोमघोनः॥५॥तंदृष्टुभय
भीतोभूत्किमिदंकिमिदंकिमिवागतं॥कथंचजीवितंमेस्या

दृष्टिप्राणमयस्यच ॥ १४ ॥ विघ्नोयंकिंमहानद्यनजानेकेननिर्मि
तः ॥ खेदस्त्वाविशरीरंमेकंपतेबोधिपत्रवत् ॥ १५ ॥ इत्थंवितर्कवि
ग० तंतस्यबुबुधेविलसद्विभुः ॥ विनायकोमहेंद्रंतुमुवाचमंजुलं
पु० वचः ॥ विनायकउवाच ॥ माभयंकुरुदेवेशमांनरेत्सिकथंसु
१०१ र ॥ यन्निर्गुणंनिराकारंचिदानंदंसनातनं ॥ १६ ॥ कारणातीत
मव्यक्तंजगत्कारणकारणं ॥ यंध्यायसिसदादेवंमंत्रेणानेन
निश्चलः ॥ १७ ॥ श्रांतोसिबहुकालंत्वमितिप्रसन्नतांगतः ॥ त
पसानेनतुष्टोहंवरंदातुमिहागतः ॥ तपसानेनतुष्टोहंवरंदा
तुमिहागतः ॥ १८ ॥ ब्रह्मांडानामनंतानामुत्पत्तिप्रलयाव १०१

ने ॥ मत्तएवेतिविद्धित्वंहएएपद्मांबुसेनय ॥ १२ ॥ नारदउवाच ॥ श्रु
त्वातस्यवचोरम्यंबुबुधेबलमेदनः ॥ भगवंतंमहाकायंदेवदे
वंविनायकं ॥ १३ ॥ ननामपरयाभक्त्यातनउत्थयसत्वरः ॥ अब्रवी
दच्छचीकांतः प्रणमत्तंब्रह्मरूपिणं ॥ १४ ॥ इंद्रउवाच ॥ ब्रह्मादयो
पिनोदेवाविदुस्त्वांसद्दिजीश्वरा ॥ यगुणांस्तवमहाबाहोसृष्टि
स्थित्यंतकारिणः ॥ १५ ॥ परंतुकृत्रिमंममहंसंज्ञानयत्तसमुन्नवे
दतंतत्राप्यंतरायाभवंतिबहुधाममम ॥ १६ ॥ मयाकथंतुविज्ञे
यामहिमातेगजाननः ॥ यस्यतेनुग्रहः पूर्णोभविष्यतिम
हेश्वरः ॥ १७ ॥ सएवममहिमानंतेजानीयाद्विघ्नवारण तस्य

तेगुणरूपाणि वक्तुं शक्तिर्भविष्यति ॥ १८ ॥ निराधारोखिलाधारो नित्य
ज्ञानोऽजरामरः नित्यानंदेन संपूर्णो मायावीश्वर एव च ॥ १९ ॥ अक्ष
ग॰ रापरमात्मा च विश्वरूपोखिलेश्वरः ॥ उग्रैस्तपोभिस्त्वां ज्ञात्वा निहृ
पु॰ ताः सनकादयः ॥ २० ॥ षडक्षरप्रभावेन दृष्टोसि परमेश्वर ॥ पुरायं
१०२ ब्रह्मणादिष्टो मंत्रो मे मुग्रहेणवै ॥ २१ ॥ जक्कवांश्चैव मां ब्रह्मापरा
मुं विस्मरिष्यसि ॥ तदैव त्वं ब्रह्मपसे स्थानाद्दुर्दशां चैव यास्यसि ॥
२२ ॥ ततो मयातिलुब्धेन भोगपवर्गेन तु ॥ धर्षिता मुनिपत्नी
सा ततो दुर्गतिमाप्तवान् ॥ २३ ॥ पुनश्च पिपणोक्तेन तेन मंत्रेण दृ
ष्टवान् ॥ स्वरूपं तव देवेश सहस्रनयनोधुना ॥ २४ ॥ अनुष्ठानफलं १०२

प्राप्तंयत्नेदृष्टंपदांबुजं।इदानींतुवरंयाचेयंतंमेदेहिविघ्नप।२५।तव
विस्मरणेदेवनभवेन्मतथाकुत्र।मनोमेरमतांनित्यंतवपादांबु
जेविभो।२६।अन्यमेकंवरंयाचेयतस्त्वंचिंत्यतार्थद॥इदंकदंबन
गरंचिंतामणिपुरंत्विति॥२७॥अद्यप्रभृतिलोकेस्मिन्ख्यातिंया
तुगजानन।चिंतामणितितीर्थंतुसरश्चप्रथतामिदं।२८।अ
स्मिन्स्नानेनदानेनधर्मार्थकाममुक्तयः॥जनानांसिद्धयःसंतु
प्रसादात्तेजगद्गुरो॥२९॥मुनिरुवाच।आकर्ण्यवचनंशक्रोमे
घगंभीरनिःस्वनः॥उवाचप्रसन्नयावाचाविघ्नेशोजगतांपतिः
३०॥विघ्नेशउवाच॥इदंसंपत्स्यतेसर्वंयत्त्वयाप्रार्थितंविभो।अ

न्मयएकोवरस्तेस्तुस्वपदेत्वंस्थिरोभव ॥ २१ ॥ अविस्मृतिश्चसततंते
ममतेस्तुसुरेश्वर ॥ यदावसंकटंतेस्यात्तदामांस्मरवासव ॥ २२ ॥
ग॰ आविर्भावेनतेकार्यंसर्वंसंपादयेतदा ॥ इदंचिंतामणिपुरंख्या
पु॰ तंभुविभविष्यति ॥ २३ ॥ कादंबपुरमित्येतत्तीर्थेचिंतामणीति
१०२ च ॥ अत्रस्नानेनसर्वेषांसिद्धयेपिकरेस्थिताः ॥ २४ ॥ चिंतितंच
प्रदास्यामिचिंतामणिविनायकः ॥ नारदउवाच ॥ एवंवरंततो
लब्ध्वास्वःसिंधुमानपद्धरिः ॥ २५ ॥ कृत्वाभिषेकंतद्द्वारापूजया
मासतंविभुं ॥ गजाननंमहाभागंपरिवारसमन्वितं ॥ २६ ॥ पूजि १०२
तःपुननाथेनतत्रैवांतर्दधेविभुः ॥ स्थापयामासशक्रोपिस्फा

टिकींमूर्तिमादरात्॥३७॥वैनायकींशुभांदिव्यांसर्वावयवसुंदरीं
कारयामासविपुलंप्रासादंरत्नकांचनैः॥३८॥नत्वाप्रदक्षिणी
कृत्यशक्रःस्वपदमभ्यगात्॥तदेतद्भुविविख्यातंचिंतामणि-
स्वरोमहत्॥३९॥अद्यापिस्नात्वाभजल्लांगंगाशक्रसशासनात्
कृत्वाभिषेकंतन्मूर्तौयातिस्वधामसर्वदा॥४०॥एवंतत्क्षेत्रमहि
माकथितोद्भुतदर्शनः॥सर्वदोषहरःश्रीमान्सर्वकामप्रदःप्र
भुः॥४१॥तत्रगत्वामहीपालस्नानंकुरुष्वयथाविधिः॥सर्वदोष-
विनिर्मुक्तोभविष्यसिनसंशयः॥४२॥ततोययौमुनिःशीघ्रम
नुज्ञाप्यचतंनृपं॥आशीर्भिरभिनंद्यैवस्वस्वकर्मागमादरात्

ग० पु १०४

४३ ॥ इतिश्रीगणेशपुराणेउपासनाखंडेचिंतामणितीर्थवर्ण
नेनामचतुस्त्रिंशतमोध्यायः ॥ ३४ ॥ व्यासउवाच ॥ देवर्षौतुगतेत
स्मिन्नृपः किमकरोत्तदा ॥ रुक्मांगदोमेकथयकथामेतां
मनोरमां ॥ १ ॥ कउडन्यउवाच ॥ कृत्वोपदेशंसुमहांतमेवंगते
मुनौनारदनाम्निपुत्र ॥ रुक्मांगदोहर्षयुतोददर्शसेनांस्व
कीयांचतुरंगिणीतां ॥ २ ॥ तथापिदृष्ट्वानृपतिर्विरूपोयःस्व
र्णकांतीरतिमत्तरूपः ॥ आसीत्पुरात्वंकथयमेपजातःसंप्रा
प्यपप्रच्छनृपंनिमित्तं ॥ ३ ॥ सउ० ॥ गिरीन्वनानिसरितोत्रा
त्वाचवयमागताः ॥ मत्वइपरीताराजेंद्रत्वद्दर्शनसमुत्सुकाः ॥ १०४

४॥परेपरंप्रपश्यंतःसंप्राप्तास्तेपदांबुजं॥इमामवस्थांसंदृष्ट्वातेदुः
खेदुःखितरांगताः॥५॥किंनिमित्तमभूत्तन्नःकथयस्वनृपोत्तमः
नृपउवाच॥अहमग्रेसमायातस्तृषितःक्षुधितश्चह॥६॥अप
श्यंपुरतःशीघ्रंवाचक्नविरहाश्रमं॥तत्रगत्वामयादृष्टातस्य
पत्नीशुभानना॥७॥नाम्नामुकुंदेतिशुभायाचितासाजलंम
या॥सातुदृष्ट्वास्वैरिणीचमामुवाचाशुभंवचः॥८॥रतिंकुरु
मयासार्द्धंनोचेच्छापंददामिते॥निराकृतामयासातुबलात्तु
ह्येवचेतसा॥नजर्त्तरिगतेस्मात्तुसामांदृष्ट्वाशशापरुषा॥ततस्तु
वृक्षमूलेहमुपविष्टोहंदुःखितः॥१०॥प्रभावात्पूर्वपुण्यस्यह

दृष्ट्वान्नारदंमुनिं ॥ तेनमेकथितोरिष्टनाशकोविधिरुत्तमः ॥ ११ ॥
चिंतामणिक्षेत्रगतगणेशतीर्थसंश्रितः ॥ महिमाकथितस्तेन
तस्यतीर्थस्यविस्तरात् ॥ १२ ॥ तत्रस्नानंमयाख्यातंमुनिनादि
व्यचक्षुषा ॥ अतःस्नातुंगमिष्यामिस्वदोषस्यापनुत्तये ॥ १३ ॥
यान्तुसर्वेमयासार्द्धंतत्रस्नातुंपदिष्टय ॥ स्नात्वादत्वायथाश
क्तिसंपूज्यचविनायकं ॥ १४ ॥ तीर्थदेवप्रसादेनभूतायामसः ॥
स्वकेपुरः ॥ क०७० इतितेनिश्चितंबुध्वाजग्मुराजवरस्यवः ॥ १५ ॥
दृष्ट्वातीर्थंगणेशाख्यंस्नात्वासम्यक्बभौनृपः ॥ तप्तकांचन
वर्णाभोयथापूर्वंमुनीश्वर ॥ १६ ॥ ततोरुक्मांगदोमेनेनारदो

कृमतं वदः ॥ तत्रस्नात्वाह्यदौ दानान्यनेकानि नृपसत्तम । रुक्मांग
दो ब्राह्मणेभ्यो सुदा परमयायुतः ॥ विनायकं पूजयित्वा तेजोशिं
ररर्षभसः ॥ २८ ॥ विमानमर्क प्रतिमं ब्राह्मणाः सेचकाश्चते ॥ विना
यकगणो जुष्टमप्सरः किन्नरैर्युतं ॥ २९ ॥ नत्वा तान्परिपप्रच्छ के
दयं कुत आगताः ॥ हूताः कस्य किमत्रास्ति कार्यं तद्ब्रूत मादरं ॥ २०
श्रुत्वा नृपतिवाक्यानि मंजुलानि विमानगाः ॥ हूता विनायकं
सोचुर्धन्योसि नृपसत्तम ॥ २१ ॥ येन ते सर्वभावेन ध्यानश्चिंता
मणिप्रभुः ॥ तीर्थयात्रा कृता सम्यक् दानं दत्तं यथाविधि ॥
२२ ॥ चिंतामणिः पूजितश्च कृतकृत्योसि सांप्रतं ॥ चिंतितस्य प्र

दानाद्धिचिंतामणिरयंस्मृतः ॥२३॥ यंचक्रुतक्रुत्पास्मोदर्शनात्तव
सुव्रत ॥ महिमानंनजानीमस्तवभक्तेनृपोत्तम ॥२४॥ कायेनम
नसावुध्याजीवस्याप्यर्णेणनच ॥ आराधितस्त्वयादेवः सर्वव्रह्मा
नायकः ॥२५॥ विनायकस्तस्यदूतास्तेनचप्रेषितान्नृपः ॥ उत्सुकः
सउवाचास्मान्मद्भक्तंशीघ्रयायिनः ॥२६॥ रुक्मांगदंविमानेन
आनयंतुममांतिकं ॥ इतिक्रुत्वावयंयाताआरोहस्वनभोगमं
२७ ॥ याहिशीघ्रंनरेंद्रेवंमहास्मान्निर्विनायकं ॥ क७१ ॥ इतिश्रुत्वा
वचस्तेषामाहरुक्मांगदोनृपः ॥२८॥ क्वाहंमंदमतिर्दूताः क्वचा
खंडितविग्रहः ॥ अप्रमेयोप्रतर्क्यश्चचिन्मात्रोविभुरव्ययः ॥२९॥

सर्गस्थित्यप्ययानां यः कारणं कारणातिगः ॥ तस्यादरो मयि कथं
न जाने तीर्थजं फलं ॥ २० ॥ जन्मांतरगतं किं मे फलितं पुण्यमुत्तमं
तेन वोद्दर्शनं जातं मयेति फलदं शुभं ॥ २१ ॥ एवं पं धन्यतरो येषां प्रत्य
क्षो हि निर्गुणो विभुः ॥ इत्युक्त्वा पूजयामास नत्वा चारणपंकजं ॥ २२ ॥
प्रार्थयामास सर्वांस्तान्विनता मम नृपोत्तमः ॥ ब्राह्मणाः सत्यवादी
च भीमो भीमपराक्रमः ॥ २३ ॥ विना तं कथमायामि मातरं चारु
हासिनीं ॥ तयाप्याराधितो देवो देवदेवो विनायकः ॥ २४ ॥ जन्मा
वधि न चान्यं स्मामनुते देवतां परं ॥ इति ताऊचु ॥ एवं चेत् तर्हि तीर्थेस्मि
न्कुस्नानं तपो रपि ॥ २५ ॥ श्रेयस्तस्मैन्यतस्यै च पित्रे मात्रे प्रदीयतां

ग० पु० १०७

ततस्तावपिनेष्यामो विमानवरमास्थितौ ॥ ३६ ॥ क ३० इति तद्व
चनं श्रुत्वा कृत्वा प्रतिकृतिं कुशैः ॥ कुशोसि कुशपुत्रोसि ब्र
ह्मणा निर्मितः पुरा ॥ ३७ ॥ त्वयि स्नाते नु मस्नातो यस्येदं ग्रंथिबंध
ने ॥ एवं मंत्रं समुच्चार्य सर्वेषामनुपूर्वशः ॥ ३८ ॥ प्राण्याणां सर्व
लोकानां चक्रे स्नानविधिं नृपः ॥ चिंतामणि क्षेत्रगते तीर्थे गाण
श संज्ञके ॥ ३९ ॥ ततो रुक्मांगदो राजा सबलो हूतवाक्यतः वि
मानवरमारुह्य कौंडिन्यं पुरमाययौ ॥ ४० ॥ वाद्यघोषैर्जयस्त्वघो
षैर्गंधर्वाप्सरसां वरैः ॥ नादितं गगनं तेन विमानेन दिशो दश ॥ १०७
४१ ॥ मातापितृभ्यां प्रददौ श्रेयो रुक्मांगदो नृपः ॥ सर्वेषामेव लो

कानांस्नानश्रेयोविनायके ॥४२॥ दत्तमात्रेतुकौशेयस्नानजे
श्रेयसिथके ॥ विनायकाज्ञयान्यानिविमानानिसमाययुः ॥४३॥ प्र
त्येकंतेसमारूढाएकैकंगगणेचरं ॥ एवंरुक्मांगदोभीमस्तन्मा
ताचारुहासिनी ॥४४॥ सर्वेलोकाययुस्तत्रयत्रदेवोविनायकः ॥ ए
वंतन्नगरंसर्वमाबालस्थविरावधि ॥४५॥ गणपाऊणेशतीर्था
यस्नानजात्स्वर्गतिंगतं ॥४६॥ इतितेकथितंसर्वंयथादृष्टंत्व
यामुने ॥४७॥ चिंतामणिस्तेत्रगतमहात्म्यंतीर्थसंभवं ॥ यःशृणो
तिनरोभक्त्यासोपिसद्गतिमाप्नुयात् ॥४८॥ इतिश्री० उपासनाखं
डेविनायकमहिमावर्णनेकादंनामपंचत्रिंशत्तमोध्यायः ३५

व्यास उवाच ॥ श्रुतं गणेशतीर्थस्य महात्म्यं कमलासन ॥ रुक्मांगद
स्य चरितं कौंडिन्यस्य पुरवासिनं ॥ १ ॥ तथापि ब्रूहि मे ब्रह्मन् मुकुंदाच
ग० रितं शुभं ॥ ब्रह्मोवाच ॥ गते रुक्मांगदे सा तु जज्वाल मदनाग्निना ॥ २
पु० दावाग्निना यथा ग्रीष्मे महावनस्थली सुत । मुकुंदा नालभच्छर्मं व
१०८ ले शीतलमारुते ॥ ३ ॥ लतापुष्पमये स्थाने चंद्रे चंदनतोपि च ॥ न
स्या न रोचते हास्यं गीतं नृत्यं कथांतरं ॥ ४ ॥ अन्नं जलं विह्वलायाः
स्तच्चिंतया मुनीश्वर ॥ ५ ॥ ततः क्रमेण तस्यास्तत्क्षणं निद्रा समंप
यौ ॥ ६ ॥ तामिंद्रश्चुचुंबे कांतां प्रसुप्तां विजने वने ॥ कामातुरां विह्वलां
च रुक्मांगदकृते सुत ॥ ७ ॥ धृत्वा रुक्मांगदं रूपं बुभुजे कामुकां तु १०८

ततः आलिलिंग मुदा शक्रो मुकुंदां जहृषे भृशं ॥७॥ सापि रुक्मां
गदं तं तु चुचुंबे सुभृशं सुत ॥ सोपि तस्याः कुचौ पीनौ ममर्द हृष्ट
मुष्टिना ॥८॥ स प्रभुकां स प्रभुको रेमे निःशंकं सतया सह ॥ ततः सा
लज्जमानेव स्वगृहं प्रत्यपद्यत ॥९॥ इंद्रो रुक्मांगदी भूत्वा तत्रैवां
तर्दधे सुत ॥ मेने रुक्मांगदो मुकुंदा तां गर्भं दधौ तु सा ॥१०॥ सुषुवे
नवमे मासि सुवेलायां सुतं प्रभुं ॥ चारु सर्वानवद्यांग रूपेण मद
नातिगं ॥११॥ तस्य शब्देन महता धरण्यां पतितस्य तु ॥ सनादि दश
दिग्व्हे दमनं स्वं भूरसातलं ॥१२॥ पक्षिणो वत्र भुः सर्वे उड्डीयो यस ड्डी
र्वतः ॥ वाचक्रविस माया तं त्यक्त्वा स्वं निम्नकर्मचा ॥१३॥ मुकुंदा

चरितं तेन नैव बुद्धं कदाचन ॥ जातकर्मादिकं सर्वं चकार स प्रहर्षितः
२४ ॥ ददौ दानं यथाशक्ति ब्राह्मणेभ्यो यथार्हतः ॥ दशाहे तु व्यतीते स ना
॥ग० मकर्माकरोन्मुनिः ॥ २५ ॥ गृत्समदेत्यनुज्ञातुर्ज्योतिःशास्त्रपरैर्द्विजैः
॥पु० ततस्तु पंचमे वर्षे स व्रतबंधं चकार ह ॥ २६ ॥ वेदव्रतानि चत्वारि चका
१०९ रवटुकस्य सः ॥ सकृन्निगदमात्रेण गृह्णाति ब्रह्मतेजसा ॥ २७ ॥ वेद
शास्त्रनिधिर्जातः स्वकर्मकुशलोपि च ॥ कदाचित्सुमुहूर्ते तु पि
तावाचक्नविः सुतं ॥ २८ ॥ गणानां त्वेति सन्मंत्रं महांतमुपदिष्ट मंत्रे
वान् ॥ उवाच महामंत्रो वैदिकोऽखिलसिद्धिदः ॥ २९ ॥ गणानां त्वे
ति ॥ आगमोक्तेषु मंत्रेषु सर्वश्रेष्ठ एव च ॥ ध्यात्वा गजाननं देवं ज १०९

पैनंस्थिरमानसः ॥ २० ॥ परांसिद्धिंसमाप्स्येवत्स्यांतिंलोकेगमिष्य
सि ॥ क उ० ॥ ततोगत्वामहोविप्रोमंत्रंप्राप्यपितुर्मुखात् ॥ २१ ॥ अनुष्ठा
नरतोभूत्वाजपध्यानपरोभवत् ॥ एवंबहुतिथेकालेगतेतुमुनि
पुंगव ॥ २२ ॥ तस्मिन्मगधदेशेतुराजामगधसंज्ञितः ॥ चारुरूपोम
हामानीदानशूरोरिमर्दनः ॥ २३ ॥ नानालंकारशोभाढ्योमहाहा
नसनसंस्थितः ॥ सुधर्मासनगोवीरः पुरहूतइवापरः ॥ २४ ॥ चतु
रंगबलोपेतोज्ञानीपंडितमानदः ॥ अमात्योरोज्ञाननिधावाच
स्पत्यधिकोगुणैः ॥ २५ ॥ अंबिकानामभार्यास्यचारुरूपागुणा
धिकाः ॥ पतिव्रतामहाभागाशापानुग्रहणेक्षमा ॥ २६ ॥ तस्यराज्ञः

पितुश्श्राद्धे समाजग्मुर्महर्षयः ॥ राज्ञाहूता वसिष्ठाद्या विप्रमुख्या वेदश्रु
तिपारगाः ॥ २७ ॥ आकारितोऽथ गृत्समदस्तपस्वी शुचिमानसः ॥ त
त्क्षणात्स्वप्रयोगेन शीघ्रं गत्वा गृत्समदो वदत् ॥ २८ ॥ तमतिथिं धिग्धिगित्ये
ग॰ वमब्रवीन्मुनिसंनिधौ ॥ तपस्वीति भवान्प्राप्यान्यो न मुनिस्त्वं यत
पु॰ स्तव ॥ २९ ॥ जन्म रुक्मांगदाज्जातं राजपुत्राद्विचारय ॥ नास्मत्स्व
११० श्रेष्ठः पूजार्ह इतो गच्छ स्वमाश्रमं ॥ ३० ॥ इत्यपत्रिवचनं श्रुत्वा क्रो
धदीप्त इव ज्वलन् ॥ दहन्निव त्रिलोकीं स नमस्व यल्लिवतान्मु
नीन् ॥ ३१ ॥ अपरे त्वपलाय्यंत सिंहं दृष्ट्वा यथा मृगाः ॥ उवाच त ११०
त्र सहसा स वसिष्ठान्मुनीन्प्रति ॥ ३२ ॥ गृत्समद उवाच ॥ यर्हिरु

रुक्मांगदस्याहं न भवेयं मुनीश्वराः ॥ तदाशपाग्निनायुष्मान्
कुर्यां भस्मावशेषितान् ॥ २३ ॥ कउवाच ॥ इत्युक्त्वा तान् मुनीन्
सर्वान् प्रययौ मातरं प्रति ॥ पप्रच्छ तां गत्वा मद्दोवदरुष्टेति का
मुके ॥ २४ ॥ मुकुंदे वद मे तात तं नो चेन्न सम्भविष्यसि ॥ आकर्ण्य
वचनं तस्य चकंपे भ्रंशो विह्वला ॥ २५ ॥ मुकुंदा मा रुदती नैव क
दलीकुञ्जलान्विता ॥ उवाच दीनया वाचा वद्धांजलिपुटं स
ती ॥ २६ ॥ मुकुंदोवाच ॥ मृगयासक्तचित्तो भूदृष्ट सार्थे नृपो
त्तमः ॥ त्रैलोक्यसुभगो दृष्टो मया रुक्मांगदः शुभः ॥ २७ ॥ अनु
ष्टानरतेवाच कश्चैमिभंतरि प्रिये ॥ अनिवार्या स्त्रियः प्रतिस्त

त्वा वा कार्यविधीरितं ॥ ३८ ॥ तस्मिन्नल्पे सक्तमना जातास्मि सपिता
तव ॥ श्रुत्वेत्थं वचनं तस्या मौनवान्स ययौ मुनिः ॥ ३९ ॥ लज्जर
याधोमुखः शापमन्यधज्जननीं प्रति ॥ पुत्रउवाच अहो मूढे पा
पु० यतद्वेरते कानने कंटकी भव ॥ ४० ॥ अप्रसंख्येफलासवैः प्राणिभिः
२२८ परिवर्जिता सापि शापं ददौ तस्मै क्रोधाविष्टा सुतायह ॥ ४१ ॥
जननीं त्वमनाहत्य यतः शप्ता त्वया खलः ॥ अतः शपामि त्वां पु
त्र त्वत्तः पुत्रोतिदारुणः ॥ ४२ ॥ त्रैलोक्यभयदो दैत्यो भविष्यति
महाबलः ॥ एवंशापततस्तौतु मातापुत्रौ परस्परं ॥ ४३ ॥ कंटवा॰
साहसैव शरीरं तत्यक्त्वाभूद्बदरीवने ॥ वर्जिता पक्षिसंघातैर्जा २२८

रजैरंडजैरपि ॥४४॥ ततोंतरिक्षेवागासीदिंद्राहृत्समदोस्वभूत्‌ स
तुग्रत्समदोब्रह्मन्नष्टानायजग्मिवान्‌ ॥४५॥ इदंगृत्समदाख्यानंयः
शृणोतिनरोत्तमः ॥ नससंकटमाप्नोतिवांछितंलभतेखिलं ॥४६॥
इतिश्रीगणेशपुराणेउपासनाखंडेगृत्समदोपाख्यानंनामत्रिंश
त्तमोध्यायः ॥३०॥ ब्रह्मोवाच ॥ अमनमुनिर्ईदृशंग्रेवनंपुष्पकसं-
क्षितं ॥ नानाद्रुमलताकीर्णंपुष्पप्रकरशोभितं ॥१॥ शोभितंनिर्जरज
लैर्निर्जनैर्मुनिसत्तमैः ॥ ननामतान्गृत्समदोन्यवसच्चतदाश्र
पा ॥२॥ तत्रस्नात्वाजपंचक्रेपारांगुष्टाग्रधिष्टितः ॥ स्थिरेणमनसा
ध्यायन्देवंविघ्नेश्वरंविभुं ॥३॥ नासाग्रन्यस्तदृष्टिःसननिरीक्षदि-

ष्टोदशः ॥ जितेंद्रियो जितश्वासो जितात्मा मारुताशनः ॥ ४ ॥ दिव्यंव
ग० र्षसहस्रं स तपस्तेपे सुदारुणं ॥ उन्मील्य नयनें पश्यद्यदा गत्समदो मुनिः
पु० तदा नेत्रोद्भवो वह्निस्त्रिदशान्पर्यपालयत् ॥ शक्रोकिरेतदा देवाः ॥ क
११२ स्यायं परवाश्चैवेत् ॥ ६ ॥ अपरं गलितं पत्रं भक्षयन्नेकमेव च ॥ पलमा
स्थाय परंस्त्राणमुन्नतोतिनिश्चलः ॥ ७ ॥ दश पंच सहस्राणि तेपे निश्च
लमानसः ॥ ततो विनायको दृष्ट्वा नयनं तस्य दुर्धरं ॥ ८ ॥ अनुग्रहाय त
स्याथ प्रादुरासीत्सुरीशिवान् ॥ यथा धेनुर्वत्सरवं श्रुत्वा धावति सत्वरं
र्थं ॥ तथा विनायको देवः शीघ्रं गत्समदं ययौ ॥ भासयंस्तेजसा विश्वं स
हस्ररविसन्निभः ॥ १० ॥ चलत्कर्णतालोद्दहद्दंतिलीलो मुदा चारुरवे ११२

लोलसच्चंद्रभालः ॥ बृहत्पद्ममाल्यो जगत्कार्यमूलः ॥ करेकंजना
लो नमत्सेविमेलः ॥११॥ सिंहारूढो दशभुजो व्यालयज्ञोपवीतवान्
कुंकुमागुरुकस्तूरीचारुचंदनचर्चितः ॥१२॥ सिद्धिबुद्धियुतः श्रीमा
न्कोटिसूर्याधिकद्युतिः ॥ अनिर्वाच्यस्वरूपोपि लीलयासीत्पुरो मु
नेः ॥१३॥ ततेजसा हततेजो मुनेस्तस्य महात्मनः ॥ विघ्नस्य तेजसा य
द्वत्तत्रेचांद्रमंमहः ॥१४॥ निमील्य नयने सोथ चकंपे भृशविह्व
लः ॥ पपात मूर्छितो भूमौ विस्मृतध्यानमंगलः ॥१५॥ पुनश्च मनसा
ध्यायन्गजाननमनामयं ॥ मनसा तर्कयद्विघ्ननिमित्तं व्याकुलो मु
निः ॥१६॥ किमेतत्क्षोभजननं सहसा समुपस्थितं ॥ अद्य प्रभृतिमन

मृंतत्कथंमेह्यागतं॥१७॥पाहिदेवेशसर्वात्मन्विघ्नदस्मात्भयान
ग० कात्॥त्वामृतेशरणंयामिकमन्यंजगदीश्वर॥१८॥महाडुःखंस्मरादेवय
पु० न्मेत्रिस्तुतदावदत्॥नास्मत्सकोपूजनीयइतितद्दहतेमनः॥१९॥कउ॰
११३ इतितत्क्रंदितंश्रुत्वाजगादसविनायकः॥गणेशउवाच॥अनुग्रहायसं
प्राप्तंविद्धिमांगणनायकं॥२०॥मनकादिभिरग्राह्यंचिरंतिष्ठममा
स्थितैः॥त्यक्त्वाभयंब्रूहियत्तेवांछितंमुनिसत्तम॥२१॥एकांगुष्ठेनत
पसातोषितोहंत्वयानिशं॥शंकरउवाच॥निशम्यैवंवचस्तस्यदेवदेव
स्यशोभनं॥२२॥दंडवत्प्रणनामैनंनिजानंदपरिप्लुतः॥उवाचपरम
प्रीतोवरंदत्तंविनायकं॥२३॥गृत्समदउवाच॥अद्यमेजन्मसफलं ११३

तपसोनियमस्यच।अखंडानंदरूपोयोब्रह्मरूपोनिराकृतिः॥२४॥
मुंचन्नश्रूणिनेत्राभ्यामानंदेनननर्तच॥चिरानंदघनोवेदशास्त्रा
णामप्यगोचरः॥२५॥सोयदृष्टोमयासाक्षाद्भवःकिंप्रार्थयेविभो
तवाज्ञयातथाप्येकंप्रार्थयेहृदिरहानन॥२६॥चतुराशीतिलक्षासु
योनिषुश्रेष्ठतासुर॥मनुष्याणांमहाभागवर्णास्तत्रमहत्तराः॥त
त्रापिब्राह्मणाश्रेष्ठास्तत्रापिज्ञानिनःपरा॥ज्ञानिष्ठनुष्ठानपरास्ते
षुचब्रह्मवेदिनः॥२७॥ब्रह्मज्ञानंतथाह्यानंदेहिमेजगदीश्वरः॥त्वयि
भक्तिंचसुदृढांनविस्मरणमेवच॥२८॥तवभक्तेषुसर्वेषुश्रेष्ठतांचग
जाननः॥अन्यचैकंवरंयाचेतंचमेदेहिशंकर॥३०॥तवभक्तैकनिल

ग० पु० १९५

यंत्रैलोकाकर्षणन्नमं॥ विख्यातं त्रिषु लोकेषु नमस्यं सुरमानुषैः॥३१
एवं मां क्रुरु विघ्नेश परितुष्टो विलासार्थे कृत॥ वनं च पुष्पकं नाम्ना ख्या-
ति यातु सुरेश्वर॥३२॥ अस्मिन्स्थिता वचभक्तानां कामपूरय नित्यदा॥
इदं च पुष्पकं पुरं चतुरिस्तु विशेषतः॥३३॥ गणेश पुरमित्येवं प्रथां या-
तु गजाननः॥ क उवाच॥ इति तद्वचनं श्रुत्वा जगाद द्विरदाननः॥३४॥ ग-
णेश उवाच॥ साधु साधु महाबाहो प्रसन्नो मयि इल्लेमं॥ भक्तानां त्रिषु
लोकेषु न किंचिन्मुनिपुंगव॥ त्वदपाप्यत्प्रार्थितं विप्र ततेसर्वं भविष्य-
ति॥ विप्रत्वं इल्लेमतरं प्रसन्नेन मयार्पितं॥३५॥ गणानां त्वेति मंत्रस्य वैरि-
कस्य यतस्त्वया॥ जपः कृतो मुनेतस्त्वम्रृषिरस्य भविष्यति॥३६॥ ब्र- १९५

ह्मारिषुचदेवेषु वसिष्ठादिमुनिष्वपि ॥ ख्यातिं यास्यसि सर्वत्र परं श्रेष्ठ्य
मुपागतः ॥ ३८ ॥ सर्वेष्वारंभकार्येषु पूर्वं ते मम चापरं ॥ स्मरणं ये करिष्यं
ति तेषां सिद्धिर्भविष्यति ॥ ३९ ॥ यतो ज्ञानस्वर्षिछरसां कर्मनिःफलं ॥
पुत्रश्च बलवान् सर्वदेवानां सुभयंकरः ॥ ४० ॥ भविष्यति महाख्यातिं त्रिषु
लोकेषु यास्यति । अजेयः सर्वदेवानां विनारुद्रं भविष्यति ॥ ४१ ॥ भद्र
को भद्रतप्राणो मन्निष्ठो मत्परायण ॥ इदं च नगरं देवयुगेष्वप्य
कसंज्ञितं ॥ ४२ ॥ त्रेतायां मणिपूरं च भानकं द्वापरेपि च ॥ कलौ तु भ
द्रकं नाम ख्यातं लोके भविष्यति ॥ ४३ ॥ अत्र स्नानेन दानेन सर्वोभ
न्कामानवाप्नुयात् ॥ कउवाच एवं दत्वा वरांस्तस्मै तत्रैवांतर्दधे विभुः

ग० पु० २२५

४४ ॥ तस्मिन्नंतर्हिते तस्मिन्स्थापयामास वै मुनिः ॥ गणेशमूर्त्तिं प्रासा
दं कारयामास सुंदरं ॥ ४५ ॥ वरदेति च तन्नाम स्थापयामास शाश्व
तं ॥ सिद्धिस्थानं च तत्रासीद्गणेशस्य प्रसादतः ॥ ४६ ॥ कामान्कृत्वातिस
र्वेषां पुष्पकं क्षेत्रमत्यपि ॥ पूजयामास तां मूर्त्तिं भक्तिभावसमन्वि
तः ॥ ४७ ॥ इमां कथां यः शृणुयान्मुनींद्र श्रीविघ्नराजस्य वरप्रकाशं
लभेत कामानखिलान्गणेशभक्तिं दृढां संसृतिमोचनीं च ॥ ४८ ॥ इ
ति श्रीगणेशपुराणे उपासनाखंडे वरदाख्यानं नाम सप्तत्रिंशत्तमो
ध्यायः ॥ ३७ ॥ व्यास उवाच ॥ ततो गत्समदस्यासीत्कथं वृत्तिः सुरेश्वर
तन्ममाचक्ष्व यत्नेन श्रद्दधानस्य पद्मज ॥ १ ॥ क उवाच ॥ ततः सर्वे मुनिग २२५

णमानयामासुराद्दरात् ॥ अस्मन्मुनिवरश्रेष्ठेनैमिषेतत्समंरचितं ॥१॥
वरस्नानाज्ञणेशस्यवक्रतुस्तंयत्तकर्मणि ॥ सर्वारंभेगणेशस्यपूजनादेव
सस्मरुः ॥२॥ एवंविख्यातिमगमत्सम्मुनिर्गणनायके ॥ भक्तिंपरमि
कांचक्रेजपन्मंत्रंसुनिश्चलः ॥४॥ कदाचित्सम्मुनिर्व्यासस्तुल्लवे
बलविन्तरं ॥ दिशोनभश्चपृथिवींनादयन्गिरिगह्वरान् ॥५॥
अपश्यत्पुरतोयावत्तावद्बालंभयंकरं ॥ रक्तवर्णंमहानादं
जपाकुसुमसन्निभं ॥६॥ तेजोराशींचमुखंलंबंनेत्राल्लोकपथेम
रूः ॥ दृष्ट्वासताहृशंबालंचकंपेभयविह्वलः ॥७॥ तर्कयामास
मनसाविघ्नःकोयमिहागतः ॥ नजानेगणनाथेननदत्तःपुत्रो

मयाद्भुतः ॥ ९ ॥ पश्यति स्म पुनः सोमं चारुवक्त्रं सुलोचनं ॥ चारुरत्नमां
गदं चारुमुकुटं चारुनूपुरं ॥ १० ॥ चारुणा कटिसूत्रेण राजत्कटितटं मु
ग॰ तं ॥ पप्रच्छ तं मुनिः कोसि कस्यासि किं चिकीर्षसि ॥ ११ ॥ क्व च ते पितरौ
पु॰ स्थानं वद तेजोनिधेर्भकः ॥ कउवाच ॥ श्रुत्वेत्थं वचनं तस्य जगाद बा
२२६ लको मुनिं ॥ १२ ॥ बालउवाच ॥ भूतभाविभवज्ज्ञानी किं मां त्वं परिपृच्छसि
तथाप्याज्ञावशो वच्मि सुतातात्तव जनिर्मम ॥ १३ ॥ त्वमेव जनको माता
कृपां कुरु ममोपरि ॥ पालय स्व पितर्मां त्वं दिनानि कति चिन्मुने ॥ १४ ॥
त्रैलोक्याक्रमणे शक्तो देवेंद्रं वशवर्तिनं ॥ काश्यपामि न संदेहो वीक्ष्य से
पौरुषं मम ॥ १५ ॥ कउवाच ॥ इत्याकर्ण्य वचस्तस्य मनसा हर्षसमन्वितः २२६

उवाचस्लस्यायावाचामुनिर्गर्त्समदोयचः ॥१५॥ यद्ययंजातमात्रोपि
प्राक्तस्यैलोक्यकर्षणे ॥ तस्मादस्यप्रदास्यामिस्त्वंमंत्रेस्वत्मजस्यह ॥
१६ ॥ येनास्यवांछितंदेवः परितुष्टोविनायक ॥ पदास्यतिजगत्ख्याथो
ममकीर्तिर्भविष्यति ॥ १७ ॥ एवंसंचिंत्यमनसातस्मैस्वंमंत्रमादिश
त् ॥ गणानांत्वेतितंचाहकुर्वन्नुष्टानमादरात् ॥ १८ ॥ जपस्वैवैदिकं
मंत्रंचिंतस्वाप्यगजाननं ॥ सतुष्टस्तेयदापुत्रसर्वान्कामान्प्रदास्य
ति ॥ १९ ॥ एवंप्राप्यमहामंत्रोजगामतपसेवनं ॥ एकांगुष्टेनावतस्थे
त्रिराहारोजितेंद्रियः ॥ २० ॥ ध्यायन्गजाननंदेवंमनसानिश्चलेनसः
जपतस्तस्यवर्षाणिसार्धायुतमितानिच ॥ २१ ॥ गतानितस्यमुखतो

ग० पु० २२७

बभूवाग्निर्दिशोज्वलन्॥ भयं बभूव देवानां दैत्यानां तलवासिनां
२२॥ ततस्तत्प्रसादात्तुष्टः प्राविरासीद् गजाननः॥ दिशो वितिमिराः कुर्व
न्छादयन् भानुमंडलं॥ २३॥ आमयन्पुष्करं चारु सुविषाणं मुदायु
तः॥ तद्बृंहितरवं श्रुत्वा बालको विह्वलन्निव॥ २४॥ उन्मील्य नयने
पश्यद्देवं तं पुरतः स्थितं॥ चतुर्भुजं महाकायं नानाभूषविराजितं॥
२५॥ परशुं कमलं मालां मोदकां विभ्रतं करैः॥ तेजसा धर्षितस्तस्य
धैर्यं कृत्वा ननाम सः॥ २६॥ बद्धांजलिपुटो भूत्वा प्रार्थयामास तं वि
भुं॥ बालक उवाच॥ किं मां धर्षयसे देव भक्तं त्वां शरणागतं॥ भव सौ
म्यतरो देव देहि मे खिलवांछितं॥ २७॥ क उवाच इत्याकर्ण्य वचस्तस्य २२७

सेववादस्वकंमहः ॥ उवाचपरमप्रीतःसावधानमवार्भकः ॥ २८ ॥ यंध्याय
सिदिवारात्रौसोहंतेवरदोधुना ॥ ममेदंपरमंरूपंस्वप्रकाशंजगन्मयं ॥
२९ ॥ नविदुर्ब्रह्मरुद्राद्याःकुतोवेत्स्यंतिमानवाः ॥ देवाश्चमुनयःसर्वे
नचराजर्षयोरपे ॥ ३० ॥ नासुराःसिद्धगंधर्वाननागानचरानवाः
सोहंतवतपोवश्योवरंदातुमिहागतः ॥ ३१ ॥ परयस्ववरान्मत्तोयान्यां
स्त्वंमनसेच्छसि ॥ ध्रुवउवाचततोबालोधन्योहंतवदर्शनात् ॥ ३२
पिताधन्यतरोमेयस्यसार्थकंजन्ममेतपः ॥ स्तुतिंकर्तुंनजानामिबा
लभावात्सुरेश्वर ॥ ३३ ॥ यतस्त्वंसर्वजगतांकर्त्तापातापहारकः ॥
त्वद्भासाभासयंत्येवरविरग्निश्चचंद्रमाः ॥ ३४ ॥ चराचरंचेतयसेस्व

महिम्नायमहामते।महिमानंमहांतंतेकेशाश्रपिनवैविदुः॥३५॥यदि
मेवरदोसितंतन्मेदेहिगजानन।त्रैलोक्याकर्षणेशक्तिंवसिष्ठांदे
ग० हिमेविभो॥३६॥देवदानवगंधर्वमनुष्योरगराक्षसाः॥वश्यामम
पु० सरासंतुमुनिकिंनरचारणाः॥३७॥मनसाचिंतितंयन्मेतत्तत्सिध्य
१९८ तुमेसदा॥इंद्रादयोलोकपालासेवांकुर्वंतुसर्वदा॥३८॥दृढभोग
नैनेकान्मेमुक्तिंचांतेप्रयच्छच॥अन्यंचतेवरंयाचेपुरमेतत्त्वयास्त
या॥३९॥दृष्यायानुयतश्चात्रनमस्युग्रंतपोमया॥गणेशपुरमिति
चख्यातियातुजनेष्विदं॥४०॥गणेशउवाच॥त्रयाणामपिलोकाना
नामाक्रमंत्वंकरिष्यसि॥सर्वेभ्योनमयंतेस्तिसर्वेवश्याभवंतिह १९८

दा ॥ ४१ ॥ आयसं कांचनं रौप्यं मयाद्दत्तं पुरत्रयं ॥ अभेद्यं सर्वदेवानां
कामगं शंकरं विना ॥ ४२ त्रिपुरेतिच तेनाम ख्यातं लोके भविष्यति ॥
परैकेनचबाणेन शिवो भेत्स्यति तेपुरं ॥ ४३ ॥ तदैव यास्य से मुक्तिं ॥
नात्रकार्यविचारणा ॥ अन्यत्ते वांछितं सर्वं मत्प्रसादाद्भविष्यति ॥
४४ ॥ कउवाच ॥ दत्वेत्थं सवरान्देव स्तत्रैवांतर्दधेविभुः ॥ विषादमगम
द्देववियोगात्त्रिपुरासुरः ॥ ४५ ॥ हर्षं च विपुलं लेभे वरान्प्राप्य यथे ॥
प्सितान् ॥ त्रैलोक्यविजयं कर्तुं यत्तते स्म तपोबलात् ॥ ४६ ॥ इति ॥
श्रीगणेशपुराणे उपासनाखंडे वरप्रदानं नामाष्टात्रिंशत्तमो ॥
ध्यायः ॥ ३८ ॥ व्यास उवाच ॥ ततः किमकरोद्दैत्यस्त्रिपुरोवरदर्पितः ॥ त

ग॰ पु॰ ११९

त्सर्वं कौतुकं मस्त्यं वक्तुमर्हस्यशेषतः ॥ १ ॥ ब्रह्मोवाच ॥ ततः काश्मीरणषा
ण भवां मूर्तिं गजाननीं ॥ स्थापयामास विधिवद्ब्राह्मणैर्मंत्रकोविदैः
२२ ॥ महांतं कांचनं दिव्यं मणिमुक्ताविभूषितं ॥ गणेशपुरमध्ये स
प्रासादं कृतवाश्छुभं ॥ ३ ॥ उपचारैः षोडशभिः पूजयामास तं विभुं
नमस्कारैरसंख्यातैः स्तुतिभिः प्रार्थनैरपि ॥ ४ ॥ तमाप्य देवदेवे
श मनुज्ञाप्य ययौ बहिः ॥ ददौ दानान्यनेकानि ब्राह्मणेभ्यो यथा
र्हतः ॥ ५ ॥ ततस्तदभवत्स्थानं बंगाले त्रिपुरस्य ह ॥ गणेशपुरमित्ये
व सर्वेषां सर्वसिद्धिदं ॥ ६ ॥ ततः स त्रिपुरो दैत्यो गजाननवरोद्धतः ॥ त्र
लोकान्पालयामास देवानामात्रमेरतः ॥ ७ ॥ पश्चात्तयस्तुरंगाश्च ५ ११९

गजाश्वरथिनस्तथा ॥ दशादिग्भ्यो ययुस्तं तु सेवार्थं बलवत्तराः ॥ ८ ॥
राजानः सेवका जाता अनुकल्पनतस्य हि ॥ प्रतिकूला गता मृत्युंयु
द्धं कर्त्तुमनीश्वराः ॥ ९ ॥ एवमाक्रम्य भूखंडं ततो गाद मरावतीं ॥ त
त्रेंद्रो देवगणैर्नानायुद्धं करैः हत्त ॥ १० ॥ ऐरावतसमारूढो ययौ
युद्धाय दंशितः ॥ सोपि सेनां त्रिधा चक्रे चतुरंगां महाबलः ॥ ११
भीमकायं महादैत्यं वज्रदंष्ट्रं च दानवं ॥ धनुर्युद्धे गदायुद्धे च
कोविदं ॥ १२ ॥ अश्वयुद्धे मल्लयुद्धे निष्णातं दैत्यपुंगवः ॥ वीरूपो
वै भीमकायं सन्लोकस्याधिपो भव ॥ १३ ॥ कालकूलं वज्रदंष्ट्रं ज
गाद त्रिपुरो बली ॥ त्रिभागधा नयायाहि सेनया पातालं रसातलं ॥ १४

सेषमुख्यान्सर्वनागान्वशपान्कुरुमथाज्ञया ॥ अहंत्रिभागया
प्राक्रमाक्रमिष्येखिलान्सुरान् ॥ २५ ॥ क उ० ॥ भीमकायोवज्र
ग० दंष्ट्रोयथाज्ञंतौप्रतस्थतुः ॥ चतुरंगबलेर्मुक्तः स्वयंनेदनमयौ ॥
पु० २६ ॥ दिव्यान्हदान्बभंजुस्तेचार्यमाणास्तुसैनिकाः ॥ तत्रस्थित्वा
१२० दैत्यराजोदूतांश्चक्रायप्राहिणोत् ॥ २७ ॥ गत्वायत्रानयंतुमदृश
नायत्नान्विताः ॥ वदंतुममवाक्यंवामस्तुलोकंत्रजाधुना ॥ २८
तत्रत्वांपालयिष्यामिसाम्नादेह्यमरावती ॥ यदियुद्धेचतेबुद्धि
स्तदाशीघ्रंप्रयाहिमां ॥ २९ ॥ स्तेगत्वाप्राक्रमाचख्युस्त्रिपु
रासुरचेष्टितं ॥ श्रुत्वेत्थंवचनंतेषांवज्राहतइवाचलः ॥ ३० ॥ १२०

चकंपेचाचलरिपुर्वायुनेवयथातरुः। चिंतयाव्याकुलीभूतःकिमेत
दितिचिंतयन् ॥२१॥ क्रोधाधानसेनजज्वालसंरक्ताविललोचनः। कु
र्वन्नभस्मेवलोकानांशोषयन्निववारिधीन् ॥२२॥ उवाचदूतानाहूं
तुयांतुयुद्धायसत्वराः ॥ स्वयमैरावतारूढोजगर्जेसुरशत्रुहा ॥२३॥
तेननादेनमहतात्रासयन्भुवनत्रयं ॥ श्रुत्वातद्वचनंतेतुगता
दूतायथागतं ॥२४॥ विबुधाश्चापिसन्नद्धाः नानाशस्त्रासिपा
णयः ॥ भिंडिपालकराःकेचिच्छक्तैपट्टिशैः ॥२५॥ मुद्गरासिधराःकेचि
द्धनुर्बाणकराःपरे ॥ गदाखेटकरानेकेकेचित्तुदंडपाणयः ॥२६॥
एवंदेवगणैर्युक्तोवज्रभृन्निर्ययौबहिः। कृतस्वस्त्ययनोविप्रैर्नो

नाचादितनिःस्वनैः ॥२७॥ अग्निपुरोद्भूतवाक्येनज्ञात्वायुद्धोद्यमं
ग० तुतं ॥ सन्नद्धामकरोत्सेनांप्रहृष्टोचतुरंगिणीं ॥२८॥ असंख्याता
पु० समारुह्यहयारूढोभिनिर्ययौपरस्परंदृष्ट्वातुस्तेसेनेवीरभू
१२१ षणे ॥२९॥ कोलाहलोमहानासीद्बृंहितैर्हेषितैरपि ॥ क्ष्वेडितै
रथघोषैश्चवाद्यघोषैरनेकधा ॥३०॥ ततोझंकारमात्रेणनो
दितास्त्रिपुरेणते ॥ वीरायुयुधिरेदैवैः संसमरेमहानभूत्
३१ ॥ नाभूत्स्वपरबोधोपिजघ्नुरेवपरस्परं ॥ एवंसुतुमुलेज
न्येमृतास्तेसानवाबहु ॥३२॥ सुमनेसोपिपतितादैत्यशस्त्रप्रपी
डिताः ॥ बनुस्तेसैनिकास्तत्रपुष्पिताइवकिंशुकाः ॥३३॥ त्रिशी १२१

याःश्रायिताःकेचिद्दंष्ट्रिहीनास्तथापरे॥क्रमेलकागजाश्चैवद्यार
याश्वाश्वपदातिनः॥२४॥ततःपलायनपरादैत्यायातादिशोदशं
सिंहंदृष्ट्वेवसहसामृगाजीवनकांक्षिणः॥२५॥ततोनिवार्यतत्सैन्यं
वृत्रासुरकरिस्थस्वयं॥क्रोधानलमहाज्वालोगर्जन्मेघइवापरः॥२६
शक्रसान्निध्यमगमद्वृत्तयन्निवरोदसी॥स्वखड्गेनाहनत्तीव्रं
हस्तेवज्रधरंहरे॥२७॥वज्रंपपाततद्धस्तान्नरद्रुतमिवाभवत्
तदारारायाहनद्दैत्यस्तेनैवैरावतंगजं॥२८॥तेरावतःप्रहारेण
पलायनपरोययौ॥ततोजघानसहरिर्मुष्टिनादैत्यपुंगवं॥२९॥स
न्नोणंपतितोभूमौततउत्थायवेगवान्॥जघानमुष्टिनाशक्रंधारे

ग० पु० १२२

ण्यांतमपातयत् ॥ ४० ॥ ततउत्थायमघवादैत्यंप्राहरुषान्वितः ॥ इ
दानीमत्रसमुत्थायसज्जीभवासुरेश्वर ॥ ४१ ॥ ततसविस्मयाविष्ट
उवाचबलगर्वितः ॥ किमर्थंत्वंनिजप्राणैर्निर्दयोसिसुरेश्वर ॥
४२ ॥ कृमिकीटपतंगानांप्राणोतीवप्रियोमतः ॥ गच्छदेवधरिण्यांते
स्थानंदत्तंमयाधुना ॥ ४३ ॥ क ३० ॥ इतितद्वचनंश्रुत्वाजगादबलवृत्र
हा ॥ यद्यहंजीवितात्त्वांहिमोचयामिनचेद्रिपो ॥ ४४ ॥ तदाहंधरणीं
यामित्वद्दत्तांवशगोधम ॥ त्वमेवहतमूर्धायद्धरण्यांयास्यसेख
ल ॥ ४५ ॥ वदत्येवंतुदेवेन्द्रेदैत्येन्द्रोनिर्जघानतं ॥ मुष्टिनाहृदयेक्रुद्ध
स्ततोयुद्धमभूत्तयोः ॥ ४६ ॥ चाणूरकृष्णयोर्यद्वत्परस्परजयैषि १२२

णो हृदयं हृदयेनैव हस्तं हस्तेन जघ्नतुः ॥४७॥ जानुभ्यां जानुनी
चोरू ताभ्यां तौ च निजघ्नतुः ॥ मस्तकं मस्तकेनैव कूर्परं कूर्परेण तु
॥४८॥ हृष्टं हृष्टेन पादाभ्यां पादौ तावभिजघ्नतुः ॥ पादौ गृहीत्वा दैत्यो
स भ्रामयित्वा मुहुर्मुहुः ॥४९॥ तत्याज प्रदूरतः शक्रं यथा न ज्ञायते क्व
चित् ॥ आरुरोह स्वयं तं तु चतुर्दंतं गजेश्वरं ॥५०॥ ततो देवगणाः सर्वे
हिमवद्गिरिगह्वरं ॥ ययुः शक्रं विचिन्वंतो दैत्यसंत्रासतापिताः
॥५१॥ कुत्र वा पतितो देवो द्रक्ष्यामो वा कथं विभुं । एवं संचिंतयंत
स्ते भ्रमंतो ददृशुश्च तं ॥५२॥ अधोमुखं समायांतं देवेंद्रं ते तदैव हि
प्रणेमुर्देवसंघास्तं आलिलिंगुस्तथापरे ॥५३॥ पूजयामासुरपरे

विज्ञयामासकश्चन ॥ पादसंवाहने चास्य चक्रुः केचन भक्तितः ॥ ५४
तत्रैव न्यवसन्सर्वे गुप्तरूपाः सुरास्तदा ॥ दैत्यस्त्वैरावतारूढो ययौ ॥
ताममरावतीं ॥ ५५ ॥ देवस्थानानि दैत्यानामिंद्रासनगतः स्वयं ॥ द
ग० दौ विभज्य प्रत्येकं मानपूर्वं सुरद्विषां ॥ ५६ ॥ दिव्यवादित्रनिर्घोषैः श्र
पु० एवन्गांधर्वनिःस्वनान् ॥ किंनरैः सेव्यमानस्तु रेमे चाप्सरसां गणैः
१२३ ५७ ॥ इति श्रीगणेशपु० उपासनाखंडे सुनासीरपराजयो नामैक
कोनचत्वारिंशत्तमोध्यायः ॥ ३९ ॥ क उवाच ॥ आक्रम्य देवधिष्ण्य
नि दैत्योगाद्ब्रह्मणः परं ॥ पराक्रमं दैत्यकृतं श्रुत्वा देवमुखात्पु
ण ॥ १ ॥ अस्नाययौ नाभिपद्मं विष्णुः क्षीरनिधिप्रिययौ ॥ दैत्यस्यमानसौ
१२३

पुत्रौप्रचंडमुंडौएवच ।२। प्रचंडंस्थापयामासब्रह्मलोकेधिनाय
कं ॥ततश्चंडंचवैकुंठेचकारस्वामिनंस्वयं ॥३॥ ततःकैलासमगमत्तं
चदोर्भ्यामचालयत् भयभीताचगिरिजालिलिंगशंकरंस्मरेशे ॥४॥
तेनतुष्टोमहादेवोदैत्यस्यपौरुषेणच ॥ बहिर्ययौवरंदातुंनिजभक्त
सुखप्रदः ॥५॥ ददर्शत्रिपुरंदैत्यंवरंब्रूहीत्यथाब्रवीत् ॥ सवव्रेयदि
तुष्टोसिदेहिकैलासमचलंमे ॥६॥ गच्छमंदारशिखरंपावनंममम
नोरथः ॥ शंकरोपिददौतस्मैकैलासंस्वल्पकालिने ॥७॥ स्वयंज
गामगिरिशोमंदाराद्रिंगणैर्वृतः ॥ कैलासशिखरारूढोजहर्ष
त्रिपुरासुरः ॥८॥ एवंदेवान्वशीकृत्वाउन्नरापाद्मसातलं ॥ भीमका

ग॰ पु॰ १२४ योपिबलवान्भूमंडलगतोबलात्॥९॥आश्रमांश्च वशेचका
रन्नृपतीनृषीन्सर्वान्बबंधच॥अग्निकुंडानिसर्वाणिरेवतन्मिकरा
णिच॥१०॥आश्रमांश्चबभंजाश्रतीर्थानिचविशेषतः॥तापसां
स्त्रासयामासकारागारसमाश्रयान्॥११॥स्वाहास्वधावषट्का
रान्वेदस्याध्ययनानिच ~~(सदाचारान्वेदस्याध्ययनानिच)~~ स
दाचारान्सराद्धेष्टिसर्वगर्वसमन्वितः॥१२॥वज्रदंष्ट्रोपिसप्तापिपा
तालानिवसेनपतत् शेषंचवासुकिंचैवतक्षकंसर्वभोगिनः॥१३॥
निर्विषान्सविषांश्चैवचकारवशवर्तिनः॥वज्रदंष्ट्रोरत्नजातं १२४
कुंजेप्रेषयच्चतं॥१४॥नागांगनाभिश्चकुतूहलेनरेमेसदासो

समभूत्सोतिहर्षात् ॥ भोगान्विभुंजे विविधानि रत्नान्याहृत्य यातत्रिभुवं
तिकेसः ॥ २५ ॥ पातालवसुनां शंसं लेभेमानेततोधिके ॥ वस्त्राणि च
महार्हाणि ग्रामान्दासाननेकशः ॥ २६ ॥ एवं त्रिलोकान्वशगान्
कृत्वा दैत्योननंदह ॥ देवाः सर्वे गुहावासाश्चिंतयामासुरन्वहं ॥ २७
कथमस्य वधः कस्मिन्काले वापि भविष्यति ॥ कस्माद्धेतिनजानीमो
लब्धो नेन वरः कुतः ॥ २८ ॥ एवं व्याकुलचित्तेषु मुनिसत्तमः प्राय सुरेषु
यो नारदस्तत्रैलोक्यं चरन्स्वेच्छया ॥ २९ ॥ ददर्शे देवान्दीनांस्ता
नुत्ततार नभः पश्चात् ॥ दृष्ट्वा सर्वे नारदं तं मुत्तस्थुः सहसा च रेत ॥
३० आलिलिंगुश्च नेमुश्च पूपूजुश्च यथाक्रमं ॥ विश्रांतं परिप

ग० पु० १२५

प्रभुस्त्रिपुरस्य वरादिकं ॥ २१ ॥ देवा ऊचुः ॥ त्रिपुरेण समाक्रांतं त्रैलोक्यं
सचराचरं ॥ स्थानानि नो गृहीतानि केशास्तेनापनिर्जिताः ॥ २२ ॥
शरणं कं व्रजामोद्य कथं तस्य वधो भवेत् ॥ वराश्च केन दत्ता नो व
दास्य त्रिपुरस्य मे ॥ २३ ॥ नारद उवाच ॥ कथयामि समासेन दैत्यस्य
चेष्टितं महत् ॥ दिव्यं वर्षसहस्रं स ततापपरमं तपः ॥ २४ ॥ प्रसादया
मास विभुं गणेशं देवनायकं ॥ तेनास्मै दुर्धरा दत्ता वराः सर्वभयंकराः
२५ ॥ देवर्षिपितृभ्यस्तेभ्यो यक्षरक्षःपिशाचतः ॥ नरनागेभ्यो दैत्यरक्षसैः
भयं तस्य विनैकं शंकरं विभुं ॥ २६ ॥ प्रसादयंतु देवेशं द्विरदाननमाद
रात् ॥ आराधयंतु सर्वेपि विघ्नेशं सर्वसिद्धिदं ॥ २७ ॥ देवा ऊचुः ॥ क १२५

समस्तोतिहर्षात् ॥ भोगान्विभुंजेविविधानिरत्नान्यादाययातत्रिपुरां
तिकंसः ॥ २५ ॥ पातालवशगानांशंसंलेभेमानेततोधिके ॥ वस्त्राणिच
महार्हाणिग्रामान्दासाननेकशः ॥ २६ ॥ एवंत्रिलोकान्वशगान्
कृत्वादैत्योमनंदह ॥ देवाःसर्वेगृहावासाश्चिंतयामासुरन्वहं ॥ २७
कथमस्यवधःकस्मिन्कालेवापिभविष्यति ॥ कस्माद्धेतिनजानीमो
लब्धोनेनवरःकृतः ॥ २८ ॥ एवंव्याकुलचित्तेषुमुनिसत्तमःप्राय सुरेषु
योनारदस्तत्रत्रैलोक्यचरइच्छया ॥ २९ ॥ ददर्शदेवान्दीनांस्ता
नुत्ततारनभःपश्चात् ॥ दृष्ट्वासर्वेनारदंतमुत्तस्थुःसहसाचरेत् ॥
३० आलिलिंगुश्चनेमुश्चपूजयश्चयथाक्रमं ॥ विश्रांतंपरिप

थमाराधनं स्यदेवदेवस्य धीमतः ॥ कर्तव्यं मुनिशार्दूल कृपया तद्व
दस्व नः ॥ २८ नारद उवाच ॥ अहमेकान्तरं मंत्रं कथयाम्यखिलान्प्रति
तेन मंत्रेण ते सर्वे मया दत्तेन भक्तितः ॥ २९ ॥ अनुष्ठानं प्रकुर्वंतु सर्वे
पि स्थिरमानसाः ॥ पावत्स्वत्यक्षतामेति देवो सौ गणनायकः ॥ ३०
स एवं तद्वधोपायं वदिष्यत्यखिलान्प्रति ॥ नान्योपायं प्रपश्या
मि तस्मात्कुर्वंतु मे वचः ॥ ३१ ॥ क ३० ॥ इत्युक्त्वा नारदास्तानुपदि
श्य मनुं च तं ॥ जगाम तत्क्षणाद्देववीणागानरतो मुनिः ॥ ३२ ॥ त
तः सर्वे सुरवरा गणेशध्यानतत्पराः ॥ एकपादस्थिताः केचित्के
चित्पद्मासनास्थिताः ॥ ३२ ॥ केचिद्वीरासनगताः केचिन्मीलि

तलोचनाः ॥ निराहारा जितश्वासा जेपुर्मंत्रं मुनीरितं ॥ ३४ ॥ ततो बहु
ग० गते काले करुणाब्धिर्गजाननः ॥ अनुष्ठानेन निरीक्ष्यैषां देवानां चि
५० रकालजं ॥ ३५ ॥ आविर्बभूव गणपस्तेषामग्रे वरप्रदः ॥ उल्लस
२२६ त्स्वर्णमुकटश्चारुकुंडलमंडितः ॥ ३६ ॥ दंतं न्यस्तकरो राजत्कटि
सूत्रांवरांगदः ॥ पाशं सृणिं च परशुं कमलं च भुजैर्दधत् ॥ ३७ ॥ र
क्तचंदनकस्तूरीसिंदूरनानाभूषणः ॥ विद्युत्तेजोल्लसत्कांतिः को
टिसूर्यसमप्रभः ॥ ३८ ॥ दृष्ट्वैवं सहसा देवं विनायकमनामयं ॥ ते
जसा धर्षिताः सर्वे भयमापुश्च केचन ॥ ३९ ॥ प्रणेमुः सहसा केचि
द्देवास्तं द्विरदाननं ॥ पूजयामासुरपरे हर्षगद्गदभाषिणः ॥ ४० ॥ २२६

कैलासेनवैकुंठेब्रह्मलोकेपिनेदृशी ७ ॥ परेषांकनैवसंपद्यादृ
शीदृश्यतेतव ॥ दैत्यउवाच ॥ नाममात्रंकलाधारकिंवाजानासि
तांद्विज ॥ ८ ॥ संपदःसर्वलोकेषुयाभ्यएतांप्रशंससि ॥ जानासिचे
द्दर्शयमेतासांमध्येमहोत्कटां ॥ ९ ॥ दृष्टाद्यास्येवांछितंतेप्रियंप्रा
णमपिद्विजः ॥ नस्मरेपरिहासेपिवितथ्यंभाषितंमुने ॥ १० ॥ क
लाधरउवाच ॥ परेषांसंपदोदृष्ट्वाकिंस्यात्तवसुरद्विषः ॥ विनया
त्तेप्रसन्नोहंकलयातेददामिवै ॥ ११ ॥ कांचनंराजतंलौहंत्रिपु
रंपुरसंस्थितं ॥ रमतत्रस्थितोदैत्यचिरकालंयथासुखं ॥ १२ ॥ अ
जेयंदेवगंधर्वैर्मानुषैरुरगैरपि ॥ कल्पितार्थप्रदंतत्तेकामगंका

मदं सदा ॥ २३ ॥ यद्दैवैकेन बाणेन कस्मिंश्चित्कालपर्यये भेत्स्यते त
द्वरो दैत्य तदा नाशमुपेष्यति ॥ २४ ॥ क० ॥ इत्युक्त्वाथ धनुरादाय संस्त
ग० पु० म्य शरमंतरा ॥ शरत्रपं निर्ममे सो भुवनत्रयसन्निभं ॥ २५ ॥ विचि
त्रैर्भुवनैरम्यैर्दीपिकारामसंयुतैः ॥ नानापक्षिगणैर्जुष्टं सर्वका
१२९ मप्रदं खगं ॥ २६ ॥ मायया मोहितो दैत्य तत्र स्थो जहृषे भृशं ॥ जग
र्ज घनवद्दैत्यो लोकत्रयविकंपनः ॥ २७ ॥ न मत्तः श्रेष्ठ इत्येवं गर्व
दर्पसमन्वितः ॥ त्रैलोक्यं क्षोभयामास ब्राह्मणं तमथाब्रवीत् ॥
२८ ॥ याचस्व दुर्लभतरं तत्ते दास्ये द्विजोत्तम ॥ इत्युक्तः स द्विजोप्या १२९
ह तं दैत्यं निस्पृहोपि सन् ॥ २९ ॥ द्विज उवाच ॥ अहं कैलासमग

मे दृष्टवान् मूर्त्तिमुत्तमां ॥ शिवेन पूजितां सम्यग्गणेशी चिंतिता
थ्येदां ॥ २० ॥ तामानइ त्वामे देहि शक्तिर्यदि सुरेश्वर ॥ नेतादृशी
मया मूर्तिस्त्रैलोक्ये चरतेक्षिता ॥ २१ ॥ प्रतोममम नस्तस्या मा
सक्तं दैत्यसत्तम ॥ तामवाप्य कृतकृत्योहं भविष्यामि सुरेश्वर
२२ कीर्तिं प्रथइष्यामि त्रैलोक्ये सचराचरे ॥ न दातात्रिपुरात्
श्रेष्टो वांछितं यः प्रयछति ॥ २३ ॥ दैत्य उवाच ॥ शंकरं किंकरं म
न्ये गणये न च देवताः ॥ आनयित्वा प्रदास्येहं तां मूर्त्तिं द्विजपुं
गव ॥ २४ ॥ इत्युक्त्वा पूजयामास तं कलाधरमादरात् ॥ ददौ त
स्मै दशग्रामान् गोवस्त्रभूषणानि च ॥ २५ ॥ मुक्ताफलानि भू

शाणि महार्हाणि तराणि च ॥ रत्नानि च प्रवालानि रांकवास्तर-
णानि च ॥ २६ ॥ दासीदासशतं नानाभूषायुक्तं ददे सुरः ॥ सदश्वा
ग० न्सवरूथांश्च स्वर्णरत्नान्रजतान्रथान् ॥ २७ ॥ प्रशशंस तद्वलाढ्यं
पु० तं प्रययौ स कलाधरः ॥ स्वाश्रमं हर्षयन्पत्नीं सर्वांनाश्रमवासिनः
१३० २८ ॥ क उवाच ॥ एवं सर्वं सवृत्तांतं नारदो कथयत्सुरान् ॥ ते पि का-
लं प्रतीक्षंतो दिवसानतिचक्रमुः ॥ २९ ॥ इति श्रीगणेशपुराणे
नारदगमननामैकचत्वारिंशत्तमोध्यायः ॥ ४१ ॥ व्यास उवाच
कृतवान्किमु दैत्यः स गते तस्मिन्कलाधरे ॥ पद्मामानीय तत्रासौ
मूर्तिश्चिंतामणी शुभा ॥ १ ॥ एतत्कथय मे सर्वं विस्तार्यं चतुरानन ॥ ली १३०

लागजाननीश्रृणुवन्नैहेप्यामिसमासतः२क३० तस्मिन्मातेपद्रक
रोत्सदैत्योमुनिसत्तम॥तत्सर्वंकथयिष्यामिश्रृणुष्वावहितोमुने
३॥इतोसंक्षेपयामासमंदराद्रिस्थितंशिवं॥तावशिष्यापृच्छिवंगत्वा
द्भुतंमहाक्यमादरात॥४॥मूर्त्तिमिन्त्रितामणेस्त्वेस्तिगृहेसर्वार्थदा
सुभा॥देहितांदैत्यराजायप्रसानेवगिरिजापते॥५॥पातालेस्वर्ग
लोकेचामर्त्येयत्परमाद्भुतं॥तत्सर्वंतेनदैत्येनह्यानीतंस्वगृहे
बलात॥६॥श्रीघ्रमानयतांदेवपावोदैत्यमहाबलं॥नदास्यसेय
दासाम्नोतदादैत्यःपराक्रमी॥७॥ग्रहीष्यतिबलातांनुततोडुःख
मवाप्स्यसि॥इत्युक्तंहृतवचःश्रुत्वात्रिनेत्रःक्रोधमूर्छितः॥८॥

वाचद्भूतोद्भूतौवामितिकृत्वात्तमेवच॥ कामस्यैवभवेद्भस्मनो
चेदंनात्रसंशयः॥९॥ किंकार्यंतेनदैत्येनत्वणीभूतेनमेविभोः
त्रायातुयुद्धमेवास्तुमर्त्तुकामोस्म्यंतिकं॥१०॥ नेयंमूर्त्तिस्तेन
ग॰ शक्याप्राप्तुंजन्मशतैरपि॥ प्रत्ययाग्निःपतंगेनकिंशांतिमधिग
पु॰ च्छति॥११॥ मेरोःपातोमूषकेनशक्यःकर्त्तुंकिमोजसा॥ त्रसंस्य
२३१ जलनिःकाशाद्बुष्कःस्यात्किंमहोदधिः॥१२॥ क०उ० त्वात्तुशा
करीवाणींदैत्योयातोयथागतं॥ अब्रूतांस्वामिनंवाक्यंशंभुनायद
हीरितं॥१३॥ तदाकर्ण्यप्रजज्वालदैत्योवाक्यार्थकोविदः॥ क्रो
धानलेनदीप्तोभूत्त्रैलोक्यंप्रदहन्निव॥१४॥ प्रज्ञापयच्चयुद्धाय २३१

स्वसेनांचतुरंगिणीं॥निर्गत्यसहसासेनामंदराचलसंमुखा॥१५॥
भूतलंछादयामासनिर्मर्यादोयथांबुधिः॥अनेकसूर्यसंकाशश्रि
काशैःशस्त्रसंचयैः॥१६॥गर्जतीघनवत्घोरंमृत्योमानसकंपिनिः
दैत्यस्त्रिपुरमारुह्यविमानसदृशंमहत्॥१७॥मनोवेगंततःप
श्चाज्जिघांसुःशंभुमापयौ॥बृहन्माणिमयंचारुकवचैकुंडले
गदे॥१८॥मुक्तामालांमुद्रिकाश्चकटिसूत्रंचकांचनं॥मुकुटंर
त्नखचितंमहार्घंबिभ्रद्दृहत्नसत्॥१९॥यस्यपशाब्देनमहताच
कंपेहरमानसं॥तद्धनुःसनिषंगंचकौमंखेटमसिंदृढं॥२०॥
मुमुमेपशस्त्रिकादिव्यावहंयांदैत्यपुंगवःगायमानान्नृत्यमा

नागंधर्वाप्सरसांगणाः ॥२१॥ बंदिनश्चारणाश्चापि ययुरस्याग्रतोमुदा
शंकरोद्दूतवाक्येन श्रुत्वादैतंसमागतं ॥२२॥ असंख्यबलसंयुक्तं यु
युत्सुंकालकर्षितं ॥ शूलपाणिरपितदासंपूज्याद्विरदाननं ॥२३॥ प्रणि
पत्यतांपरिक्रम्यपुरस्कृत्यबलंबहु ॥ आययौक्रोधदीप्ताक्षः स्व
खलाङ्गणमंडलं ॥२४॥ तेवीरावीरशब्देन नादयंतोदिशोदिश ॥ अ
भिजग्मुःप्रहरणैः परस्परवधेप्सवः ॥२५॥ अभूत्तांमीलितेसै
न्येरजस्तिमिरसंकुले ॥ स्वपरज्ञानरहितेजघ्नतूरणमूर्धनि ॥२६
अभवत्तुमुलंयुद्धंनप्राज्ञायतकिंचन ॥ गजाश्वरथवीराणांदंता
नांशोणितोक्षिते ॥२७॥ शांतेरजस्ययुध्यंतवीरावीरैःपृथक्पृ

थक् ।। केचित्प्रासैः केपि खड्गैः केचिद्बाणैः शिलासितैः ।। २८ ।। ऋषि
भिर्मुष्टिभिः केचित्केचित्परशुतोमरैः ।। हतानां तत्र वीराणां हयानां
च पदातिनां ।। २९ ।। असृक्कृनदी समभवत्केशशैवलशोभिनी ।। खेट
कूर्मा खड्गमत्स्या शिरःकमलभूषणा ।। ३० ।। छत्रावर्त्ता घोरतराक
बंधहस्तवाहिनी ।। वीरसंतापजननी रणगोमायुहर्षकृत् ।। ३१ ।। दृ
ष्ट्वा नदीं तु गिरिशो ययौ दैत्यांतिकं बली ।। दैत्योपि त्रिपुरारूढो य
यौ तस्य पुरः पुरः ।। ३२ ।। नायकौ संगतौ दृष्ट्वा द्वंद्वशोन्ये परस्परं अव्या
कुलं युयुधिरे दैतेयाः प्रांमवास्तदा ।। ३३ ।। नानाप्रहरणैर्दिव्यैः शा
स्त्रैरस्त्रैर्द्रुमैरपि ।। तेषां युद्धानि नामानि कथयिष्ये समासतः ।। ३४

ग०
पु०
१२२

इति श्रीगणेशपुराणे उपासनाखंडे युद्धवर्णनाम द्विचत्वारिंशत
मोध्यायः॥ ४२ क ॐ अयुद्धेतां द्वंद्वशोथ गिरीशाणसुरनायकौ
षण्मुखेन प्रचंडस्त्वनंदिना चंडएव च॥ १॥ युयुधे पुष्पदंतोपि भीम
कायेन वीर्यवान्॥ भृंगिरिटिः कालकूटेन विषवत्प्राणहारिणा॥
२॥ अयुद्धेतां वीरभद्रवज्रदंष्ट्रौ महाबलौ॥ इंद्रोपि युयुधे तत्र दै
त्यामात्येन वीर्यवान्॥ ३॥ दैत्यपुत्रेण बलिना जयंतो युद्धदुर्मदः॥
काव्येन युयुधे तत्र सुराचार्योस्त्रवित्तमः॥ ४॥ देवानां चैव दैत्याना
मेवं द्वंद्वान्यनेकशः॥ वर्णितुं नैव शक्यानि मया वर्षशतैरपि॥ ५
रथिनो रथिभिः सार्धं गजिनो गजिभिः सह॥ अश्वारोहस्सदृशै

परां ताश्च पदातिभिः ॥६॥ युयुधुः संयुगे घोरे नानावाद्यनिनादिते
हेषितैः क्ष्वेडितैः क्ष्वेडैर्नेमिनादैश्च पूणाह्निते ॥७॥ केचिच्च मल्लयु
द्धेन युयुधुर्विविधेन तु ॥ जघ्नुरंगानि चांगेषु त्यक्त्वा शस्त्राणि सं
युगे ॥८॥ ततः प्रचंडो नवभिस्ताडयामास षण्मुखं ॥ आकर्ण्य क
र्णिनिस्तै हृष्टैर्वाणैः शिलाशितैः ॥९॥ अप्रामान्नवतां छित्वां श
रैसंततपर्वभिः स्कांस्ताडयामास सायकैः ॥१०॥ संमूर्छितोपत
न्मूर्च्छा प्रचंडो भ्रांतमानसः ॥ नैरिनापि हतश्चंडः पंचभिर्निशितैः
शरैः ॥११॥ मूर्च्छामवाप सहसा पतितो धरणीतले ॥ भीमकायः
पुष्पदंतमविध्यत् दशभिः शरैः ॥१२॥ छेदयामास समरे स्वशरैः

ग० पु० २३४

निशितैः सतान् ॥ त्रिभिरेवाहनत्तंच सोपिमूर्च्छामाश्रितः ॥ २३
कालकूटंम्नं गिरिस्तुपा॰तयामासपंचभिः ॥ शरैर्महाबलस्तत्र
वीरभद्रोरुषायुतः ॥ २४ ॥ वज्रदंष्ट्रं ततो जघ्ने चतुर्भिर्निशितैः शरैः
२५ ॥ इंद्रोपि वज्रपातेन दैत्यामात्यंन्यपातयत् ॥ उद्यम्यानिशि
तखड्गं दैत्यपुत्रः समाययौ ॥ २६ ॥ तानापतत एवाशु वीरभद्रो
छिनत्त्रिभिः ॥ पातयामास वेगेन वज्रदंष्ट्रं त्रिभिः शरैः ॥ २७ ॥ हं
तुकामो जयंतं तं वीरेषु पतितेषु च ॥ तन्निरीक्ष्य पतत्थायातं ख
ड्गं चिच्छेद पत्रिणा ॥ २८ ॥ जयंतोप्यहनत्तीव्रं दैत्यसूनुं त्रिभिः
शरैः ॥ तैराहतो मन्त्रक्रमपतन्मोहसंयुतः ॥ २९ ॥ एवं सर्वेषु सै २३४

न्येषुप्रभग्नेषुसमंततः॥दृष्ट्वापलायनपरान्दैत्यान्देवगणार्दिता
न्॥२०॥प्राधावन्पृष्ठतःकेचित्समघ्राजयपशालिनः॥एवंजयत्सुदे
वेषुस्वसैन्येविद्रुतेपिच॥२१॥प्रापययौस्वयमेवेशंत्रिपुराधिष्ठितो
सुरः॥शास्त्रयुद्धंपराकृत्वायुयुधेतामस्त्रतोप्रभौ॥२२॥वारुणा
स्त्रंजहौदैत्योदृष्टिर्घोराततोभवत्॥नीहारबहुलेयुद्धेनप्रा
ज्ञायतकिंचन॥२३॥क्वचिद्विद्युत्प्रकाशेनस्वपरज्ञानकारिणा॥यु
द्धमासीत्तुमुलंघोररूपंडरासरं॥२४॥विलोक्यसर्वसैन्यंतद्दृ
ष्टिवातप्रपीडितं॥शिलापातभयाघातेस्वसैन्येतुदिशोदश॥
२५॥वायव्यमस्त्रंगिरिशोमोचयामाससत्वरं॥महाबातहंता

मेघाविशीर्णाः खंडशोंबरे ॥२८॥ वातेन घूर्णिता सेना दैत्यानां सर्व
तो दिशं ॥ जग्मुः पक्षिपिच्छानि वीरोष्णीषाणि दूरतः ॥ पतितेघू
ग० र्णिताः केचित्‌रथाश्वगजपत्तयः ॥ उन्मीलितालताहस्ताच्छाद
पु० यंतिस्मसैनिकान् ॥२९॥ पन्नगास्त्रेण तं वायुं तदा दैत्योन्यवारय
१३५ त् ॥ आकर्णं धनुराकृष्य तूणाद्बाणं प्रगृह्य च ॥२९॥ मंत्रयन्बला
स्त्रेण शिवसैन्ये न्यपातयत् ॥ अंगारदृष्टिः सहसा पतिता सर्व
वाहिनी ॥३०॥ प्रलयं मेनिरे सर्वे ज्वालामालाभिरर्दिताः ॥ ज्वा
लाभ्यो दीप्यमानाभ्यो महाभीतिंकरः पुमान् ॥३१॥ आविरा
सीन्महाकायो खिलमूर्धा नभस्तलं ॥ दंष्ट्राकरालवदनो म १३५

हारावोद्गतधातुवः॥२२॥ज्वालयन्रसनांघोरांशतयोजनविस्तृ
तां॥नासाध्वनवेगेनभ्रामयन्कुंजरान्रणे॥२३॥भक्तयामा
सतांसेनांधीवरानिवपत्तिराट्॥अपीपलद्रगेसेनातेनतुंसाप्रपी
डिता॥२४॥शिवदृष्टंसमासाद्यस्तरदेतिचाब्रवीत्॥माभैष्टेत्य
भयंतस्मैदत्वावन्हिन्यवारयत्॥२५॥पर्जन्यास्त्रप्रपातेनतत्क्ष
णाद्गिरिजापतिः॥बाणेनैकेनतंघोरंपुरुषंसैन्यपातयत् २६
ततउत्थायपुरुषोभक्षयच्छिवसैनिकान्॥पपुःपलायनपराः
प्रमथाभयविह्वला॥२७॥सबलंतोनिःपतंतश्चनिःश्वसंत
श्चकंपिरे॥शिवोपनिःमहायत्वाऽसरीमेवान्वपद्यत॥२८॥पुरा

ननादयोवीराश्चतुसस्कस्तमेवहि॥ जिघृक्षुगिरिजांदैत्योविचिं
ग० त्यैकाकिनींगिरौ॥३९॥विहायरणभूमिंतुययौकैलासमेव
पु० सः॥दूराद्दृष्ट्वातमायांतंचकंपेगिरिजातदा॥४०॥उवाचपितरंग
१३६ त्वादैत्योमांकिंनुनेष्यति॥तस्यास्तद्वचनंश्रुत्वानीत्वातांडुर्गे
मांगुहा॥४१॥अविज्ञातांस्वेतरेणस्थापयामाससनिर्भयां॥सोपि
दैत्यस्ततोहैमंगिरिंतद्ग्रहणेछया॥४२॥आगतोनददर्शाथ
रिजांक्वापिसत्तम॥अमनूददर्शतत्रैकांमूर्तिंचिंतामणेःशुभां॥
४३॥सहस्रसूर्यसंकाशांनानालंकारशोभिनीं॥त्रैलोक्यसुंदरां
सद्योगृहीत्वास्वस्थलंययौ॥४४॥नानावादित्रनिर्घोषैःस्तुवन्जि १३६

वैरिभिर्हतः ॥ ततः पातालमगमत्सर्वत्रविजयी बली ॥ ४५ ॥
गच्छतस्तस्य दैत्यस्य हस्तस्थांतर्हिता तदा ॥ मूर्तिश्चिंतामणेः
सा तु तदद्भुतमिवाभवत् ॥ ४६ ॥ तमेवापशकुनं मत्वा तत्पुरं स
नराविशत् ॥ अत्यंतं विमनाश्चिंताऽऽतुरत्वं समुपागतः ॥ ४७
इति श्री गणेशपुराणे उपासनाखंडे विजयवर्णनं नाम त्रि
चत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥ व्यास उवाच ॥ ततः किमकरो
च्छंभुस्त्रिपुरेण पराजितः ॥ कथं तमजयद्दैत्यं त्रिपुरं जयशा
लिनं ॥ ततः शंभुः परां चिंतामापेदे मनसाकुलः ॥ स्वाहास्वधा
विहीनं तु भूतलं परिचिंतयन् ॥ २ ॥ कदाचित्स्थानगा देवा म

विध्वंतिगतज्वराः॥ केनोपायेनवास्यस्याऽजेयस्यपराजयः
३॥ एवंचिंतातुरेतस्मिन्नारदोमुनिसत्तमः॥ आययौशंकरं
ग॰ द्रष्टुंदेवान्सर्वान्यदृच्छया॥४॥ तंदृष्ट्वाजहृषुर्देवामर्त्यंप्राप्य
पु॰ यथामृतं॥ पूजयामासविधिवत्कृत्वासनपरिग्रहं॥ पृष्ट्वा
१३७ लिंगपतमुवाचेत्थंशिवश्चिंतातुरोभृशं॥ देवानांहितमन्वि
च्छन्दैत्यस्यवधमेवच॥६॥ शिवउवाच॥ दैत्येनसर्वदेवानां॰
कदनंकृतमोजसा॥ तद्गणे भग्नसंकल्पाः सर्वेदेवाःपला
यिताः॥७॥ पातालस्थारिपोर्ब्रह्मन्कः कुर्यात्तेनविग्रहं॥ म १३७
मापिशस्त्राणितेनास्त्रैः प्रभग्नानिसहस्रशः॥८॥ कठवा॰

श्रुत्वा शिववचः सोमुमवादीन्मुनिसत्तमः ॥ मन्वानः परमाश्च
र्यं त्रैलोक्ये प्यपराजयं ॥ ९ ॥ नारद उवाच ॥ सर्वज्ञे सर्वविद्येशे सर्वे
शे सर्वकर्तरि ॥ सर्वावने सर्वहरे सर्वस्यापि नियंतरि ॥ १० ॥ शक्ते
कर्तुमकर्तुं वान्यथा कर्तुमपि प्रभो ॥ अणिमाद्यैर्गुणोपेते षडैश्व
र्यविलासिनी ॥ ११ ॥ किं वक्तव्यं मया देव सर्ववक्तृवरे त्वयि ॥ मुनि
नागमसक्तेन त्रिलोकीभ्रमता दिशं ॥ १२ ॥ तव वाक्यानुरोधेन
विचार्य प्रब्रवीम्यहं ॥ एवमुक्त्वा क्षणं ध्यात्वा पुनः प्राह शिवं
मुनिः ॥ १३ ॥ मुनिरुवाच ॥ पुष्कराय गंतुकामेन नार्चितो गणप
स्त्वया ॥ अतः पराभवः प्राप्तो वह्निनेत्र पिनाकधृक् ॥ १४ ॥ इदानी

मर्चय पुरा विघ्नेशं विघ्नवारणं ॥ प्रसाद्य तद्वरं लब्ध्वा याहि युद्धाय सादरं
२५ ॥ परं जेष्यसि तं दैत्यं नात्र कार्या विचारणा ॥ तेनापि तत्प्रसादेवा मह
ताराधितः पुराः ॥ २६ ॥ तेन तस्यैव रोदन्नो विल्लविघ्नोघहारिणा ॥ महेश्वरं
१३८ विना मृत्युर्न केनापि भवेत्तव ॥ तस्माद्गिरिशतस्येदं कामगंतुपुरत्र
यं ॥ एकेषुणा दारयस्व जयोपायमीरितः ॥ २८ ॥ क उवाच प्रहर्ष
मतुलं लेभे श्रुत्वोपायं मुनेः शिवः ॥ स्मृत्वा गजाननं गिरं पूर्वो कां प्र
हतं मुनिं ॥ २९ ॥ शिव उवाच ॥ सत्यमुक्तं त्वयात्र ह्यं स्त्वद्वाक्येन स्मृतं
मया ॥ २० ॥ उपदिष्टोऽपूर्वमेव मंत्रो तेन मुनेर्मम ॥ षडक्षरैकाक्षरोतो
सर्वसंकटहारकौ ॥ २१ ॥ पुरा व्यासस्मृतिचितेन नजप्तोमच संस्मृतौ सर्वं १३८

विघ्नहरोदेवोनमस्ततोपिगजाननः ॥२२॥ सर्वेषांकारणंकर्त्ता
पाताहर्त्ताविनायकः ॥मुनिरुवाच॥ ततोषपमहादेवमहादे
वंगजाननं ॥२३॥ कउवाच॥ विसर्ज्यनारदंदेवोजगामतपसे
शिवः दंडकारण्यदेशेतुपद्मासनस्थितोजपत् ॥२४॥ विसर्ज्य
नारदंदेवोजगामतपसेशिवः ॥दंडकारण्यदेशेतुपद्मासनस्थि
तोजपत् ॥२४॥ प्रणिधानबलात्स्वानिनियम्यध्यानतत्परः ॥
सोतपत्तपउग्रंतुदशवर्षाणिशंकरः ॥२५॥ ततस्तस्यमुखांभोजा
न्निर्गतस्सुप्रमान्परः ॥पंचवक्त्रोदशभुजोललाटेंदुःशशिप्रभः
॥२६॥ मुंडमालासर्प्पभूषोमुकुटांगदभूषणः ॥ त्र्यम्बकशशि

नामितिरस्कुर्वन्दशायुधः॥२७॥तन्नामाधर्षितोदेवोपश्यदग्रे
परस्तुतं॥विनायकंपंचमुखंपंचास्यमपरंशिवं॥२८॥तंदृष्ट्वांत
ग० र्कयद्देवःकिमहंद्विविधोभवं॥किंवाममैवरूपेणत्रिपुरोयम्
पु० मिहागतः॥२९॥त्रयस्त्रिंशत्कोटिदेवेष्वपरःपंचवक्त्रवान्
१३९ अथवास्यसमएवायंदृष्टोदीर्घतरोमया॥३०॥अथवामेवरंदा
तुमागतोगजाननः॥सर्वविघ्नहरंदेवंयंध्यायामिदिवानिशं
३१॥कउवाच॥अंतेयत्कीर्तितंदेवसोहंविघ्नहरोविभुः॥३२
नमेस्वरूपंजानंतिदेवर्षिचतुराननाः॥नवेदाःसोपनिषदःकु १३९
तःषट्शास्त्रवेदिनः॥३३॥अशेषभुवनस्याहंकर्ताधातापहा

रकः॥ब्रह्मादिस्थावरचरत्रिगुणनामहंप्रभुः॥३४॥तपसाने
नेतुष्टोहंवरंदातुमिहागतः॥वरान्वृणुमहादेवयायंतोमत्त
इच्छसि॥३५॥इतिश्रीगणेशपुराणेउपासनाखंडेतपोवर्ण
नंनामचतुश्चत्वारिंशतमोध्यायः॥४४॥व्यासउवाच॥ततः
प्रसन्नेदेवेशेविघ्नेशविघ्नहारिणी॥वरान्दित्सतिसर्वोय।
किंकिंवव्रेतदाशिवः॥२॥कउवाच॥गणेशवचनंश्रुत्वाशि
वोवाक्यमथाब्रवीत्॥मत्वागजाननंश्रुत्वाशिवोवाक्यमथा
ब्रवीत्॥मत्वागजाननंतंतुस्वरूपंवरदंप्रभुं॥२॥शिवउवाच
रक्षणपिनेत्राणिममाद्यधन्यान्यघोभुजाः३जनतस्तवाद्य॥न

वानतेः पंचशिरांसिधन्यान्यथास्तुतेपंचमुखानिदेव ॥३॥ पृथ्वी
जलंवायुरथोदिशश्च तेजश्चकालः कलनात्मकोपि ॥ नभो
ग० रसोरूपमघ्राणगंधस्पर्शश्चशब्दोमनइंद्रियाणि ॥४॥ गंधर्व
पु० यक्षाः पितरोमनुष्याः देवर्षयोदेवगणाश्चसर्वे ॥ ब्रह्मेंद्ररुद्रा
२५० वसवोथसाध्यास्त्वत्तः प्रसूतासचराचरश्च ॥५॥ रजस्वरूपो
विश्वमनन्यबुद्धेरजोगुणात्पासिसमस्तमेतत् ॥ तमोगु
णात्संहरसेगणेशनित्योनिरीहोखिलकर्मसाक्षी ॥६॥ कु
ततोहमब्रुवंदेवंगणेशंतंशिवात्मया ॥ नामचाकरवंतस्यय
त्तद्गुणमहामते ॥७॥ त्वन्नामबीजंप्रथमंमंत्रकाणांॐ८ २५०

काररूपं श्रुतिमूलमस्तु ॥ यतो गणनाम तीशायीन गणेश
इत्येव तवास्तु नाम ॥ ५ ॥ ॐ मित्यथोक्ते गणनायके न तु तोष
श्चर्वः प्रसरैश्वराश्च ॥ यः सर्वकार्येषु तवेश कुर्यात्स्मृतिं त्वदंते
स लभेद्वविघ्न ॥ ६ ॥ विनास्मृतिं ते न लभेच्च कोपि वांछार्थसि
द्धिं कृमिकीटकोपि शेषैर्वैस्तु रीयैरथ वैस्मवैश्च शक्तैश्च सौवै
रथ सर्वकार्ये ॥ ७ ॥ श्रुभामुमे वैदिक लौकिके वा त्वमर्चनी
यः प्रथमं प्रयत्नात् ॥ यन्मंगलं सर्वजनेषु देवसयत्तरिया
धरकिन्नरेषु ॥ ८ ॥ तस्येश्वरो मंगलमूर्तिलांत्वं यातो यतो
मंगलकृत्स्य मक्तो ॥ अहंपुरा नर्च नतस्तवेश त्वय्यस्मरतेदत्य

वरस्ययुद्धे ॥ २२ ॥ अवंदनाच्चापिपदाभवंतेततस्त्वदंघ्रिंशरणं
प्रपन्नः ॥ क्षमापराधंममसर्वशक्तेजयंप्रयच्छाखिलजन्य
ग० काले ॥ २३ ॥ यःसर्वथात्वंनभजंतिदेवजगदादरिद्राप्रभवंत्य
पु० तोपि ॥ क उवाच ॥ इत्थंनिशम्याखिलवाक्यसारवेत्ताक
१५२ द्वाक्यमिदंगिरीशं ॥ २४ ॥ यदायदामेस्मरणंविदध्यास्त
दांतिकेतेहमियामुमेश ॥ मन्नामबीजेननिमंत्र्यएकंबाणं
तुतेनैवपुरत्रयंतत ॥ २५ ॥ निपातयास्मिन्महसामहेश कृ
त्वासदैत्यंरखभुभस्मसात्वं ॥ ततःस्वनाम्नाममवरत्सहस्त्रंगणा
धिपोस्मैप्रणतायसम्यक् ॥ २६ ॥ शिवाष्टमभक्त्यापरितुष्टचित्तो ॥ १५२

जयप्रदं कामकरं जनानां ॥ उवाच चैनं रणकाले एतत्पठस्व दे
त्यान्विनिहंसि शीघ्रं ॥ १७ ॥ त्रिसंध्यमेतस्य जपान्नराणां सिध्यं
ति कामाः सकलाभिष्टाः ॥ कउवाच ॥ श्रुत्वा तु वाक्यं द्विरदान
नस्य तं शंभुः सम्यक् शिवशंभुः प्रहर्षः ॥ संस्थापयामास महाग
णेशं प्रसादमुच्चैर्ददृमाप्य चक्रे ॥ १८ ॥ संतर्प्य देवान्मुनिसंघ
संघान्दानानि दत्वा द्विजपुंगवेभ्यः ॥ पुनः पुनः प्रणम्य नमश्च
कार देवं गिरीशो वरदं गणेशं ॥ १९ ॥ उवाच सर्वान्मुनिश्वरान्यं
ठ विख्याति मागच्छतु लोके ॥ देवेन सर्वैश्च तथा दिवैतैरं तदं
धुस्तेगणनाथमुख्याः ॥ २० ॥ अंतर्हिते मुनिगणेभ्य सुरेगणे

शे सर्वोप्यगात्स्वनिलयं स्वगणैरुपेतः॥ गंधर्वयक्षनिवहै र
मरांगनाभिर्हृत्तं निजं परमुदा गिरिजामुवाच॥ २१॥ श्रुत्वांत
गं० दामृतवचः सकलं गिरीशाण्देवेश्वरामुमुदिरे मुनयः सरा
पु० गाः॥ योगेश्वराश्च निहतं त्रिपुरं स्वधिष्ण्यमासं सताप्यधिगतं
१५२ गिरिशप्रसादात्॥ २२॥ इतिश्री गणेशपुराणे० उपा० गिरि
शवरदानंनाम पंचचत्वारिंशत्तमोध्यायः ४५ मुनिरुवा०
कथं नाम्नां सहस्रं तं गणेश उपदिष्टवान्॥ शिवदं तन्म
माचक्ष्व लोकानुग्रहतत्परः॥ १॥ ब्रह्मोवाच॥ देवदेवं पुरारा
तिपुरत्रयवधोद्यमे॥ अनर्चनाद्गणेशस्य जातो विघ्नांकुरः॥ २॥

किल॥२॥मनसासविनिर्धार्यदद्दशेविघ्नकारणं॥महागणपतिं
भक्त्यासमभ्यर्च्ययथाविधि॥३॥विघ्नप्रशमनोपायमपृच्छदपरि
श्रमं॥संतुष्टः पूजयाशंभोर्महागणपतिस्स्वयं॥४॥सर्वविघ्नप्र
शमनंसर्वकामफलप्रदं॥ततस्तस्मैस्वनाम्नांसहस्रमिदम
ब्रवीत्॥५॥ॐ अस्यश्रीमहागणपतिसहस्रनाममाला
मंत्रस्यमहागणपतिर्देवतानानाविधानिछंदांसि॥हमिति
वीजंतुंडमितिशक्तिः स्वाहाकीलकं सकलविघ्ननाशनद्वा
रामहागणपतिप्रीत्यर्थेजपेविनियोगः॥महागणपतिरु
वाच॥गणेश्वरोगणक्रीडोगणनाथोगणाधिपः॥एकद

ग०
पु०
२४३

तोवक्रतुंडोगजवक्त्रोमहोदरः॥१॥लंबोदरोधूम्रवर्णोविकि
टोविघ्ननायकः॥सुमुखोदुर्मुखोबुद्धोविघ्नराजोघनाशनः
२॥भीमप्रमोदआमोदःसुरानंदोमहोत्कटः॥हेरंबःशंब
रःशंभुर्लंबकर्णोमहाबलः॥३॥महागणपतिर्बुद्धिःसिद्धि
द्धिप्रियप्रसारनः॥रुद्रप्रियोगणाध्यक्षउमापुत्रोघनाशनः
४॥कुमारसुरसीशानपुत्रोमूषकवाहनः॥सिंहवाहनोमो
हिनीप्रियःकटंकषोराजपुत्रःशाकलःप्रमितोमितः॥५॥
कूष्मांडसामसंभूतिर्दुर्जयोधूर्जयोजयः॥भूपतिर्भुवनप
तिर्भूतानांपतिरव्ययः॥६॥ज्येष्ठराजोनिधिपतिर्निधिप्रि २४३

यःपतिःप्रियः॥हिरण्मयपुरांतस्थःसूर्यमंडलमध्यगः॥८॥
कराहतध्वस्तसिंधुःसलिलःपुष्पदंतभित्॥उमांगकेलिसंमु
तिर्मुक्तिदःकुलपालकः॥९॥किरीटीकुंडलीहारीवनमा
लीमनोमयः॥वैमुख्यहतदैत्यश्रीःपादाहत्याजितक्षिति
१०॥सद्योजातःस्वर्णमुंजमेखलीदुर्निमित्तहृत्॥दुःस्वप्नहृ
त्प्रशमनोगुणीनादप्रतिष्ठितः॥११॥सुरूपःसर्वनेत्राधिवा
सोविश्राजिन्पुरः॥पीतांबरःखंडरदःखंडवैशाखसंस्थितः
१२॥चित्रांगःश्यामदशनोभालचंद्रोहविर्भुजः॥योगाधिपस्ता
रकस्थःपुरुषोगजकर्णकः॥१३॥गणाधिराजोविजयःस्थि

गोराजपतिर्ध्वजी॥ देवदेवः स्मरः प्राणदीपको वायुकीलकः
२४॥ विपश्चिद्द्विरदो नादो नादभिन्नमहाम्बरः॥ वराहवदनो
ग॰ मृत्युंजयो व्याघ्राजिनाम्बरः॥२५॥ इच्छाशक्तिभवो देवस्त्रा
पु॰ तादैत्यविमर्दनः॥ शंभुवक्त्रोद्भवः शंभुकोपजः शंभुरास्य
१४४ भूः॥२६॥ शंभुतेजाः शिवाशोकहारी गौरीसुखावहः॥ उ
मांगमलजो गौरीतेजोभूः स्वर्धुनीभवः॥२७॥ मर्त्यकायो
महानादो गिरिवर्ष्मा शुभाननः॥ सर्वात्मा सर्वदेवात्मा ब्र
ह्ममूर्धा ककुप्पतिः॥२८॥ ब्रह्मांडकुंभजिद्व्योमभालः शक्ति
मरारुहः॥ जगज्जन्मलयोन्मेषनिमेषोऽग्न्यर्कसोमदृक्॥२९॥ १४४

गिरिंद्रैकरदोधर्मोधर्मिष्टः सामबृंहितः ॥ ग्रहर्क्षदशनोबा
णीजिह्वोवासवनासिकः ॥२०॥ भ्रूमध्यसंस्थितहरोग्रह
विद्यामदोदकः कुलाचलांशः सोमार्कघंटोरुद्रशिरो
धरः ॥२१॥ नदीनदभुजः सर्पांगुलिकस्तारकानखः पृथ्वी
कटिः सृष्टिलिंगशैलोरुर्दस्रजानुकः ॥२२॥ पातालजं
घोमुनिपोकालांगुष्टस्त्रयीतनुः ज्योतिर्मंडललांगूलो
हृदयानलनिश्चलः ॥२३॥ हृत्पद्मकर्णिकाशालीविय
त्केलिसरोवरः सद्भक्तध्याननिगडः पूजावारिनिवारितः
॥२४॥ प्रतापीकस्यपोयंतागणकोमंदरोबली ॥ यशस्वीधा

र्भिको जेता प्रमथः प्रमथेश्वरः ॥२५॥ चिंतामणिर्निधिपतिः
कल्पद्रुमवनालयः ॥ उन्नतः प्रमदो गूढः गुल्फसंवृतपा
ग० र्ष्णिकः ॥२६॥ पीनजंघः श्लिष्टजानुः स्थूलोरुः प्रोन्नम
पु० त्कटिः ॥ निम्ननाभिः स्थूलकुक्षी पीनवक्षा बृहद्भुजः
१४५ ॥२७॥ रत्नमंडलमध्यस्थो रत्नसिंहासनाश्रयः ॥ तिव्राशि
रोधृतपदो ज्वालिनीमौलिलालितः ॥२८॥ नंदीनंदित
पीठश्रीर्भोगिनीभूषितासनः ॥ सकामदायिनीपीठः स
र्वशक्त्यंबुजालयः ॥२९॥ लिपिपद्मासनाधारो वन्हिधा
मत्रयालयः ॥ पीनस्कंधो कंबुकंठो लंबोष्ठो लंबनाशि १४५

त्रिपुंड्रकः ॥३०॥ भग्नवामरदस्तुंगसव्यदंतो महाहनुः। ह्रस्वनेत्र
त्रयः शूर्पकर्णो निबिडमस्तकः ॥३१॥ स्तबकाकारकुंभा
ग्रो रत्नमौली निरंकुशः सर्पबद्धोदराबंधो रक्तताल्वोष्ठ
पल्लवः ॥३२॥ श्वेतांबरधरः श्वेतः श्वेतमाल्यविभूषणः श्वे
तातपत्ररुचिरः श्वेतचामरवीजितः ॥३३॥ सर्पावयवसंपू
र्णः सर्वलक्षणलक्षितः ॥ सर्वाभरणभूषाढ्यः सर्वशोभा
समन्वितः ॥३४॥ सर्वमंगलमंगल्यः सर्वकल्याणकारकः
सर्वदैककरः शार्ङ्गी बीजपूरी गदाधरः ॥३५॥ शुक्लोगोलो
कप्रभरः सुतंतुस्तंतुवर्धनः ॥ किरीटीकुंडलीहारीवन

मालीशुभांगदः ॥ ३६ ॥ इक्षुचापधरः शूली चक्रपाणिः सरो
जधृक् ॥ पाशी धृतोत्पलः शालीमंजरीभृत्स्वदंतभृत् ॥ ३७ ॥
ग० कल्पवल्लीधरो विश्वाभयदैककरो वशी ॥ अक्षमालाध
पु० रो ज्ञानमुद्रावान्मुद्गरायुधः ॥ ३८ ॥ पूर्णपात्री कंबुधरो वि
१४६ धृतालसमोदकः ॥ करस्थाम्रकरश्चूतकलिकाभृत्कु
ठारवाक् ॥ ३९ ॥ पुष्करस्थानवघटीपूर्णरत्नाभिकर्षकः
रमारमेशपूर्वांगो दक्षिणांगो महेश्वरः ॥ ४० ॥ महावराह
वामांगो रतिकंदर्पपश्चिमः ॥ आमोदमोदजननः सुप्रमो
दप्रमोदनः ॥ ४१ ॥ मदनावत्यर्थितांघ्रिरंतसोमसवदुर्मुखः ॥ १४६

विघ्नसंपत्त्ववोद्विघ्नः सरोन्निद्रमरोद्भवः ॥४२॥ विघ्नहृन्निम्न
चरणोद्भाविणीशक्तिसंयुतः ॥ तीव्राप्रसन्ननयनोज्वालि
नीपालनैकदृक् ॥४३॥ वसुधारामहोनादोमहाशंखनि
धिःप्रभुः ॥ नमद्वसुमतीमौलीपद्मः पद्मनिधिःप्रभुः ॥४४॥ स
र्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ॥ ईशानमूर्धारैत्ये
ङ्कःशिखापवननंदनः ॥४५॥ प्रत्युग्रपवनादिभ्योस्त्याख्य
शातपर्वधृक् ॥ ऐरावतादिसर्वाशावारणोवारणप्रियः ॥
४६॥ वज्राद्यस्त्रपरिकरोगणचंद्रसमाश्रयः ॥ जयोजयः
परिजयोविजयोविजयावहः ॥४७॥ अजातयार्चिपा

राज्ञोनित्यानित्यवतंसितः॥विलासिनीकृतोल्लासःशौं
डीसौंदर्यमंडितः॥४८॥अनंतानंतसुखदःसुमंगलसु
गा॰ मंगलः॥ज्ञानयज्ञक्रियाधारश्चापारनिषेवितः॥४९॥
पु॰ सुभगासंश्रितपदोललितोललिताश्रयः॥कामिनीपा
लनःकामःकामिनीकेलिलालितः॥५०॥सरस्वत्याश्र
२५१ योगौरीनंदनःश्रीनिकेतनः॥गुरुर्गुह्यमदोवासीबौ
ह्मोवागीश्वरीपतिः॥५१॥नलिनीकामुकोवामोवामा
ज्येष्ठामनोरमः॥हारमुद्रितपाशाब्जोॐबीजस्तुंगशक्ति
मान्॥५२॥विघ्नादिवीजजगतःस्वाहाशक्तिस्वकीलकः २५१

अमृताब्धिब्धिकृतावासोमदघूर्णितलोचनः ॥ ५३ ॥ उच्छिष्टोच्छि
ष्टगणकोगणेशोगणनायकः ॥ सर्वकालिकसंसिद्धिनित्य
सेव्योदिगंबरः ॥ ५४ ॥ अनपायोनंतदृष्टिरप्रमेयोजरामरः ॥ अ
नाविलोप्रतिहतअच्युतोमृतमक्षरं ॥ ५५ ॥ अप्रतर्क्योक्षयोजय्यो
नाराधोनामयोमयः ॥ अन्नप्रसिद्धिरद्वैतमघोरोमितमा
ननः ॥ ५६ ॥ अनाकारोविधूमाग्निर्वलघ्नोव्यक्तलक्षणः ॥ आधा
रपीठआधारआधाराधेयवर्जितः ॥ ५७ ॥ आखुकेतनआशा
पूरकआशामहारथः ॥ अमायसिद्धिरद्वैतममेयोह्यमिताननः ॥ ५८ ॥

इक्षुसागरमध्यस्थइक्षुपायसभक्षकः ॥ इक्षुचापातिरेकश्रीरिं
ग॰ क्षुचापनिभद्युतिः ॥५९॥ इंद्रगोपसमानश्रीरिंद्रनीलनिभ
पु॰ द्युतिः ॥ इंदीवरदलश्यामोइंदुमंडलमंडितः ॥६०॥ इध्मप्रि
१४८ यइध्मजिह्वइडानामेंदिराप्रियः ॥ इक्ष्वाकुविघ्नविध्वं
सीइतिकर्त्तव्यतोस्मितः ॥६१॥ ईशानमौलिरीशान ईशा
नप्रीतिरीतिहा ॥ ईषणाप्रियकल्पांतईहामात्रविव
र्जितः ॥ उपेंद्रउयउडुभृन्मौलिरिंडुकरप्रियः ॥६२॥ उन्न
ताननउत्तुंगउदारस्त्रिदशाग्रणीः ॥ ऊर्जस्वानुज्वलत
नुरुहापोहविवर्जितः ॥६३॥ ऋग्यजुःसामनयनऋद्धिसिद्धि १४८

समर्पकः ऋजिचित्तैकसुलभऋणत्रयविमोचकः ।६४। लु
प्तविघ्नस्वभक्तानां लूताविस्फोटनाशनः ॥ एकारपीठमध्य
स्थ एकपादकृतोदरः ॥६५॥ एजिताखिलदैत्यश्रीरेजिता
खिलसंस्थितिः ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिक
प्रदः ।६६॥ ऐरम्मदसमोन्मेषऐरावतनिभाननः ॥ ॐका
रवाच्य ॐकारओजस्वानोषधीपतिः ॥६७॥ औदार्य
निधिरौद्धत्यधैर्यऔन्नत्यनिःप्रतिः ॥ अंकुशोसुरनागा
नां अंकुशासुरसैनिकः ॥६८। अंतः समस्तसर्गांतपदेषुप

ग० पु० २५९ रनिष्ठित:॥कमंडलुधर:कल्प:कपर्दीकलभानन:॥६९॥
कर्मसाक्षीकर्मसिद्धि:कर्मोकर्मफलप्रद:॥कदंबगोल
काकार:कूष्मांडगणनायक:॥७०॥कारुण्यदेहकपि
ल:कथक:कटिसूत्रभृत्॥खर्व:खड्गप्रिय:खड्गीखर्वांत
स्थ:खनिर्मल:॥७१॥खल्वाट:शृंगनिलय:खट्वांग:खदु
राश्रय:॥गुणाढ्योगहनोनंदोगद्यपद्यसुधार्णव:॥७२॥
गद्यगानप्रियोगर्जोगीतंगीर्वाणपूर्वज:॥गुह्याचारर
तोगुह्योगुह्यागमनिरूपित:॥७३॥गुह्याशयोगुडाब्धि 

स्थोगुरुगुल्फोगुरोग्रेरुः॥घंटाघर्घरिकामोलीघटकुंभोघटोद
रः॥७४॥उकारवाचोऊंकारोउकाराकारशृंगभृत्॥चंडश्चंडेश्वरः
संहच्चुंडेशश्चंडविक्रमः॥७५॥चराचरपिताचिंतामणिश्चर्वण
लालसः॥छंदश्छंदोमपश्छंदद्दुर्लक्ष्यश्छंदविग्रहः॥७६॥जगद्यो
निर्जगत्साक्षीजगदीशोजगन्मयः॥जयोजयःपरिजयोजिह्वा
सिनप्रभुः॥७७॥ईल्पलोलसद्धामाईकारीभ्रमराकुलः॥
ऊंफारस्फारसंकारष्टंकारमणिनूपुरः॥७८॥ठद्वयःपल्लवा
न्तस्थसर्वमंत्रसुसिद्धिदः॥डिंडिमुंडोडाकिनीशोडामरोडिं
डिमप्रियः॥७९॥ढकानिनादमुदितोढंकोढौंढिविनायकः

णकारवाच्योवाणीशोविश्वात्माविश्वभावनः॥८०॥तत्त्वा
नांप्रकृतिस्तत्त्वंतत्त्वंपदनिरूपितः॥तारकांतरसंस्थानस्तार
ग॰ कस्तारकांतकः॥८१॥स्थाणुःस्थाणुप्रियस्थातास्थावरंजं
पु॰ गमंचयत्॥दक्षयज्ञप्रमथनोदातादानंदमोदयः॥८२॥दया
२५० वान्दिव्यविभवोदंडभृद्दंडनायकः॥दंतप्रभिन्नाभ्रमालो
दैत्यवारणवारणः॥८३॥दंष्ट्रालग्नद्विपघटोदेवारिदमनो
दमः॥धनंधनपतिर्बंधुर्धनदोधरणीधरः॥८४॥ध्यानैकप्रग
टोध्येयोध्येयंध्यानपरायणः॥ध्वनिप्रकृतिचित्कारोब्रह्मां
डावलिमेखलः॥८५॥नंद्योनादप्रियोनादोनादमध्येप्रतिष्ठि २५०

तः॥ निष्कलोनिर्मलोनित्योनित्योनित्यनिरामयः॥ ८६॥
परंव्योमपरंधामपरमात्मापरंपदं॥ परात्परः पशुपतिः
पशुपाशविमोचनः॥ ८७॥ पूर्णानंदः परानंदः पुराणः
पुरुषोत्तमः॥ पद्मप्रसन्नवदनः प्रणताज्ञाननाशनः
८८॥ प्रमाणप्रत्ययातीतः प्रणतार्त्तिनिवारणः॥ फ-
णिहस्तः फणिपतिः फूत्कारफणिताखिलः॥ ८९॥ बा
णार्चितांघ्रियुगलोबालकेलिः कुतूहली॥ ब्रह्मब्रह्मा
र्चितपदोब्रह्मचारीबृहस्पतिः॥ ९०॥ बृहत्तरोब्रह्मपदो
ब्रह्मण्योब्रह्मवित्प्रियः॥ भ्रूक्षेपदत्तलक्ष्मीकोभर्गोभ

ग० पु० ५५२

ज्ञोभयापहः ॥५१॥ भगवान्भक्तिसुलभोभूतिदोभूतिं
वर्धनः ॥ भव्योभूतालयोभाव्योदाताभ्रूमध्यगोचरः ॥
५२ ॥ मंत्रोमंत्रपतिर्मंत्रीमदमत्तोमदोन्नतः ॥ मेखलाधी
श्वरोदांतोमदमंदनिभेक्षणः ॥५३॥ महाबलोमहावी
र्योमहाप्राणोमहाननः ॥ यज्ञोयज्ञपतिर्यज्ञगोप्ताय
ज्ञफलप्रदः ॥५४॥ यज्ञेश्वरोयोगगम्योगोपतिर्याच
काप्रियः ॥ रस्योरसप्रियोरस्यः रंजकोवारणप्रियः
५५ ॥ राज्यरक्षाकरोरत्नगर्भोराज्यसुखप्रदः ॥ लक्ष्य
लक्षपतिर्लक्षलयस्थोलड्डुकप्रियः ॥५६॥ लाभप्रि ५५२

योल्लासपरोल्लासमत्तकृत्स्नात्मविश्रुतः॥ वरेण्योवह्निवरदो
वेद्यावेदांगगोचरः॥९७॥ विश्वतोविश्वतश्चक्षुर्विधाताविचक्षुर्वि
श्वतोमुखः॥ वामदेवोवह्निनेतावज्रीवज्रनिवारणः॥९८
शब्दब्रह्मशिवप्राप्यशंभुप्राप्तिर्गणेश्वरः॥ षट्क्रतुकु
सुमोत्सर्गीषडाधारःषडक्षरः॥९९॥ संसारवेद्यःसर्वज्ञःस
र्वभेषजभेषजं॥ सृष्टिस्थितिलयक्रीडःसुरपंजरभेदनः
१००॥ सिंदूरीतमहाकुंभःसदसद्भक्तिदायकः॥ साक्षीस
मुद्रमथनःस्वयंवेद्यःसदक्षिणः॥१॥ स्वतंत्रःसर्वसंकल्पः
सामगानरतःसुखी॥ हंसोहस्तीपिशाचीशोहवनंहव्य

कव्यभुक्॥२॥हव्यंकृतप्रियोहृष्टोहृत्क्षेत्रावामंत्रमध्यगः॥क्षेत्रा
धिपःक्षेत्रमतोक्षमापरपरायणः॥३॥क्षिप्रक्षेमःक्षेमकारी
गं० नेदक्षोणीसुरद्रुमः॥धर्मप्रदोर्थदःकर्मदातासौभाग्यवर्द्ध
पु० नः॥४॥विद्याप्रदोविभवदोभुक्तिमुक्तिफलप्रदः॥आभिरूप्य
१५२ करोवीरःश्रीप्रदोविजयप्रदः॥५॥सर्ववश्यकरोगर्भदोषहा
पुत्रपौत्रदः॥श्रीशोकहारीदौर्भाग्यनाशनःसर्वशक्तिमत्
द॥प्रविवादिमुखस्तंभोरुष्टचित्तप्रसादनः॥पराभिचारश
मनोदुःखहाबंधमोक्षदः॥७॥लवस्त्रुटिःकलाकाष्ठानि
मेषस्तत्वलक्षणः॥घटीमुहूर्तप्रहरोदिनानक्तमहर्निशं॥ १५२

८ ॥ पक्षो मासस्त्वयनाब्दयुगकल्पो महाशयः ॥ राशिस्तारा
तिथिर्योगवाराकरणमंशकं ~~राशिस्तारातिथिर्योगवारा~~
~~करणमंशकं~~ ॥ ९ ॥ लग्नं होराकालचक्रं मेरुः सप्तऋषयो
ध्रुवः ॥ राहुर्मेरुः कविर्जीवो बुधो भौमः शशी रविः ॥ १० ॥
कालः सृष्टिस्थितिर्विघ्नं स्थावरं जंगमं च यत् ॥ भूतापो
ग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान् ॥ ११ ॥ ब्रह्माविष्णु
शिवो रुद्रो इंद्रः शक्तिः सदाशिवः ॥ त्रिदशाः पितरः शि
ष्टापत्तरक्षांसि किंनराः ॥ १२ ॥ सिद्धाविद्याधराभूतामनुष्याः
पशवः खगाः ॥ समुद्राः सरितः शैलाभूतं भव्यं भवोद्भवं

१३॥सांख्यंपातंजलंयोगःपुराणानिश्रुतिस्मृतिः॥वेदां
गानिसदाचारोमीमांसान्यायविस्तरः॥१४॥आयुर्वेदो
ग० धनुर्वेदोगांधर्वकाव्यनाटकं॥वैखानसंभागवतंमानु
पु० षंपांचरात्रकं॥१५॥शैवंपाशुपतंकालमुखंभैरवशास
१५३ नं॥शाक्तवैनायकंसौरंजैनमार्हत्संहिता॥१६॥स
दसद्व्यक्तमव्यक्तंसचेतनमचेतनं॥बंधोमोक्षःसुखं
भोगःयोगःसत्यंप्रभुर्महान्॥१७॥स्वस्तिहुंफट्स्व
धास्वाहाश्रौषड्वषण्णमः॥ज्ञानंविज्ञानमानंदोबोधः
संवित्समःशमः॥१८॥एकंएकाक्षराधारएकाक्षरप १५३

रायणः॥एकाग्रधीरेकवीरएकानेकस्वरूपधृक्॥१९
विरूपोद्विभुजोद्यक्षोद्विरदोद्वीपरक्षकः॥द्विमातुरो
द्विवदनोद्वंद्वहीनोद्वयागते॥२०॥त्रिधामात्राकरोनेता
त्रिवर्गफलदायकः॥त्रिगुणात्मात्रिलोकादिःत्रिशक्तीं
शत्रिलोचनः॥२१॥चतुर्वाहुश्चतुर्दंतश्चतुरात्माचतुर्मु
खः॥चतुर्विधवचोवृत्तिःपरिवर्तप्रवर्त्तकः॥२२॥चतुर्व
र्णमयोपायश्चतुर्वर्णाश्रमाश्रयः॥चतुर्थीपूजनप्री
तश्चतुर्थीतिथिसंभवः॥२३॥पंचाक्षरस्त्वपंचात्मा

ग॰ प्रपंचास्यः पंचकृतमः ॥ पंचाधारः पंचवर्णः पंचाक्षरप
पु॰ रायणः ॥२४॥ पंचतालः पंचकारः पंचप्रणवमातृकः
१५४ पंचब्रह्ममयस्फूर्त्तिः पंचवारणवारितः ॥२५॥ पंचक्ष
प्रियः पंचबाणः पंचशिवात्मकः ॥ षट्कोणपीठः षट्च
क्रधामा षड्ग्रंथिभेदकः ॥२६॥ षडंगध्वांतविध्वंसी षडं
गुलमहाह्रदः ॥ षण्मुखो षण्मुखभ्राता षट्शक्तिपरिवा
रितः ॥२७॥ षड्वैरवर्गविध्वंसी षडूर्मिभयनाशनः ॥ षट्
तर्कदूरः षट्कर्मा षड्गुणः षड्रसाश्रयः ॥२८॥ सप्तपाताल १५४

चरणः सप्तद्वीपोरुमंडलः ॥ सप्तस्वर्लोकमुकुरः सप्तसप्ति
वरप्रदः ॥ २९ ॥ सप्तांगराज्यसुखदः सप्तर्षिगणवंदितः ॥ स
प्तछंदोनिधिः सप्तहोत्रः सप्तस्वराश्रयः ॥ ३० ॥ सप्तार्चिः कि
लितासारः सप्तमातृनिषेवितः ॥ सप्तछंदोमोदमदः स
प्तछंदोमोदमदः सप्तछंदोमखप्रभुः ॥ ३१ ॥ अष्टमूर्त्तिर्ध्ये
यमूर्त्तिरष्टप्रकृतिकारणं ॥ अष्टांगयोगफलभूरष्टमा
त्रांबुजासनः ॥ ३२ ॥ अष्टशक्तिसमानश्रीरष्टैश्वर्यविवर्ध
नः ॥ नवनाथसमाध्यायी नवनिध्यनुशासिता ॥ ३३ ॥ नवच
क्रावर्ती नवद्वारनिषेवितः नवनाथमहानाथो नव

नागनिषेवितः ॥२४॥ नवरत्नविचित्रांगो नवशक्तिशिरो
धृतिः ॥ दशात्मको दशभुजो दशदिक्पतिवंदितः ॥२५॥
ग० दशाध्यायो दशप्राणो दशेंद्रियनियामकः ॥ दशाक्षर-
पु० महामंत्रो दशाशाव्यापिविग्रहः ॥२६॥ एकादशमहारु-
२५५ द्रैस्तुतश्चैकादशाक्षरः ॥ द्वादशोद्दंडदोर्दंडो द्वादशांतनि-
केतनः ॥२७॥ त्रयोदशाभिदाभिन्नो विश्वेदेवाधिदैव-
तं ॥ चतुर्दशेंद्रवरदश्चतुर्दशमनुप्रभुः ॥२८॥ चतुर्दशा-
दिविद्यश्च चतुर्दशजगत्पतिः ॥ सामपंचदशः पंचद-
शीशीतांशुमंडलः ॥२९॥ षोडशाधाननिलयः षोडशा- २५५

स्वरमातृकः ॥ षोडशेंडकल्पवासः षोडशोस्वरमातृकः ॥४०॥
कलासप्तदशीसप्तदशासप्तदशान्तरः ॥ अष्टादशद्वीपपति
रष्टादशविधिस्मृतः ॥ अष्टादशलिपिकृतिरष्टादशविजाति
कृत् ॥४२॥ एकविंशात्सुमानेकविंशत्यंगुलिपल्लवः ॥ चतुर्विंश
तितत्वात्मा पंचविंशाख्यपूरुषः ॥४३॥ सप्तविंशतितारेशः स
प्तविंशतियोगकृत् । द्वात्रिंशद्भैरवाधीशः चतुस्त्रिंशन्महाह्र
दः ॥४४॥ षट्त्रिंशत्तत्वसंभूतिरष्टत्रिंशत्कलातनुः ॥ नमदेको
नपंचाशन्मरुद्वर्गनिरर्गलः ॥४५॥ पंचाशदक्षरश्रेणिपंचाशद्रु
द्रवेष्टितः ॥ पंचाशद्विष्णुशक्तीशः पंचाशन्मातृकाकलः ॥४६

द्विपंचाशद्विपश्रेणिपंचाशद्रुद्रवंदितः ॥ चतुःषष्ट्यर्थनिर्णेता
चतुःषष्टिकलानिधिः ॥ ४७ ॥ षष्टिषष्टिमहातीर्थक्षेत्रभैरव
ग० भावनः ॥ चतुर्नवतिमंत्राणांषण्णवत्यधिकप्रदः ॥ ४८ ॥ शता
पु० नंदः शतधृतिः शतधारवरायुधः ॥ सहस्रपत्रनिलयः सहस्र
१५६ फणिभूषितः ॥ ४९ ॥ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपा
त् सहस्रनामसंस्तुत्यः सहस्राक्षबलापहा ॥ ५० ॥ दशसाह
स्रफणिभृत्फणिराजकृतासनः अष्टाशीतिसहस्राणिमह
र्षीस्तोत्रपालितः ॥ ५१ ॥ लक्षाधारप्रियापारो लक्षधारमनोम
यः ॥ चतुर्लक्षजगत्प्रीतिः चतुर्लक्षप्रकाशकः ॥ ५२ ॥ चतुराशीतिल १५६

ह्माण्डंजीवोदेहव्यवस्थितः॥कोटिसूर्यप्रतीकाशःकोटिचं
द्रांशुनिर्मलः॥५३॥शिवोभवाद्यष्टकोटिवैनायकधुरंधरः॥
सप्तकोटिमहामंत्रमंत्रितावयवद्युतिः॥५४॥त्रयस्त्रिंशत्कोटि
सुरश्रेणीप्रणतपादुकः॥अनंतशक्तिसचिवोऽनंतमुनिसं
स्थितः॥५५॥अनंतनामानंतश्रीरनंतोनंतसौख्यदः॥अनं
तदेवतासेव्योह्यनंतमुनिसंस्तुतः॥५६॥इतिवैनायकंना
म्नांसहस्रमिदमीरितं॥एतद्ब्राह्मेमुहूर्त्तेवैप्रत्यहंयःपठेन्न
रः॥५७ करस्थंतस्यसकलमैहिकामुष्मिकंफलं॥आयुरा
रोग्यमैश्वर्यंधैर्यंशौर्यंबलंयशः॥५८॥मेधाप्रज्ञाधृतिःकां

तिःसौभाग्यमविरूपताः॥सत्यंदयाक्षमाशौतिर्दाक्षिण्यंध
र्मशीलता॥५९॥जगत्संवननंविश्वसंवादोवेदपाठनं॥सभा
ग० पांडित्यमौदार्यंगांभीर्यंब्रह्मवर्चसं॥६०॥ओजस्तेजःकु
पु० लंशीलंप्रतापोवीर्यमानिता॥ज्ञानंविज्ञानमास्तिक्यंस्थै
२५७ र्यंविश्वासतातथा॥६१॥धनधान्यादिवृद्धिश्चसकृदस्यजपा
द्भवेत्॥वश्यंचतुर्विधंविश्वंजपादस्यप्रजायते॥६२॥राज्ञो
राजकुलस्यापिराजपुत्रस्यमंत्रिणः॥धर्मार्थकाममोक्षाणा
मनायासेनसाधनं॥६३॥शाकिनीडाकिनीरक्षोयक्षग्रह
भयापहं॥साम्राज्यसुखदंसर्वसपत्नमदमर्दनं॥६४॥स २५७

मस्तकलहध्वंसीदग्धबीजप्ररोहणं ॥ दुःस्वप्नशमनंक्रुद्धस्वा
मिचित्तप्रसादनं ॥ ६५ ॥ षट्कर्माष्टमहासिद्धित्रिकालज्ञान
कारणं ॥ परकृत्याप्रशमनंपरचक्रविमर्दनं ॥ ६६ ॥ संग्राममार
गेसर्वेषामिदमेकंजपावहं ॥ सर्ववंध्यात्वदोषघ्नंगर्भरक्षै
ककारणं ॥ ६७ ॥ पठ्यतेप्रत्यहंयत्रस्तोत्रंगणपतेरिदं ॥ देशे
तत्रनदुर्भिक्षमीतयोदुरितानिच ॥ ६८ ॥ नतद्गेहंजहातिश्री
र्यत्रायंजप्यतेस्तवः ॥ कासंश्वासंसमुदावर्तंशूलंशोफमयो
दरं ॥ ६९ ॥ शिरोरोगंवमीहिक्कांगंडमालामरोचकंवात
पित्तकफद्वंद्वत्रिदोषजनितज्वरं ॥ ७० ॥ आगंतुविषमंशीत

गा०
पु०
१५८

सुह्मांचैकाहिकादिकं ॥ इत्याद्युक्तमनुक्तं वा रोगदोषादि
संभवं ॥ ७१ ॥ सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपात् ॥
सहस्रनाममंत्रोयं जपितव्यं शुभमाप्तये ॥ ७२ ॥ महागणप
तेस्तोत्रं सर्वकामः प्रजपयेदिदं ॥ इक्षुयासकलान्भोगानुप
भुंजेह पार्थिवान् ॥ ७३ ॥ मनोरथफलैर्दिव्यैर्व्योमयानैर्मनो
रमैः ॥ चंद्रेंद्रभास्करोपेंद्रब्रह्मसर्वादिसद्मसु ॥ ७४ ॥ काम
रूपः कामगतिः कामदः कामदेश्वरः ॥ भुक्त्वा यथेप्सितान्का
मानभिष्टैः सहबंधुभिः ॥ ७५ ॥ गणेशानुचरो भूत्वा गणो ग
णपतिप्रियः ॥ शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः १५८

७६॥शिवभक्तः शरण्यकामो गणेश्वरवरात्सुरः॥जातिस्मरोध
र्मपरः सार्वभौमोभिजायते॥७७॥निःकामस्तु जपन्नित्यंभ
क्त्याविश्वेशतत्परः॥योगसिद्धिपरांप्राप्यज्ञानवैराग्यसंयु
तं॥७८॥निरंतरेनिरावाधेपरमानंदसंज्ञिते॥विश्वातीर्णप
देशर्णोपुनरावर्तिवर्जिते॥७९॥लीनोवैनायके धाम्निरम
तेनित्यनिःकृतिः इदंप्रजापतिस्तोत्रंपवित्रंश्रावितंश्रुतं
॥८०॥व्याहृतंचर्चितंध्यातंविमृष्टमथवंदितं॥इहामुत्रचवि
श्लेषविश्वैश्वर्यप्रदायकं॥८१॥स्वच्छंदचारिणाप्येषयेनसं
धार्यतेस्तवः॥सरक्षतोशिवोद्भूतेर्गणैरप्यष्टकादिभिः॥८२

लिखितं पुस्तके स्तोत्रं मंत्रभूतं प्रपूजयेत् ॥ तत्र सर्वोत्तमा ल
क्ष्मीः सन्निपतते निरंतरं ॥ ८३ ॥ दानैरसेषैरखिलैर्व्रतैश्च ती
र्थैरशेषैरखिलैर्मखैश्च ॥ न तत्फलं विंदति यद्गणेशसह
ग० स्रनामस्मरणेन सद्यः ॥ ८४ ॥ एतन्नाम्नां चै सहस्रं पठति
पु० दिनमणौ प्रत्यहं प्रोज्जिहाने सायं मध्यंदिने वा त्रिषवण
२५६ मथवा संततं वा जपेद्यः ॥ स स्यादैश्वर्यधुर्यः प्रभवयसां की
र्तिमुच्चैस्तनोति दारिद्र्यं हंति विश्वं वशयति सुचिरं वर्धते
पुत्रपौत्रैः ॥ ८५ ॥ अकिंचनोप्येकचित्तो नियतो नियतासनः
प्रजपंश्चतुरो मासान् गणेशार्चनतत्परः ॥ ८६ ॥ दारिद्रतां स २५६

मृन्मृत्युसप्तजन्मानुगामपि॥ लभतेसमतिंलक्ष्मीमित्या
ज्ञापारमेश्वरी॥ ८१॥ आयुष्यंवीतरोगंकुलमतिविमलं
संपदःश्रेणिदानांकीर्तिःपुण्यावदाताभणतिरभिनवा
कांतिरव्याजभव्या॥ पुत्राःसंतःकलत्रंगुणवदभिमतंयद्यद
न्यच्चतत्तंनित्यंयःस्तोत्रमेतत्पठतिगणपतेस्तस्यहस्तेसमस्तं
स्यात्॥ गणंजयोगणपतिर्हेरंबोधरणीधरः महागणपतिर्यज्ञो
वरःक्षिप्रप्रसादनः॥ ८२॥ कस्यपोवंदनंवाचांसिद्धोढौढिविना
यकः॥ अमोघसिद्धिरमितोमंत्रश्चिंतामणिर्निधिः॥ ८३॥ सुमं
गलोबीजमाशापूरकोवरदःकलः॥ मोदकेरत्नरेभिःकविश

ष्यानामभिः पुमान् ॥९१॥ यः स्तौति मद्गतमना मदाराधनतत्
त्परः स्तुतो नाम्नां सहस्रेण तेनाहं नात्र संशयः ॥९२॥ नमो
ग० नमः सुरवरपूजितांघ्रये नमो नमो निरुपममंगलात्मने ॥ न
पु० मो नमो विपुलकरैकसिद्धये नमो नमः ॥ करिकलभाननाय
१६० पते ॥९३॥ किंकणीभरणाणितचरणः प्रकटितगुरुमतिचारि
करणः ॥ मदजललहरिकलितकपोलः शमयतु दुरितं गणग
पतिनृपनामा ॥२९४॥ इति श्रीगणे० उपा० ईश्वरगणेश
सहस्रनामस्तोत्रं अध्यायः ॥४६॥ व्यास उवाच नाम्नां सह
स्रं संप्राप्ते प्रसन्ने च गजानने ॥ ततः किमकरोद्ब्रह्मन् हरस्त १६०

त्कथयस्वमे॥१॥ब्रह्मोवाच॥गणेशवरदानेननाम्नांचैवोपदेश
तः॥प्रहृष्टःशंकरोनृत्यज्जगर्जेचमहास्वनः॥२॥आहूयस्वगणा
न्देवान्मुह्वायचसमादिशत् तेचहर्षेणमहत्तापययुर्देवाशिवांत
कं॥३॥ब्रह्माकुवेरोथपुरंदरोग्निर्वायुश्चसोमोवरुणोयमश्च॥गं
धर्वयक्षाग्रहकिंनराश्चसर्वेनमस्कृत्यशिवंस्तवंतः॥४॥देवाऊ
चुः॥महादेवजगन्नाथजगदानंददायक॥त्वयाहतंमहादैत्यं
कराप्रसन्नामहेवयं॥५॥स्थानभ्रष्टावयंतेनकृताविघ्नविघाति
ना॥एवंदेववचःश्रुत्वापिनाकीनिर्ययौमुदा॥६॥गणेशमत
माध्यायनुमुह्वायकृतनिश्चयः॥वेगेनभवनंप्रापदेवगंध

ग०
पु०
१६२

वसंयुतः॥७॥तावच्चदैत्यंचारैस्तुवृत्तांतःसन्निरूपितः॥आग
तःसुरसैन्येनयुद्धायगिरिजापतिः॥८॥तत्सुसैन्यान्यनेहृंतघ्रा
स्त्रैःस्त्रैश्चकेतुकैः॥सचदैत्योमहानादोयुद्धभूषणभूषितः
॥९॥वीराननानंदयामाससवासःस्वर्णभूषणोर्धनैः॥अनेकयान
संस्थेयोयाद्गुषुत्रिपुरेस्वयं॥१०॥आरुरोहमहादैत्योनादय
न्दिविदिशोदश॥ततोयुद्धंसमभवत्तेनयोरुभयोर्महत्॥
११॥शास्त्रैर्नानाविधैर्बाणैर्मर्मभेदिभिरायसैः॥असृक्नदी
प्रवाहोभूत्मार्गरोधनकारकः॥१२॥शस्त्राहताबहूर्योधाःपु
ष्पिताःकिंशुकाइव॥केचित्केशेषुधृत्वैवशिरांसिचिच्छिदुर्बला १६२

त्॥२३॥धावतांरथिवीराणमत्तानांकरिणामपि॥ऽअंघ्रिपात
मवोरेणुर्व्योमसेरोदसीत्तणात्॥२४॥ऽअंधकारेघोरतरेनप्रा
ज्ञायतकिंचन॥चक्रुरेवततदायुद्धंवीरानानाविधाभृशं॥२५॥जी
विताशांपरित्यज्यमर्तव्यंकृतनिश्चयाः॥ऽअदृश्यतमृत्तारेवा
गतरेजसिवायुना॥२६॥विकुतेसुरसैन्येचदैत्यसैन्येचहर्षि
ते॥आययौसमरश्लाघीवज्रहस्तःपुरंदरः॥२७॥प्रातकोटि
किरीस्यैवड्ढुवुर्दैत्यदानवाः॥सवज्रपातैरसुरांश्चूर्णयाऽ
मासवज्रभृत्॥ऽत्यजुर्जीवितंतेतुचंडवज्रप्रहारतःकेचि
च्चभग्नचरणाःकेचिद्भग्नशिरोधराः॥२८॥केचिद्विदीर्णज

रथाःछिन्नस्कंधभुजाःपरे॥छिन्नाश्वानांचवीराणांवाजि
नांरथिनांतथा॥२०॥निहतानामसंख्यातैर्जज्ञिरेनिम्नगा
बहूः॥उत्साहवर्धनास्तेषांवीराणांजयकांक्षिणां॥२१॥ततः
ग० शनैर्गर्जमानोददर्शत्रिपुरासुरः॥निहतंबहुधासैन्यंशक्रंयो
पु० द्धुमथाययौ॥२२॥बभाणशक्रंदृष्ट्वैवकिमर्थंमतुमिच्छसि
१६२ आयाहियुद्धाज्जीवस्त्वंनदृष्टोहंहनिवासव॥२३॥कातेशक्ति
र्मयायुद्धंकर्तुंतवशचीपते॥अजःसिंहेनकिंयुद्धंकरिष्य
तिवदस्वमे॥२४॥एहियुध्यस्वशक्रेतिश्रुत्वानोवाचेन्द्रःछपयासु
खं॥एवमुक्तेस्थितेशक्रेववर्षसायकान्बहून्॥२५॥साज्यं १६२

कृत्वाधनुर्दैत्योदेवसेनामताडयत्॥एकस्मान्मंत्रिताद्बाणान
संख्यानायायुःशराः॥२४॥ततोदेवगंधर्वारोदसीसमपूरय
न्॥अंधकारंपुनरभूद्बाणजालैर्निरंतरं॥२५॥तद्बाणैरपि
तेदेवाव्यंगाःपेतुर्धरातले॥बलहान्यपतद्भूमौप्रहारखरपी
डितः॥२६॥सर्वेषुदेवकार्येषुमूर्छितेषुमहेश्वरः॥श्लाघंतं
वकृगर्जंतंयुध्यंतंनाभ्यहनत्स्वयं॥२७॥मनसापूजयच्छंभुःत
स्यैदैत्यपौरुषं॥एतस्मिन्नंतरेतत्रनारदोऽद्भुतमाययौ॥२८
पूजितःप्रांवरस्थंशंभुंप्राणेषुनीललोहितं॥नारदउवाच॥त्व
याचिंतानकर्तव्यात्रिपुरस्यवधंप्रति॥२९॥वध्येततस्यचधोपा

यंतंकुरुष्वमहेश्वर।वरत्रयंकाममगममेकबाणणिष्ठि
तंमहत्॥२२॥मरुज्जतिविहीनंतरमेघ्रंसर्वनिर्जरैः॥स
ग॰ एवमुक्तवान्गृह्यंशारेणैकेनयस्तव॥२३॥वरत्रयंभे
पु॰ त्स्यतेतस्मान्मृत्युमवाप्स्यसि॥कउ॥एवमुक्त्वागते
१६२ तस्मिन्नारदेमुनिसत्तमे॥२४॥मूर्च्छितान्विबुधान्शर्वः
सावधानमथाकरोत्॥मस्मारैभगुस्वाहाकंचस्मारितो
नारदेनतु॥२५॥महाप्रयत्नमकरोद्दैत्यराजवधायसः
चेतसासर्वनाशायशक्रोदेवोनिजेच्छया॥२६॥रथंकु
रूपंशशिसूर्यचक्रंयंतारमिंद्रीवरजंचकार॥धनुर्गि १६२

रौद्रं शरमच्युमयं पर्वाग्निनेपाववयुजज्झिरीश्वरं ॥३७॥ आचा
र्य्यदेवं मनसा विचिंत्य तेनोपदिष्टं च जजाप नाम्नां ॥ सह
स्रमेकाक्षरमंत्रयुक्तममंत्रयत्तेन पिनाकमुग्रं ॥३८॥ अमं
त्रयन्महाबाणं विष्णुरूपं सदाशिवः ॥ चकंपे धरणी शेषो
चचाल गिरयोपि च ॥३९॥ बभ्रमुः खगणाः सर्वे चुक्रुशुश्च
महारवान् ॥ प्राद्रवे नाजगवस्यापि विभ्रांताः सुरमानुषाः ॥
४०॥ अमुंचत यदा बाणं तदा दग्धं नभस्तलं ॥ भूमंडलं सपा
तालं ज्वालामालाभिरंजसा ॥४१॥ दृष्ट्वा पपात दैत्येंद्रो स
सैन्यः सुरसंभ्रयः ॥ जवेनागात्सुरः सोप्यादह दैत्यपुरत्रयं

४२॥दैत्यदेहगतंतेजोभर्गदेहेलयंययौ॥पश्यंतांसर्वसैन्या
नांदैत्यदानवराक्षसां॥४३॥ततोंतरिक्षेवागासीन्मुक्तोदै
ग० त्यःशिवाहंततः॥ततस्तेतुष्टुवुर्देवामुनयोपित्रिलोचनं॥
पु० ४४॥जगुर्गंधर्वनिचयाचारणाःश्रुतितत्पराः॥ननृतु
१६४ श्चाप्सरःसंघाकिंन्नरावाद्यवादकाः॥४५॥मुमुचुःपुष्प
वर्णाणिनारदाद्याःसुरर्षयः॥ययुःशिवाज्ञयादेवाःस्वे
स्वेस्थानेनिराययुः॥४६॥नमस्कृत्यमहेशानंत्रिपुरासुर
घातिनं॥मुनयोपिनिरुद्वेगाःस्वस्वानुष्ठानतत्पराः॥४७
आसंस्तस्मिन्हतेदैत्येवेदवेदांगपाठिनः॥अग्निहोत्रा १६४

णिवेदांश्च दानानि च व्रतानि च ॥ ४८ ॥ चक्रुः सर्वजना भू
मौ पुनरुत्साहसंयुताः ॥ षोत्सादिगण — स्कंदैः सर्वैः पारि
षदैरपि ॥ ४९ ॥ कृतावनास्त्र प्रस्तोपि विभज्यतं महारथं ज
यशब्दैस्तूर्यशब्दैर्देवदुंदुभिनां स्वनैः ॥ ५० ॥ अलंकृतं शैल
राजं कैलासं मुदितो ययौ ॥ त्रिपुरारिरिति स्पष्टं ततो नामा
स्य प्रथे ॥ ५१ ॥ एवं महागणपतेर्मंत्रसामर्थ्यमीरितं ॥ स
हस्रनाम्नामपि च प्रभावो यं निरूपितः ॥ ५२ ॥ न वित्ताते
मरन्येन कस्यापि न निवेदितः ॥ पठनात् श्रवणादस्य सर्व
कामफलं लभेत् ॥ ५३ ॥ इति श्री गणेशपु० ॥ उपा० ॥ शिव वि

जयोनामसप्तचत्वारिंशोत्तमोध्यायः॥४०॥व्यासउवाच॥श्रु
तंमयामहाख्यानंत्रिपुरस्यवधाश्रयं॥तथापिश्रोतुमिच्छामित्रिपु
ग० पु० स्थिताजगदंबिका॥१॥कथमाविर्बभूवैषातिथौरम्यामहासु
१६५ रः॥दिवायुद्धंमहाघोरंप्रागेववर्णितंचयत्॥२॥यतोर्चितःसु
रैःप्राप्तोजयशालीसुरारिहा॥अतस्तस्यांदीपदानंकुर्वंतिमु
विमानवाः॥३॥तस्यांस्नानंचदानंचजपहोमादिकंचयत्
बहुखंजायतेयस्मात्तस्मात्साबाहुलीस्मृता॥४॥तस्यांयेतु
नकुर्वंतित्रिपुरारिमहोत्सवं॥नलभंतेजयंक्वापिदग्धपु
ण्याभवंतिते॥५॥अतोतस्यांपौर्णमास्यांवाप्रातरर्चेतियेशि १६५

वं॥ निशियत्नैःकृतंपापंविलयंप्रतिपद्यते॥६॥ आजन्मतःकृतं
पापंमध्याह्नार्चनेनतत्तथा॥ सप्तजन्मार्जितंपापंप्रदोषार्चने
तोमुने॥७॥ आविर्भावंशिवायास्त्वंकथ्यमानंमयाशृणु॥ तस्य
मंत्रंशिशिवातज्ज्ञात्वामयारंतर्हिताशिवा॥८॥ आविरासी
ज्जगन्माताहिमाचलगुहामुखात्॥ ददर्शपर्वतंघोरंसिंहव्याघ्र
मृगाकुलं॥९॥ अपश्यंतीसिवंसातुविरहाकुलमानसा॥ विल
लापभ्रष्टमीताहाहतास्मिसिवेतिच॥१०॥ कथंमांनविजानीषे
सर्वज्ञःसन्सदाशिवः॥ वनएकाकिनीघोरंक्रंदतीकुररीमि
व॥११॥ करामेस्पर्शनंतेस्याकिंमांविस्मृतवानसि॥ प्राणानजीवि

ग॰ पु॰ २६६

तुं धत्ते सोऽहं दुर्वा विरहं हर ॥ २२ ॥ नातत्वमपि कुत्रापि सिन मे शोकं शृणो-
षि किं ॥ त्वां विना शरणं किं वा यामि किं वा करोम्यहं ॥ २३ ॥ यो जेय
स्त्वद्गुनमोत्वं शिवेन च शिवेन च ॥ इदानीं पुनरुत्पन्नां जानीहि
जवरां तव ॥ २४ ॥ वरं तमेव शीघ्रं मे गवेषयस्व राशिवं नो चेद्देहपरि
त्यागं भर्गो रस्मात्करोम्यहं ॥ २५ ॥ कउवाच ॥ एवं रुदंत्यास्तस्या-
स्तु श्रुत्वा तां गिरमुत्तमां ॥ न्यवेदयद्धिमवते स्वामी नापमहर्षि-
भिः ॥ २६ ॥ वीरउवाच ॥ काचिन्नितंबिनी मद्द्वा सर्वाभरणभूषिता ॥ ता
टंके विभ्रती श्रुत्योर्मंडले इव भास्वतः ॥ २७ ॥ नानारत्नलसद्दी-
प्ति मुकुटं मस्तके शुभं ॥ ललाटे तु चतुःकोणं मुक्ताषोडश- २६६

शोभितं ॥१८॥ युग्मं कांचनरत्नाढ्यं मुक्तादाममविलंबितं ॥ सीमं
तांतर्गतं चारुनासाहारकमौक्तिकं ॥१९॥ अंगरे चारुणी न्ना
क्षौ हस्तयोर्वलयानिच ॥ रत्नसत्कांचनरत्नानि प्रत्येकमंगुली
यकं ॥२०॥ दृष्ट्वा दृष्टा नमो वक्ति गणनातीवतवाभिधं ॥२३॥ का०
इत्थं निशम्य हिमवान्स्वरितस्तां सुतां ययौ ॥ सा त्वयन्हे तु ग
मोभिर्वाग्भिस्तामवदत्सुधीः ॥२४॥ हिमवानु० ॥ किमर्थं शो
चसे सुभ्रु सृष्टिस्थित्यंतकेतुके ॥ सर्वलक्षणसंपूर्णे सर्वश
क्तियुते नघे ॥२५॥ अकर्तुमन्यथाकर्तुं कर्तुमीशे महेश्वरी
अवाससर्वकामे च सर्वप्राण्यंतरे गते ॥२६॥ नवियुक्ता भिसि चे

नत्वं सर्वीतयामिनाशिवे ॥ अथापियोजयिष्येत्वां शिवेन शिवका
ग० रिणा ॥ २७ ॥ उत्तिष्ठेति गृहीत्वा तां मायया निजमंदिरे ॥ ननंद पार्व
पु० तीतन्न हृष्टमे नां सुतान्विता ॥ २८ ॥ निःश्वासपरमा प्यासीच्छिवेद
१६७ ष्टुं समुत्सुका ॥ उवाच पितरं नत्वा साधूपायं वद स्वमे ॥ २९ ॥ त्वंतंरा
नेतपोवापि दुष्करं शिवलब्धये ॥ करिष्ये तमहं तात श्रुत्वैतन्नपउ
त्तमे ३० ॥ कउ० ॥ अववद जनकस्तां तु विचार्य मनसा सहात् ॥
कार्यसिद्धिकरं शीघ्रमुपायं शृणु तं मुने ॥ ३१ ॥ हिमवानुवाच
शृणु पार्वति वक्ष्यामि साधूपायं शिवाप्तये ॥ उपास्ति विध्न
राजस्य धर्मार्थकाममोक्षदा ॥ ३२ ॥ अनुतिष्ठ तां महेन्द्राद्यैर् १६७

वैश्वनारदादिभिः ॥ प्रामाण्यसिद्धयस्तास्ताः शकादिपरलक्षणः
२३ ॥ ब्रह्मणासृष्टिसामर्थ्यंप्राप्तंतस्यप्रसादतः ॥ विष्णोश्चावन
सामर्थ्यरक्षंसर्वेश्वरेणह ॥ २४ यस्यस्वरूपंनविदुर्ब्रह्माद्यामुन
योपिच ॥ वाचामगोचरोयासौमनसोप्यगोचरः ॥ २५ गजा
ननस्वरूपेणपरिदृश्योयमीश्वरः ॥ अतस्तेनैवरूपेणसर्वारंभे
षुपूज्यते ॥ २६ ॥ तमुपास्स्वसर्वेशंमयाप्रोक्तेनवर्त्मना ॥ २७ इति
श्रीगणेशपु० उपा० ॥ अंबाविर्भावोनामाष्टचत्वारिंशः ४८ पा
र्वत्युवाच ॥ दयानिधेगिरीशत्वंपितर्मेवरसत्वरं ॥ उपासनंगणे
शस्यसर्वेशस्यजगद्गुरोः ॥ १ ॥ ययाशिवंसमभ्येत्यशिवंप्राप्स्या

ग० पु० १९८

भिप्राप्यतं ॥ मत्तुल्लोकेपिलोकानामुपकारोभविष्यति ॥ २ ॥ हि
मवानु० ॥ तवस्नेहवशाद्देविरहस्यंपरमंमम ॥ लोकानांचोप
कारायवक्ष्येहमेकचेतसा ॥ ३ ॥ प्रत्यूषकालउत्थायनैर्ऋतीं
दिशमाव्रजेत् ॥ आच्छाद्यधरणींपूर्वंतृणकाष्टैस्तैरपि ॥ ४ ॥ उ
र्वरांवर्जयेत्तिष्टन्नुत्सर्गंनचबुद्धिमान् ॥ त्यक्त्वामूत्रपुरीषंतु
यथोक्तंशौचमाचरेत् ॥ ५ ॥ दंतजिह्वाविशुद्धंचकृत्वास्नानं
ततोव्रजेत् ॥ नदींतटाकंवापींवासरःकूपंयथापिवा ॥ ६ ॥ कृत्वा
पूर्वमलस्नानंमंत्रस्नानंततश्चरेत् ॥ मरावाचंदनेनापितिल
कंकुंकुमेनवा ॥ ७ ॥ कुर्याद्धौतेनवाससीतुपरिधायममास १९८

ने॥ उपविश्यैकचित्तस्तु सर्वं नित्यं समाप्य च ८॥ मृत्तिकां सुंदरां
स्निग्धां केशपाषाणवर्जितां॥ सुविशुद्धामवल्मीकां जलसिक्तां
विमर्द्य च॥ ९॥ कृत्वा चारुतरां मूर्तिं गणेशस्य शुभां स्वयं॥ सर्वाव
यवसंपूर्णां चतुर्भुजविराजितां॥ १०॥ परश्वादिस्वायुधानि दधानां
सुंदरां घनां स्थाप्य पीठे ततः पाणीप्रस्तात्पमेलयेत्सुधीः॥ ११॥
पूजाद्रव्याणि सर्वाणि जलादीनि प्रयत्नतः॥ श्रेष्ठगंधानक्षतां
श्च रक्तपुष्पाणि तण्डुलं॥ १२॥ त्रिपंचसप्तभिः पत्रैर्युक्तां दूर्वांकुरा
न् शुचीन्॥ श्रेष्ठांतरशतान्नीलान्श्वेतान्नानोपसुंदरान्॥ १३॥
घृतदीपं तैलदीपं नैवेद्यं विविधं शुभं॥ मोदकान्पूपलड्डुकानन्या

पसंभाक्करायुतं ॥ २४ ॥ सुसूक्ष्मं तंडुलान्नं च व्यंजनानि बहूनि प
गं० च ॥ सचेंद्रदुग्धेर्गोधूमचूर्णं खंडखाद्यघृतादिरसंयुतं ॥ २५ ॥ एलालवं
पु० गसंमिश्रतांबूलं केशरान्वितं ॥ जंबाम्रपनसादींश्च द्राक्षारं
६६९ भाफलानि च ॥ २६ ॥ ततः कुसुमवानीशे नारिकेलानि चानयेत् ॥
बहुप्रकारमार्तिकं कांचनीरक्षिणं तथा ॥ २७ ॥ एवं संभृतसं
भार एकांतस्थलमास्थितः ॥ चैलाजिनकुशमये आसने च
कृतासनः ॥ २८ ॥ भूतशुद्धिं प्रवीतप्राणानां स्थापनं तथा ॥ शिवं
धपूर्वदेवांश्च गणेशादीन्नमेत्पुरा ॥ २९ ॥ अंतर्बहिर्मातृका
श्च न्यसेदागममार्गतः ॥ सन्निधानादिकामुद्रा दर्शयेत्कु ६६९

मार्गतः ॥२०॥ मंत्रन्यासं ततः कृत्वा षडंगन्यासमेव च ॥ पूजाद्रव्या
णि संशोध्य ततो ध्यायेद्गजाननं ॥२१॥ एकदंतं शूर्पकर्णं गजवक्त्रं
चतुर्भुजं ॥ पाशांकुशधरं देवं मोदकान्बिभ्रतं करैः ॥२२॥ रक्त
पुष्पमयीमालां कंठे हस्ते परां शुभां ॥ भक्तानां वरदं सिद्धिबुद्धि
भ्यां सेवितं सदा ॥२३॥ सिद्धिबुद्धिप्रदं नृणां धर्मार्थकाममोक्षदं
ब्रह्मरुद्रहरींद्राद्यैः संस्तुतं परमर्षिभिः ॥२४॥ ध्यानं ॥ आगच्छ
जगदाधार सुरासुरवरार्चित ॥ अनाथनाथ सर्वज्ञ गिर्वाणैः परि
पूजित ॥२५॥ आवा० ॥ स्वर्णसिंहासनं दिव्यं नानारत्नसमन्वि
तं ॥ समर्पितं मयान्देव तत्र त्वं समुपाविश ॥२६॥ देवदेवेशं स

वेशसर्वतीर्थाहृतंजलं॥पाद्यंगृहाणगणपगंधपुष्पाक्षतैर्युतं॥
२७॥प्रवालमुक्ताफलहूगरत्नतांबूलजांबुनदमष्टगंधं॥पुष्पा
ग॰ क्षतायुक्तममोघशक्तेदत्तंमक्ताफलहूगरत्नतांबूलजांबुन
पु॰ दमष्टगंधं॥पुष्पाक्षतायुक्तममोघशक्तेदत्तंमयार्घ्यंसफली
१० कुरुष्व॥२८॥गंगादिसर्वतीर्थेभ्यःप्रार्थितंतोयमुत्तमं॥कर्पूरै
लालवंगादिवारिमाचम्यतांविभो॥२९॥आचमनं॥चंपका
शोकबकुलामालतीमोगरादिभिः॥वासितंस्निग्धताहेतुस्ते
लंचारुप्रगृह्यतां॥३०॥कामधेनुसमुद्भूतंसर्वेषांजीवनंपरं॥
पावनंयज्ञहेतुश्चपयस्नानार्थमर्पितं॥३१॥नवनीतसमुत्पन्नं १०

न्नं सर्वसंतोषकारणं ॥ यज्ञांगं देवताहारो घृतं स्नानसमर्पितं ॥ ३२ ॥
रक्तसारसमुद्भूतं सर्वतेजोविवर्धनं ॥ सर्वपुष्टिकरं देवमधुस्नानार्थं
मार्पितं ॥ ३३ ॥ इक्षुसारसमुद्भूतो शर्करा सुमनोहरा ॥ मलापहारि
णी स्नानं तु गृहाण त्वं मयार्पितं ॥ ३४ ॥ सर्वमाधुर्यता हेतुः साधुस
र्वप्रियंकरः ॥ पुष्टिकृत्स्नानं तु मानीतो इक्षुसारभवो गुडः ॥ ३५ ॥ कांस्य
कांस्येन पिहितं दधिमधुघृतं यथा ॥ मधुपर्को मयानीतः स्नानार्थं प्र
तिगृह्यतां ॥ ३६ ॥ सर्वतीर्थाहृतं तोयं मया प्रार्थनया विभो ॥ सुवासितं
गृहाणेदं सम्यक्स्नानं तु सुरेश्वर ॥ ३७ ॥ रक्तवस्त्रयुगं देव लोकल
ज्जानिवारणं ॥ अनर्घ्यमिति सूक्ष्मं च गृहाणेदं मयार्पितं ॥ ३८ ॥

ग०
पु०
१९१

राजतेब्रह्मसूत्रंचकांचनेरत्नसंयुतं ॥ भक्तयापपादितंदेवगृहाणप
रमेश्वर ॥ ३९ ॥ अनेकरत्नयुक्तानिभूषणानिबहूनिच ॥ तत्तदंगे
कांचनानीयोजयामितवाज्ञया ॥ ४० ॥ अष्टगंधसमायुक्तंरक्तचंद
नमुत्तमं ॥ द्वादशांगेषुतेदेवलेपयामिकृपांकुरु ॥ ४१ ॥ रक्तचंदन
संमिश्रांस्तंडुलान्तिलकोपरि ॥ शोभायैसंप्रदास्यामिगृहाणज
गदीश्वर ॥ ४२ ॥ पारलंकर्णिकाकीरंचबंधूकंरक्तपंकजं ॥ भोग
रेमालतीपुष्पंगृहाणत्वंभुवनेश्वर ॥ ४३ ॥ नानापंकजपुष्पैश्चग्र
थितांपल्लवैरपि ॥ विल्वपत्रयुतांमालांगृहाणसुमनोहरां ॥ ४४
दशांगगुग्गलंधूपंसर्वसौगंधकारकं ॥ सर्वपापक्षयकरंत्वंगृहा १९१

णमयार्पितं ॥४५॥ सर्वज्ञसर्वलोकेशतमोनाशनमुत्तमं ॥ गृहा
णमंगलं दीपं देवदेव नमोस्तुते ॥४६॥ नानापक्वान्नसंयुक्तं
पायसं शर्करान्वितं ॥ नानाव्यंजनशोभाढ्यं शाल्योदनमनु
त्तमं ॥४७॥ दधिदुग्धघृतैर्युक्तं लवंगैलासमन्वितं ॥ मरीचीचू
र्णसहितं क्वथिकावटकान्वितं ॥४८॥ राजिकाध्यानसंयुक्तं
मेथिपिष्टं सतक्रकं ॥ हिंगुजीरककूष्मांडमरीचीमाषपिष्टकैः
॥४९॥ संपादितैः सुपक्वैश्च भर्जितैर्वटकैर्युतं ॥ मोदकापूपलड्डू
कशष्कुलीवटकादिभिः ॥५०॥ उपर्युपरिसंयुक्तं नैवेद्यममृता
न्वितं ॥ हरिद्राहिंगुलवणसहितं सूपमुत्तमं ॥५१॥ समामुद्गं गृहा

ष्प्येमंभोजनंकुरुसादरं॥सुरीपद्मीपितंतोयंसुगंधंचपिबे
ग० च्छया॥५२॥त्वयित्तृप्तेजगत्सर्वंनित्यतृप्तेमहात्मनि॥उत्तरा
पु० पोशनार्थंतेमितोयंसुवासितं॥५३॥मुखपाणिविशुध्यर्थं
१७२ पुनस्तोयंददामिते॥दाडिमंमधुरंनिंबुजंबाम्रफलसा
न्वितं॥५४॥द्राक्षारंभाफलंपक्कंकर्कंधूखाजुरंफलं॥नारि
केलंचनारिंगंकलिंगंजांबिरंतथा॥५५॥उर्वारुकंचदेवेश
फलान्येतानिगृह्यतां॥मुखपाणिविशुध्यर्थंपुनस्तोयंद
दामिते॥५६॥गृहाणचंदनंचारुकरांगोद्वर्तनंशुभं॥नाना
परिमलद्रव्यैर्निमितंचूर्णमुत्तमं॥५७॥प्रबीरनामकंपुष्पं १७२

गंधिचारुप्रगस्यतां ।चारूत्नमाल्करसंछर्णवंशसारसमुद्भवं ।५८
सीमंतभूषणं चूर्णं लाक्षारंजितमस्तु ते ॥सचंद्रश्रृगरत्नाढ्यखा
यखादिरसंयुतं ॥५९॥एलालवंगसंमिश्रं तांबूलं केशरान्वितं ॥
स्नातिरिक्तकृजायाः संपूर्णफलहेतवे ॥६०॥दक्षिणां कांचनीं ।
देवस्थापयामि त्वाग्रतः सीतपीतैस्तथा रक्तैर्जलजैः कुसुमैः
शुभैः ॥६१॥ग्रंथितां सुंदरां मालां गृहाण परमेश्वर ॥हरिताः श्वे
तवर्णा वा पंचत्रिपत्रसंयुताः ॥६२॥दूर्वांकुरा मयास्त्ता एकविंश
तिसम्मिताः ॥एकविंशतिसंख्याकाः कुर्यादेव प्रदक्षिणा ।६३॥प

दपदेतेदेवेशनश्यंतुपातकानिमे ॥ औरंवरेराजतेवाकांसे
ग० कांचनसंभवे ॥ ६४ ॥ पात्रेप्रकल्पितान्दीपान्गृहाणचतुर
पु० र्पकान् ॥ पंचारर्त्तिंपंचदीपैर्दीपितांपरमेश्वर ॥ ६५ ॥ चारुचंद्र
१७२ प्रभंदीपंगृहाणवीचिवारणं ॥ यथास्पनेस्ततेभस्मतथापापं
विनश्यति ॥ ६६ ॥ स्तोत्रैर्नानाविधैःसूक्तैःसहस्रनामभिस्तुतः
उपविश्यस्तुवीतेनंकृत्वास्थिरतरंमनः ॥ ६७ ॥ दीनानाथद
यानिधेसुरगणैःसंसेव्यमानद्विजब्रह्मेशानमहेंद्रशेषगि
रिजागंधर्वसिद्धैःस्तुतः ॥ सर्वारिष्टनिवारणैकनिपुणत्रैलो १७२

कथनाथप्रभोभक्तिंमेसकलांकुरुषंसमफलंतांतांत्वापराधान्मम
६८॥इतिमूर्तिंसमभ्यर्च्यदंडवत्प्रणिपत्यच॥जपेन्मंत्रेणततोदेवि
सर्वसिद्धिप्रदायकं॥६९॥इतिश्रीगणे॰॥उपास॰॥गणेशपा
र्थिवपूजानिरूपणंनामैकोनपंचाशत्तमोध्यायः॥४९॥हिमवा
नुवाच॥मंत्रानानाविधादेविनानासिद्धिप्रदायकाः॥प्रसं
ख्यातागणेशस्यकांश्चित्तेप्रवदामिते॥१॥कृत्वापद्मासनेसम्य
क्नियम्यस्वामिस्वानिसर्वशः॥कृतन्यासविधिःपश्चाज्जपंका
र्येन्निजेच्छया॥२॥एकाक्षरेस्यमंत्रस्यलक्षंलक्षार्धमेवच॥षडक्ष
रस्यमंत्रस्यनियुतंवायुतंतथा॥४॥तथापंचाक्षरस्यापिदशाष्ट
पार्वत्युवाच॥अहंमंत्रंनजानामिगिरींद्रमेवदस्वतं॥अनुमहंगणेशस्ययामि

क्षरयोरपि। अष्टाविंशाद्वर्णोमंत्रोजप्तव्योयुतसंख्यया ॥५॥ एवंना
नाविधान्मंत्रान्जपंतिस्वेष्टसिद्धये ॥ त्वंतुपार्वतीमेवाक्यंशृण
ग० ष्वैकाग्रमानसा ॥६॥ एकाक्षरंषडर्णंचगृहाणमंत्रमुत्तमं ॥ नभशु
पु० क्लचतुर्थ्यांतुआरंभंकुरुसुव्रते ॥७॥ अनुष्ठानंमासमात्रंकुरुष्वका
२७५ र्यंभविष्यति ॥ शिवंप्राप्स्यसिसुशिव मन्यच्चयद्यामिवांछिते ॥८॥
पार्थिवाश्तनामूर्त्तिस्त्रियोवापुरुषोपिवा ॥ एकादशातिसा
काम्यंधनपुत्रपशूनपि ॥९॥ असाध्यंसाधयेन्मर्त्योमूर्त्तिद्वयप्र
पूजनात् ॥ त्रिमूर्त्तिपूजनाद्राज्यंरत्नानिसर्वसंपदः ॥१०॥ चतुर्मू
र्त्तिः पूजयेद्योधर्मार्थकाममोक्षभाक् ॥ सार्वभौमोभवेद्राजापं २१४

चमूर्त्तिप्रसृजनात् ॥ ११ ॥ षण्मूर्त्तिसृजयासृष्टिस्थितिप्रलयकृद्भ-
वेत् ॥ सप्ताष्टनवमूर्त्तीनां सृजनात्सर्वविद्भवेत् ॥ १२ ॥ भूतंभव्यंभवि-
ष्यंचवेत्तिदेवप्रसादतः ॥ त्रयस्त्रिंशत्कोटिदेवाश्च ब्रह्माशिवविष्ण-
वः ॥ १३ ॥ सनकाद्यामुनिगणाः सेवंते दशसृजनात् ॥ एकादशा-
र्चनादेकादशरुद्राधिपो भवेत् ॥ १४ ॥ द्वादशादित्यराज्यं च लभे-
द्द्वादशार्चनात् ॥ अतिसंकटवेलासु कुर्याद्दृष्ट्वा प्रसृजनं ॥ १५
अष्टोत्तरशतं यावत्तावत्तत्तद्वाप्नुयात् ॥ महायुक्तिमवाप्नोति स-
हस्रसृजनतोन्वहं ॥ १६ ॥ कारागृहान्मुक्तिकामो कारयेन्मूर्त्तिपंच-
कं ॥ त्रिः सप्तरात्रान्मुच्येत गणेशानुग्रहात्स्तुते ॥ १७ ॥ सप्तमूर्त्तिः प्र-

कुर्वीतप्रत्यहंपंचवत्सरं ॥ महापापात्प्रमुच्येत गणेशभक्तिमा
न्नरः ॥ १८ ॥ आजन्ममरणं देवं पूजयेत्पार्थिवी नरः ॥ गणेशः
ग० पु० सतुविज्ञेयो दर्शनाद्विघ्ननाशनः ॥ १९ ॥ तमेव सर्वकार्येषु पूज
येन्नगणाधिपं ॥ तस्यैव पूजनात्प्रीतो देवस्यान्नतथा स्वयं ॥
१०५ २० ॥ सर्वरोगप्रपीडासु मूर्त्तीनां त्रयमुत्तमं ॥ नवाहं पूजयेद्यस्तु
सर्वपीडां व्यपोहति ॥ २१ ॥ सौवर्णी राजती ताम्री पीतलीकांस्यस
मुद्भवा ॥ मौक्तिकी च प्रवाली च सर्वमेतत्प्रयच्छति ॥ २२ ॥ एवं कृ
ते व्रते देवि सर्वान्कामानवाप्स्यति ॥ यावद्भाद्रपदे मासि चतुर्थी
परिलभ्यते ॥ २३ ॥ तस्यां महोत्सवः कार्यो यथाविभवमादरात् ॥ १०५

रात्रौ जागरणं कार्यं तत्कथावाद्यगायनैः ॥२४॥ प्रभाते विमले
स्नात्वा पूर्ववत्पूजयेद्विभुं ॥ गणेशं वरदं देवं ततो होमं समार
भेत् ॥२५॥ कुंडे सांगे स्थंडिले वा कृते ज्जप दशांशतः ॥ पूर्णाहु
तिं ततः कुर्याद्विलिदानपुरःसरं ॥२६॥ आचार्यं पूजयेत्पश्चा
न्मंत्रवासोधनादिभिः ॥ ब्राह्मणं तोषयेत्पश्चाद्धोमशेषं
समापयेत् ॥२७॥ तर्पयेत दशांशेन तद्दशांशेन भोजयेत् ॥
ब्राह्मणान्वेदविदुषः सपत्नीकांश्च कांश्चन ॥२८॥ तेभ्यो भू
षणवासांसि दद्याच्छक्त्या च दक्षिणां ॥ दद्यात्स्त्रीणामलंका
रान्योषिद्भ्यश्च सकंचुकान् ॥२९॥ तुष्टये गणनाथस्य सिद्धि

बुद्धियुतस्यह॥ वित्तशाठ्यं नकुर्वीतयथाविभवमाचरेत्॥ २०
ततःसुहृज्जनयुतःस्वयंभूंजीतसादरं॥ अपरस्मिन्दिनेमू
र्तिंनृपानेस्थापयेन्मुदा॥ २१॥ छत्रध्वजपताकाभिःचाम
रैरुपशोभितां॥ किशोरैर्दंडयुद्धेनयुध्यद्भिश्चपुरोभुवां
२२॥ महाजलाशयंगत्वाविसृज्यनिनयेज्जले॥ वाद्यगीत
श्चनयुतः निजमंदिरमाव्रजेत्॥ २३॥ इतिश्रीगणेशपु० उपा
हिमवद्गिरिजासंवादेचतुर्थीव्रतकथनंनामपंचाशत्तमोऽ
ध्यायः॥ ५०॥ पार्वत्युवाच॥ तववाक्यामृतेनाहंपीतःपीता
स्मिसांप्रतं॥ परंतुसंशयोमेस्तितंतुदस्वहिमालय॥ १॥ केन

केनकृतंपूर्वंव्रतमेतन्महीधरः ॥ आख्यातंकेनवाकस्मैकः कां
सिद्धिमितोगमत ॥१॥ एतत्सर्वंविस्तरेणब्रूहीसंशयछेदनायमे
यश्चपृच्छतियोवक्ष्यतिगजाननकथाःशुभाः ॥२॥ श्रृणोत्यन्यो
पियोमर्त्योव्रतस्तेपुण्यभागिनः ॥ जीवितंसफलंतेषांजन्म
ज्ञानंचकर्मच ॥४॥ ब्रह्मोवाच ॥ एवंतयाकृतःप्रश्नोहिमवानभ्य
भाषत ॥ वरदस्यगणेशस्यमाहात्म्यंकृतव्रतं ॥५॥ गिरिरुवाच ॥
श्रृणुपार्वतिवक्ष्यामिसंवादंतेपुरातनं ॥ सेतिहासंव्रतस्यास्यस
र्वसिद्धिकरस्यहा ॥६॥ कैलासेगिरिवर्येतुसुखासीनंजगद्गुरुं

क्रीडमानंमुदादेवैर्गंधर्वैःपरमर्षिभिः॥७॥नत्वास्तुत्वामहातेजाः
ग० पर्यपृच्छषण्मुखः॥स्कंदउवाच॥देवदेवजगन्नाथभक्तानाम
पु० भयंकरः॥८॥नानाख्यानानिदिव्यानिप्रसादात्तेश्रुतानिमे॥त्व
६१ सितांतुनगच्छामिपायंपायंसुधामिव॥९॥अधुनाब्रूहिमेदेवव्र
तंसर्वार्थदंशुभं॥अनुष्ठानेनयस्याद्यकरस्थाःसिद्धयोनृणां॥
१०॥जायंतेसाधकानांतुवरदस्यप्रसादतः॥शिवउवाच॥साधु
पृष्टंत्वयास्कंदसर्वेषांहितकारकं॥११॥कथयामितवप्रीत्या
महासिद्धिप्रदंभुवि॥विनायकप्रियंतातव्रतानामुत्तमंव्रतं॥ ६११

२२॥सर्वेषांपुरुषार्थानांसाधकंकृत्तिकात्मज विनायश्चैलथास
नैर्जपहोमादिभिर्विना॥२३॥सर्वसिद्धिकरंस्तोत्रंपुत्रपौत्रप्रवर्धनं॥रा
जानेराजपुत्रेवातन्मंत्रिणमथापिवा॥२४॥वक्ष्यमाणयतित्तिंप्रव्र
तमेतन्महत्तरं॥महापापोपपापेभ्यश्चबहुजन्मसुसंचितैः॥२५॥त्र
तस्यास्यप्रभावेनयःपुमान्मुच्यतेक्षणात्॥भाजनंसर्वसिद्धीनां
जायतेमानवोभुवि॥२६॥प्रीतिदंतुगणेशस्यनानेनसदृशंक्षितौ
स्कंद उ०॥नातकस्मिन्भवेमासिव्रतमेतन्महोत्तमं॥२७॥विधानंकी
दृशंचास्यकेनवाचरितंपुरा॥सर्वमेतन्ममाचक्ष्वयद्यस्तिकृपया
मपि॥२८॥शिव उवाच॥नभःशुक्लचतुर्थ्यांतुस्नात्वागुरुगृहंव्रजेत्

प्रणम्य तं गुरुं पश्चात्पूजयित्वा यथाविधि॥१९॥पाद्यार्घ्याचमनव
स्त्राद्यैर्भूषणैश्च महत्तरैः॥ तोषयित्वानु तं सम्यग्गाज्ञाया प्रारभे
ग० द्व्रतं॥२०॥सर्वसिद्धिकरं तात व्रतं गणेश्वरं गुरो॥ त्वमेव श्रीगणेशो
पु० सि दिशाकामप्रदं प्रभो॥२१॥उपदिष्टं व्रतं तेन सार्द्धं गांगतरं व्रजेत्
१७८ तटागं वाद्द्वेवाखातं तत्र स्नायाद्यथाविधि॥२२॥श्वेतसर्षपयुक्तेन
तिलकल्केन षण्मुख॥ स्नात्वा धात्रीयुतेनेह कृत्वा नित्यं गृहं
व्रजेत्॥२३॥उपविश्यासने शुद्धे पूजयित्वा गणाधिपं॥ गुरूपदिष्ट
मार्गेण व्रतं पश्चात्समारभेत्॥२४॥भद्रामार्से तु गणेशस्य चतुर्थ्यां
श्रावणस्य तु॥ प्रत्यहं पूजयेत्कृत्वा यावद्भाद्र चतुर्थिका॥२५॥ १७८

ब्रह्मचर्यव्रतेस्थित्वाकर्तव्यंव्रतमुत्तमं॥उपवासेकभुक्ताभ्यो
नक्तेनायाचितेनवा॥२६॥चतुर्थकालेभुंजीतहविष्यान्नंस
माहितः।प्रस्तारंमधुरंभुंजन्भक्तिमानाचरेद्व्रतं॥२७॥जे
पन्गणेश्वरीविद्यांषडर्णान्नवषट्स्वरां॥द्विचतुरस्वरांवा
पितथैवैकादशाक्षरामपि॥२८॥दशाक्षरामथस्कंदषोडशा
र्णमथापिवा॥नियुतंवायुतंवापिप्रत्यहंजपमिष्यते२९
तदर्धंवातदर्धार्धंदशांशंहोममाचरेत्॥ध्यायन्गजाननं
देवमहोरात्रमतंद्रितः॥३०॥प्राप्तेभाद्रपदेमासिचतुर्थ्यां
तुगजाननं॥सुवर्णपलमानेनतदर्धार्धेनवापुनः॥३१॥

ग० पु० ११९

मयुरवाहनंकुर्यादथवाखुगतंशुभं कृत्वामंडपिकां
तत्रधान्यराशिंप्रकल्पयेत् ॥२२॥ सौवर्णंराजतंताम्रं
कलशंस्थापयेत्ततः ॥ तस्यपरिन्यसेत्पात्रंरुक्मराज
तताम्रजं ॥२३॥ वस्त्रयुग्मेनसंवेष्ट्यसपात्रंकलशंततः
पंचपल्लवसंयुक्तंपंचरत्नसमन्वितं ॥२४॥ पीठपू
जांपुराकृत्वास्थापयेत्तत्रतंविभुं ॥ मूलमंत्रैश्चवे
रोकैः श्वेतैरपिषण्मुख ॥२५॥ ध्यात्वागजाननंदे
वंआवाह्यपरयामुदा ॥ आसनंचतथापाद्यंदद्यादा
चमनीयकं ॥२६॥ अर्घ्यंरत्नयुतंस्कंदस्नानंपंचाम् ११९

तैः शुभैः ॥ रक्तवस्त्रयुगं दद्यादुपवीतं तथोत्तमं ॥ ३७ ॥ नाना-
विधैराभरणैर्भूषयेत्परमेश्वरं ॥ गंधपात्रैस्तैर्धूपदीपैर्नैवे-
द्यैर्विविधैरपि ॥ ३८ ॥ वटकापूपलड्डूकशाल्यन्नपायसा-
दिभिः ॥ पंचामृतैर्व्यंजनैश्च भोजयेत्परमेश्वरं ॥ ३९ ॥ उ-
द्वर्तनं करे दद्यात्फलं तांबूलमेव च ॥ कांचनीं दक्षिणां द-
द्याच्छत्रं व्यंजनचामरे ॥ ४० ॥ नीराजनमथ पुष्पं दत्वा स्तोत्रा-
ण्युदीरयेत् ॥ सहस्रनामभिः स्तुत्वा ब्राह्मणान्पूजयेत्ततः
॥ ४१ ॥ रात्रौ जागरणं कृत्वा गीतनृत्यादिमंगलैः ॥ प्रभाते वि-
मले स्नात्वा नित्यं कृत्वा यथाविधि ॥ ४२ ॥ पूर्ववत्पूज-

येद्देवंततोहोमंसमाचरेत् ॥ द्रव्यैर्नानाविधैर्भक्त्याकुर्याद्दाचा
र्यपूजनं ॥ ४३ ॥ गोभूतिलहिरण्याद्यंछत्रश्वेतान्निवेदयेत् अन्ये
ग० भ्योब्राह्मणेभ्यश्चप्रदद्यात्कुरिदक्षिणां ॥ ४४ ॥ ब्राह्मणान्भोज
पु० येत्पश्चाच्छतमष्टोत्तरंयथा ॥ अपिकान्यदिशक्तिश्चेदथवा
१८० प्येकविंशति ॥ ४५ ॥ दीनांधकृपणेभ्यश्चदद्याद्दन्नंसपायसं
पुनश्चदक्षिणांदद्यात्गृहाशिषमनुत्तमं ॥ ४६ ॥ सुहृद्बंधुयु
तोमौनीस्वयंभुंजीतसादरं ॥ शिवउवाच ॥ एवंतेकथितंस्कंद
वरदस्यव्रतंशुभं ॥ ४७ ॥ भुक्तिमुक्तिप्रदंन्नृणांसर्वकामफल १८०
प्रदं ॥ इतिश्रीगणेशपुराणेउपासनाखंडेस्कंदोपदेशोनामै

कपंचाशत्तमोध्यायः ॥५१॥ शिवउवाच ॥ अन्यदपिचतेपुत्रइति
हासंपुरातनं ॥ पुराकृतयुगेराजाकश्चिदासीन्महत्तरः ॥१॥
पालयामासवसुधांसागरांतांस्वतेजसा ॥ गुणैर्यस्यहृतादे
वानित्यंतत्सदसिस्थिताः ॥२॥ कदाचिद्दैवयोगेनभृगुस्तस्य
गृहंपययौ ॥ ततउत्थायराज्ञासबहुमानपुरःसरं ॥३॥ उपवि
श्यमुनिवरंराजावचनमब्रवीत् राजोवाच भगवन्सर्वंत
त्वज्ञकिंचित्पृच्छामितद्वद ॥४॥ पूर्वजन्मनिकश्चाहंकिंमया
सुकृतंकृतं ॥ येनेदृशंमयाराज्यंप्राप्तंनिहतकंटकं ॥५॥ आ
तंनैवपूर्वमन्यैर्नचप्राप्स्यंतिचापरे ॥ देवानामपिदुर्ज्योहं

गंधर्वोरगराक्षसाः ॥६॥ कुबेरसंपदातुल्यांसंपद्दंपश्यमेमुने
त्रैलोक्यारत्नभूतंयत्तदानीतंस्वतेजसा ॥७॥ यंयंपदार्थमि
ग० च्छामितंतंपश्यामिवेश्मनि ॥ केनेत्थंकर्मणाप्राप्तंतद्व
पु० दस्वममप्रभो ॥८॥ कामयेतत्तुमान्कर्तुंपुण्यंपुण्यवतांवर
१८१ [illegible]वाच ॥ कथयामिनृपश्रेष्ठप्रणिधानबलादहं ॥९॥
त्वमासीत्पूर्वजनुषिवित्तत्रियोदुर्बलःशुचिः ॥ कुटुंबभरणा
त्पर्थंनानाकर्माण्यथाकरोत् ॥१०॥ क्रियमाणंचतत्कर्म
नचासीत्फलदंतव ॥ अत्यंतनिष्ठुरैर्वाक्यैर्दारापत्यैश्चपी
डितः ॥११॥ अदृष्ट्वापुत्रदारांस्त्वंगतवान्गहनंवनं ॥ बभ्र १८१

मनस्विंस्तुसर्वासुदृष्टवानसिसौभरि ॥१२॥ सिद्धासनसमासीनं
सेवितंमुनिपुंगवैः ॥ कथयंतंमहाविद्यांशिष्येभ्योदुःखनाशिनीं
॥१३॥ दृष्ट्वात्वंसौभरीदिव्यमन्यांश्चर्षिगणान्नृप ॥ दंडवत्पतितो
सित्वंमुनिवितैश्चापिनंदितः ॥१४॥ उपविष्टः स्वासनेचमुनिना
तेनदर्शिते ॥ दृष्टवानसितंदिव्यंमलब्ध्वावसरमाहतः ॥१५॥ त्वत्रि
पद्वाच ॥ स्वामिन्संसारदुःखेनबहुधाक्लेशितोमुने ॥ दा
रापत्यसुहृद्भिश्चवाग्बाणैर्भृशंताडितः ॥१६॥ नवैराग्यंमनो
यातिनिष्ठुरेषुसुहृत्सुच प्रीतोह्यात्तुत्पिपासाभिः पी
डितोपिभृशंमुने ॥१७॥ उपायंचरमेकिंचदुःखसागरतारकं

ग० पु० शिव उवाच ॥ इति श्रुत्वा वचस्तस्य सौभरिः कृपयायुतः १८
उपायं चिंतयामास नृपदुःखविनाशनं ॥ ततस्तं क्षत्रियं
प्राह सर्वपापविमोचनं ॥ १९ ॥ ऋषिरु० ॥ व्रतं यत्कथयि
१८२ ष्यामि कुरु निश्चितमानसः ॥ यस्यानुष्ठानमात्रेण सर्व
दुःखलयो भवेत् ॥ २० ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैस्तथा ब्रह्म
ऋषिभिः कृतं ॥ भुक्तास्ते सर्वदुःखेभ्यो प्रापुः सिद्धिमनुत्तमां
२१ ॥ वरदस्य गणेशस्य धर्मार्थकाममोक्षकृत् ॥ क्षत्रिय उ०
कोसौ गणेशः किं शीलः किं रूपः किं स्वभाववान् ॥ २२ ॥ किं
कर्मकः कथमुत्पन्नं तत्सर्वं कथय प्रसभे ॥ ऋषिरुवाच ॥ यद्ब्रह्म १८२

नित्यंविरजंविशोकंज्ञानंस्वरूपंपरमार्थभूतं॥२३॥अनादिम
ध्यांतमनंतपारंगणाधिपंतंप्रवदंतिसंतः॥यस्मादोंकारसं
भूतःपतोवेस्यतोजगत्॥२४॥येनसर्वमिदंव्याप्तंतंविद्धि
गणनायकं॥जगत्सर्जनतानेनब्रह्मणापस्यतुष्टये॥२५
अष्टानांतुशतंवर्षंतपस्तप्तंसुदुष्करं॥ततोहृष्टमनावेधाः
प्रसन्नस्तमथूजयत्॥२६॥नानाविधोपचारैःसद्भिरत्नैफ
लैस्तथा॥सिद्धिबुद्धिउभेकन्येमनसाकल्पितेदृढे॥२७॥तु
ष्टोदेवोददौतस्मैविद्यामेकाक्षरींविभुः॥ततोलब्धवरोब्र
ह्माचकारसकलंजगत्॥२८॥षडक्षरेणविष्णुनातोषितः

पुरा॥कृत्वामूर्तिंगणेशस्यपूर्वोक्तविधिनाव्रतं॥२९॥प्रव्यं
गंवर्षमेकंतुनियमान्कृतवान्हरिः॥वरंलब्ध्वागणेशा ग॰
त्पालयामासवैजगत्॥३०॥एवंविधंत्वंजानीहिगणेशंशं पु॰
भुसंस्तुतं॥विश्वरूपमनादिंचसर्वकारणकारणं॥३१॥त १८३
माधारययत्नेनसर्वदुःखादिमोक्षसे॥नारदउवाच॥कस्मि
न्मासेप्रकर्तव्यमेतद्व्रतमनुत्तमं॥३२॥विधिनाकेनमेब्रूहि
सांप्रतंमुनिसत्तम॥मुनिरुवाच॥श्रावणेवकुलेपक्षेचतु
र्थ्यामारभेद्व्रतं॥३३॥कुर्वीतपरयाभक्त्यायावद्भाद्रचतुर्थि १८३
का॥त्वंतत्कुरुषभूपालसर्वान्कामानवाप्स्यसि॥३४॥इतिश्रु

त्वाव्रतंतस्मात्कृतवानसिसुव्रत ॥ समासेत्तुव्रत्तेतत्रस्वभार्याभ्र
ममंडले ॥ ३५ ॥ इतिश्रुत्वाव्रतंतस्मात्कृतवानसिसुव्रत समासे
तुव्रतेतत्रस्वभार्याभ्रममंडले आ तावत्तस्यगृहंदिव्यंगणेशस्य
प्रसादतः ॥ दिव्यनारीनरयुतंदासीदाससमन्वितं ॥ ३६ ॥ वेदघो
षसमायुक्तंजातंगोधनसंकुलं ॥ दिव्यवस्त्रसमायुक्तानाना
लंकारशोभिता ॥ ३७ ॥ अपत्यैस्ताहृशैर्युक्ताविस्मितासीत्स
तिस्तती ॥ आयास्यतिकदाभर्त्तेत्येवंचिंतापराभवत् ॥ ३८ ॥ ता
वत्त्वंमुनिमामंत्र्यगतोसिनिजमालयं ॥ दिव्यंतद्भवनंहित्वा
स्वगृहंपरिमार्गयन् ॥ ३९ ॥ तावद्भार्याप्रेषितास्त्वांनिन्युस्त भ्र

म० पु० १८४

वनंनराः ॥ तेनत्वयातिविख्यातः प्रभावोवरदस्यच ॥ ४० ॥ तद्व्रत
स्यप्रभावेनराज्यभागीहजन्मनि ॥ शिवउवाच ॥ इतिश्रुत्वाभृ
गोर्वाक्यंकर्दमोहर्षनिर्भरः ॥ ४१ ॥ चकारसकलंराजाभृगूणा
पत्समीरितं ॥ व्रतस्यास्यप्रभावेनज्ञानवैराग्यवान्नृपः ॥ ४२
भुक्त्वाभोगान्यथाकामंसुखाप्यउत्तान्निजंपदं ॥ ततोगणैश्व
र्यंधामयतोनावर्ततेपुनः ॥ ४३ ॥ सर्वार्थसाधकंस्कंदव्रतना
नामुत्तमंव्रतं ॥ नैतादृशंव्रतंदानंव्रतमन्यत्कदाचन ॥ ४४ ॥
देवदानवगंधर्वैःऋषिभिर्मनुजैःकृतं ॥ नलेनेंदुमत्याचराज्ञा १८४
चेंद्रसागरेनच ॥ ४५ ॥ संप्राप्ताःसर्वकामांस्तेगतागाणेश्वरंपदं

गिरिरुवाच॥इतितेकथितंसर्वंसेतिहासंव्रतंमहत्॥४६॥कु
रुत्वंमनसाध्यात्वावरदंगणनायकं॥व्रतमेतन्महाभागश्रो
करंप्राप्स्यसेततः॥४७॥स्नेहेनकथितंतेद्यप्रकाशंकुरुऽ
सांप्रतं॥इतिश्रीगणेशपुराणेउपासं०हिमवत्पार्वतीसं
वादेइतिहासकथनंनामद्विपंचाशत्तमोध्यायः॥५२॥
पार्वत्युवाच॥नलेनेदंकृतंकस्मात्कोनलोवदमेपितः॥
मनोविश्रांतिमायातिश्रुत्वैवंत्वामेककथानकं॥१॥गिरिरु०
निषधेषुमहाराजानलोनामाभवत्पुरा॥ब्रह्मण्योवेद
विच्छूरोदानीमानीधनीमुनिः॥२॥रथीखड्गीशरीचा

गु०
पु०
१८५

पीनिषंगीकवचीबलीकृतास्त्रोदेवश्चज्यश्चत्रिलोकीगम
नः श्रुची: ॥२॥ शेषोपिमूकतांयातिवर्णनेयत्गुणानपि
नसंख्याविद्यतेश्वानांगजानांरथिनांतथा ॥४॥ धातुष्का
णांशरभृतामग्निशस्त्रभृतामपि ॥ चक्रंधुर्यन्नयादेवाई
ड्याश्वरिगीश्वराः ॥५॥ रमयंतीतिभार्यासीयस्यसौ
दर्यमंदिरं ॥ रमयित्वाखिलान्ब्रह्मासारंसारंवरस्य
च ॥६॥ रमयंतीतिविख्यातायत्नस्तेनविनिर्मिता ॥ र
मयंतीत्रिलोकस्थनारीणांचारुतामदं ॥७॥ नानाल
कारसंयुक्तानानामणिविभूषिता ॥ मुक्ताहारलसत्कं १८५

गासकुणढ्यासुशोभना ॥८॥ यस्यामात्यामहानासीत्प
ग्रहस्तः पराक्रमी ॥ बुध्याब्रहस्पतिसमो नयेचांगिरसः
समः ॥९॥ तुंगत्वेमेरुसदृशो गांभीर्येचोदधेः समः कदा
चिदुपविष्टोसौ नलोराजामहामनाः ॥१०॥ निषसादस
भागेहे नृपमंडलमध्यगः ॥ नृत्यंतोप्सरसस्तस्यकुर्वंतश्चा
रुलोचनाः ॥११॥ स्तुवंतिबंदिनस्तंच ब्रह्मर्षिगणसंयु
तं ॥ एतस्मिन्नेवकालेतुगौतमोनृपतिंययौ ॥१२॥ उत्थ्या
पसादरंराज्ञास्वासनेविनिवेशितः ॥ पूजितःपरयाभक्त्या

ग० पु० १८६

ततःपप्रच्छतंनलः ॥१३॥ नलउवाच ॥ अद्याहमनुगृहीतस्
स्यदर्शनेनमहामुने जन्मराज्यंपितामाताकुलंजीवि
तमद्यमे ॥ सफलंस्वागमेहेतुंवरदर्शनंमहामुने ॥१४॥ गो
तमउवाच ॥ मय्यासीन्महतीवांछाद्रष्टुंत्वैवेश्वशस्पते ॥
नित्यंतत्सौम्यहेतत्रतः पूजोद्दष्टाचवैभवं ॥१५॥ इदानीम
नुजानीहिगमिष्यस्वाश्रमंप्रति ॥ नृपउवाच ॥ वेदवेदांग
विद्ब्रह्मन्सर्वशास्त्रप्रवर्तक ॥१६॥ स्यान्निधेत्तत्क्षणंछित्वा
हिंधिमेसंशयंमुने ॥ मुनिरुवाच ॥ साधुपृष्टंमहाभाग १८६

स्थितोमेस्नेहभावितः ॥ १७ ॥ नगानपाश्चदेवाश्चयतोप्रा
प्ताविलंघिनः ॥ १८ ॥ ममैवविस्मयोत्रस्यान्निरीक्षवै
भवंस्वकं ॥ १९ ॥ इत्थंममाभवन्केनपुण्येनतपसापिवा ॥ व
रत्वेनकश्चाहंप्राभवंपूर्वजन्मनि ॥ २० ॥ मुनिरुं० गौडदे
शात्परेदेशेपुरेपिप्पलसंज्ञके ॥ त्वमासीत्क्षत्रियःपूर्वंहरि
द्रोणानवांशुचिः ॥ २१ ॥ जायापत्यैःसुहृद्भिश्चवाक्पारैःपीडि
तोभृशं ॥ सात्रांवदृष्ट्वासर्वांस्त्वंनिर्वेदाद्गृहनैवनं ॥ २२ ॥ गतवा
नद्दृत्तवल्लीभिःसिंहव्याघ्रगजैर्मृगैः ॥ सेवितंशीतलजलैः
सरोभिर्जलजालिभिः ॥ २३ ॥ आश्रमोयत्रपादर्शिप्रमताश्र

ग० पु० ९८१

मतावने। तपोनिधेः कौशिकस्य वेदघोषनिनादिते॥२४
तत्र गत्वा मुनिं तं त्वं प्रणतो भक्तिभावितः॥ उत्थापितः कौशि
केन दीनानाथदयावता॥२५॥ उ॰॥ विनतं त्वां विदित्वा स आशी
र्वादमवीवदत्॥ गजाननो मे देवेशो भविता ते शुभंकरः॥
२६॥ श्रुत्वा तदाशिषो सौम्या प्राप्तोसि परमां मुदं॥ दृष्ट
वानसि तं विप्रमुपायं सर्वकामदं॥२७॥ दरिद्रनाशकं राज
न् भुक्तिमुक्तिप्रदं शिवं। गणेशाराधनं तुभ्यं कथयामास
कौशिकः॥२८॥ स॰३०। व्रतं कुरु गणेशस्य मासमात्रं नराधि
प कुरु मूर्तिं गणेशस्य मन्मयीं चारुदर्शनां॥२९॥ पूर्वोक्ते ९८

विधिनापूजांकुरुष्वगुणएकथानकं॥ दिनेदिनेमाससमात्रंततःसिद्धि
मवाप्स्यसि॥२०॥ मुनिरुवाच॥ इतिश्रुत्वाकौशिकंतुपप्रच्छभूमिपः
पुनः॥ नृपउवाच॥ गजाननंतुजानामितत्स्वरूपंवदस्वमे॥२१॥ ज्ञा
त्वातंदेवदेवेशंकरिष्येव्रतमुत्तमं॥ इतितेनकृतःप्रश्नोजगाद
मुनिसत्तमः॥२२॥ अनिर्वाच्यस्वरूपस्यपरब्रह्मस्वरूपिणः॥ वे
काहिस्वरूपाणिगजाननकृतानितं॥ कौशिकउवाच॥ यःकर्ता
सर्वलोकानांपितामाताजगद्गुरुः॥ ब्रह्मेंद्रशिवविष्णूनांध्येयो
पःसगजाननः॥२४॥ इतिश्रुत्वातुतद्वाक्यंप्रणिपत्यमुनीश्वरं॥ प्र
तस्थानस्ततस्तेनगतोसिनिजमंदिरं॥२५॥ स्थानेचववचनेमौनेग

मनेप्राय नेमुजि ॥ ध्यायन् गजाननं देवं प्राप सिद्धिमनुत्तमं ॥ ३६ ॥ आ
रभ्य श्रावणे शुक्ले चतुर्थ्यां व्रतमुत्तमं ॥ अकरोन्मन्मयीं मूर्तिं गणे
गा० शस्य यथोदितां ॥ ३७ ॥ स्वेच्छो नानारथगजाश्वाद्यैर्गोधनैर्धनसंच
पु० ये: ॥ दासीदासप्रुतः श्रीमान् जातो व्रतप्रभावतः ॥ ३८ ॥ दत्तवानसि
१९८ शानानि सर्वाणि देवतुष्टये ॥ गणेशस्य महामोल्यं प्रसादं कृतवा
न् मुदा ॥ ३९ ॥ भुक्त्वा भोगान्यथाकामं कालेन निधनं गतः ॥ जातो
निमिषिधे देशे नृपस्त्वं नलनामकः ॥ ४० ॥ व्रतस्त्वय्यपचलाल्ल
क्ष्मीस्त्रिलोकीजनवंदिते ॥ इदानीमनुजानीहि यत्स्पष्टं तान्नि
[illegible]पितं ॥ ४१ ॥ हिमवानुवाच ॥ एवं गते गौतमेन तु व्रतं चक्रे नलो नृपः
१९८

तद्वाक्याज्जातविश्वासो मूर्त्तिं कृत्वा सुशोभनां ॥४२॥ श्रुत्वा कथां ग
णेशस्य प्रत्यहं पूज्य भक्तितः ॥ अलभत्सर्वकामान्स व्रतस्यास्य प्रसा
दतः ॥४३॥ इति ते कथितं सुभ्रू नलेनेत्थं कृतं व्रतं ॥ उपदिष्टं गौत
मेन पूर्वजन्म कृतं व्रतं ॥४४॥ यस्य प्रभावं संपूर्णं वक्तुं केनापि ने
ष्यते ॥ इति श्री गणेशपु० उपासना० हिमवद्गिरिसंवादे नलव्र
तनिरूपणं० ॥५१॥ हिमवानुवाच ॥ इदानीं कथयिष्यामि राज्ञश्चंद्रां
गदेन च ॥ तद्वाच्यं कृतं ह्येतत्तत इंदुमत्याश्च मानने ॥१॥ मालवे विष
ये ख्यातं नगरं कर्णनामकं ॥ तत्र चंद्रांगदो राजा बभूवातिपरा
क्रमी ॥२॥ अणिमादिगुणोपेतः सर्वशास्त्रार्थतत्त्ववित् ॥ पञ्चाश

ग० पु० २८९

नी महात्यागी वेदवेदांगपारगः ॥ ३ ॥ प्रतिक्रांता समार्यस्य सुध
र्मी मतिमान्तृषी ॥ तान्येव शृणं ततां यांति चंद्रकांता मरीचिभिः ॥ ४
प्रति स्वस्त्वानिवासांसि रत्नवस्त्रं भाश्रयासुते ॥ नीललोहितपी
तत्वं चित्रतां यांति कानिचित् ॥ ५ प्रति साध्वी महाभागा पति
शुश्रूषणे रता ॥ धर्मशीला व्रतपरा स्नुषा श्वश्रूरसेविनी ॥ ६ ॥
गृहकृत्येषु चाध्यग्री देवतातिथिपूजका ॥ धर्मशीलो पिन्पति
समात्यैः प्रार्थितो भृशं ॥ ७ ॥ कदाचिद्दैवयोगेन मृगयां क्रीडितुं ययौ
तरुहरस्वावाराहमृगपक्षियुतं वनं ॥ ८ ॥ नीलकंचुकसंवीता
नीलोष्णीषोत्तरच्छदः ॥ बद्धगोधांगुलित्राणः शाखिकास्वडुखे २८९

रकान् ॥ १९ ॥ जवनाश्वसमारूढो धनुष्पापकरो बली ॥ तादृशैर्वीर-
कनैरैरमात्यैः सेवकैर्वृतः ॥ २० ॥ निघ्नन्मृगान्वराहांश्च शशांश्च यन्नगरं
प्रति ॥ भ्रममाणो वने राजा दृष्टो राक्षसपुंगवैः ॥ २१ ॥ चकंपे राक्षसान्
दृष्ट्वासीत्तज्ज्वरयुतो यथा ॥ दरीमुखान्गतान्नेत्रान्व्यादितास्या-
न्नभस्पृशान् ॥ २२ ॥ दृष्ट्वा तान्विकृताः सर्वे वीरास्ते विजना अपि
केचिद्यमत्वयं याता मूर्छिताः केपि भूगताः ॥ २३ ॥ तत्रैका राक्षसी
क्रूरा दृष्ट्वा कामार्ति सुंदरी ॥ तं नृपं परिरभ्यैव चुचुंब काममो-
हिता ॥ २४ ॥ तस्यामात्यान्नगे कृत्वा भक्षयामास सेवकान् ॥ एत-
स्मिन्नंतरे राजा पलायनपरो ययौ ॥ २५ ॥ कासारमध्येमग्नोभू-

न्त्वात्वाराक्षसीग्रासदसीचतं॥सधृतोनागकन्याभिर्वस्त्रालंकारभू
ग० षणैः॥१६॥प्रपच्छुर्नागकन्यास्तेकृतंप्रागमनंतव॥कोसिक
पु० स्यासिकिंनामावदसत्यंनरोत्तम॥१७॥इतितद्वचनंश्रुत्वा
१९० ताःजगादनराधिपः॥अहंचंद्रांगदोनामाहेमांगदसुतोब
ली॥१८॥मालवेविषयेकर्णेनगरेवसतिर्मम॥राक्षसीभयसं
त्रस्तःप्रविष्टःसलिलंमहत्॥१९॥भवतीभिरिहानीतोयत्क
ष्टंतन्निवेदितं॥भक्षितासर्वेलोकामेमृगयाभिरतामपा
२०॥सरोजलप्रसादेनजीवंस्तिष्ठामिसांप्रतं॥इतितांवचनं
श्रुत्वाऊनरूचुर्नृपंतदा॥२१॥नाःऊचुः॥भवास्माकंपतिरिह १९०

सर्वं सेत्स्यति ते प्रियं ॥ अस्माकं नागकन्यानां भोगश्चातीव
दुर्लभः ॥ २२ ॥ तासामिति वचः श्रुत्वा प्रोवाच नृपसत्तमः ॥ एकं
पतिव्रतं मे स्ति स्वधर्मस्तं कथं त्यजे ॥ २३ ॥ सोमवंशप्रसूतानां
राज्ञां धर्मान् ब्रवीमि वः ॥ परद्रव्यं परद्रोहं परदारांस्तथै
व च ॥ २४ ॥ परनिंदां च नेच्छंति नृपाः सौम्याश्च साधवः ॥ अ
धीतिर्यजनं दानं शरणागतपालनं ॥ २५ ॥ निषिद्धाकरणं
चैव विध्यर्थप्रतिपालनं ॥ एते धर्मास्त्रिवर्णानां याजनादि त्रि
यं द्विजे ॥ २६ ॥ अधिकं सर्ववर्णानामातिथ्यं परमं मतं ॥ इति
श्रुत्वा नृपवचः खिन्ना नागकुमारिका ॥ २७ ॥ प्रशेपुस्तं

ना०
पु०
२९१

वियुक्तस्त्वंबहुधास्त्वस्त्रियामवे ॥ बबंधुर्निगडैस्तांताडंश्चि
ताः कामविह्वलाः ॥२८॥ राक्षसीतुजलंप्राशयपस्तदथैतत्स्मं
रोगतं ॥ भक्षयित्वाजलचरान्नतृप्यत्परमेतरा ॥२९॥ इमंदृ
तांतमप्रणोद्राज्ञीराजीवलोचनः ॥ पर्यंकस्थास्वदुत्ता
स्मात्राक्षसीतोयशोषितात् ॥३०॥ मग्नंनिशाम्यनृपतिंदुःखि
तापतिताभुवि ॥ मूर्छामवापमहतींसखिभिः परिवीजिता
३१ ॥ सिक्तासीतलतोयेनरुदतीभिर्मुहुर्मुहुः ॥ उपविश्यप्र
रुदंतिघ्नंतीवक्षःशिरोमुखं ॥३२॥ भृशंशोचपरमालापैर्भर्तुः
कांततिजल्पति ॥ कगतः प्राणनाथोमेहित्वामांप्रियवा २९१

दिनी ॥२३॥ सर्वावयवसंपूर्णां प्रणतां प्रियकारिणीं । मत्तुवाक्य
रतां नित्यं नित्यं चातिथिपूजकां ॥२४॥ कुत्रस्तो भर्ति मे नाथो
निद्रां वा कुत्र यास्यति कां च नं शयनं हित्वा परार्घ्यास्तरणे
हृते ॥२५॥ कथं स्नास्यति कांतो मे हित्वा तैलं सुगंधितं लोका
नां पालनं कोऽस्या विना तेन करिष्यति ॥२६॥ प्रजानां सर्वलो
कानां बालानां रंजनं च कः ॥ अस्ते यातो गुणनिधिः प्रतापनि
धिरद्य किं ॥२७॥ द्विपुत्राः पुत्र्याः प्रपश्यामि विना तेन महात्म
ना ॥ क्वाहं सुखं भयास्यामि क्व सुखं सोपि यास्यति ॥२८॥ इ
ह लोके परे चापि न सुखं कुलयोषितां ॥ हीनानां स्वामिना

देवयरेतत्स्वामिनासह ॥ ३९ ॥ शरणागतयुक्षिंचरी नानां
कः करिष्यति ॥ एवं बहूनि धारीनारुदती भृशविह्वला ॥ ४० ॥
ग० तत्याज त्रोटयित्वा सा भूषणानि च भूरिशः ॥ कंकणानि च
पु० सर्वाणि बभंज च मुमूर्छ च ॥ ४१ ॥ इति श्रीगणेशपु० उपा०
१६२ चंद्रांगदोपाख्याने चतुःपंचाशत्तमोध्यायः ५४ पार्वत्यु०
तस्यां तु मूर्छितायां तु किमकुर्वन् जनास्तदा ॥ तन्मे विस्त
रतो ब्रूहि हृदयानंदनंपितः ॥ १ ॥ शैल उवाच ॥ तदा सर्वे ना
गरिका नानावाक्यविशारदाः ॥ प्रमृज्य स्वानि चाश्रूणि ॥ २
समादधुर्नृपस्त्रियं ॥ जना ऊचुः ॥ मातरुत्तिष्ठ मा शोकं १६२

परिपृच्छामो किमुकंचिदिहागतं ॥९॥ अतीतानागतविदं कथ
यिष्यति सो विलं ॥ अनंतरं तु यत्कार्यं तत्सर्वं विदधामहे ॥१०॥ ए
ग० वं प्रबोधिता लोकैः स्तापमिंदुमती सदा ॥ आश्वस्ता सर्ववाक्येन
पु० प्रमृज्याश्रूणि वाससा ॥११॥ विसर्जयामास तदा लोकान्सर्वा
१६२ न्समागतान् ॥ त्यक्त्वा सौभाग्यचिन्हानि प्रपेदे कृशतां भृशं ॥
